CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय, भारतनिधि, कचौड़ी वाराणसी-5

उ.4/36

गीतगोविन्दम्

आम्नाय-ग्रन्थालय, भारतनिधि, कचौड़ी वाराणसी-5

आम्नाय-ग्रन्थालय, भारतनिधि, कचौड़ी वाराणसी-5

ालय
ाणसी-५
/36

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri 1.1

ऊ 9/36

प्रस्तावना।

सर्व साधारण कृष्ण चरणाम्बुजरस लीलामृत प्रेमियोंक हो कि जिसकी आशालता प्रेमीजन बहुत दिवसोंसे लगाए श्रीगीतगोविंदका टीका भाषामें श्रीयुत श्रीअमृतलाल भट्ट अत्यंत सरल सुमधुर गम्भीर और रोचक शब्दोंमें किया है उत्तम और मनरंजन रसिकजन मन भावन है कि आजत किसीने नही किया इसकी एक उत्तमता और है कि आनन्द- आदि कवियोंके भाषासे इसमे प्रेमरस और भक्तिरसका विशेष रक्खा गया है तिस्परभी जो कुछ भूल चूक रहगई हो वह विद्वद्रूप क्षमा करके लिखेंगे तो हम पुनर्वार सुधारदेंगे ॥

आम्नाय-ग्रन्थालय, भरतनिधि, करौंदी वाराणसी-5

ऊ 9/1

आम्नाय-ग्रन्थालय, भरतनिधि, करौंदी वाराणसी

"वन्दे गुरोः श्रीचरणं मुरारेः
पादाब्जप्रेमामृतवारिवाहं।
संसारतापापनुदं शरण्यं
सभक्तदात्यूहकुलैर्निषेव्यं ॥"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऊ ५/ ३६

॥ श्रीः ॥

अथ

गीतगोविंदम् ।

टीकासमेतम्

प्रथमः सर्गः ॥ १ ॥

श्रीराधाकृष्णाभ्यां नमः ॥ भद्राय भवतांभूयात्कृष्णः सद्भक्तिभावितः ॥ कालिंदीजलसंसर्गमेघश्यामोतिसुंदरः ॥ १ ॥

इह कविःप्रारिप्सितस्य निर्विघ्नपरिसमाप्त्यर्थं कृष्णस्मरणरूप वस्तुनिर्देशलक्षणं मंगलाचरणं तावदाचरति—

मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ॥ इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयन्ति यमुनाकूलेरहःकेलयः ॥ १ ॥

सं०टी० मेघैरिति । राधामाधवयोःरहःकेलयःयमुनाकूले जयंतीत्यन्वयः।राधाकृष्णयोःरहःकेलयःएकांतक्रीडाःयमुनाकूले यमुनातीरे जयंति सर्वोत्कर्षेण वर्तंते । कथंभूतयोःराधामाधवयोःप्रत्यध्वकुंजद्रुमं अध्वनि मार्गे कुंजे लतागृहे द्रुमे वृक्षे च इत्थं इति नंदनिदेशतः नंदाज्ञया चलितयोः । अथवाऽध्वकुंजद्रुमान्प्रति उद्दिश्य चलितयोः इति किं हेराधे अंबरं आकाशं मेघैर्मेदुरं व्याप्तमित्यर्थः । वनभुवः तमालद्रुमैर्वृक्षैःश्यामाः अयं कृष्णःनक्तं रात्रौ भीरुःभयशीलःअतिबालत्वात् तस्मादिमं पुरोवर्तिनं कृष्णं गृहं प्रापय एवंकरणे नंदस्यान्यस्मिन् विश्वासाभावात् ॥ १ ॥

भा०टी० राधाजीकी कोई प्रिय सखेली उनसे हि कथन करने लगी कि, विगत रात्रिमें 'कृष्णचंद्र' महाराज जी रमणियोंके साथ क्रीडा में सक्त होरहे थे .

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जिस हेतु लालजीसे कुछ अपराध होगयाथा; तब अपराध के लिये उनको बहुतहि भय होरहा है, और लालजीको तुह्मारी ओर से वही चिन्ता व्याप्तहो रही है । राधाजी, अब आप दया करके श्याम सुन्दरजीको अपने साथ लेकर निकुञ्जवनमें क्रीडा करो । और हे राधा, तुम आप क्या कह सकतीहो कि यही आजकी चांदनीरात्रि में समस्त लोगों में निर्लज्जित होकर किसतरहसे नंदलाल महाराज के निकुञ्जमें प्रविष्ट होगी । तुह्मे अपने मनमें ध्यानलगाकर देखना चाहिये कि आज आप लोगों के मिलावट के कारण से आकाशपर अभीसे मेघ छाया होरही है; देखो कि चंद्रमा मेघोंके अंतर मे छिपगयाहुआ है; और निकुञ्जभी तमालादि वृक्षोंसे परिपूर्ण होरहा है । जिस कारण से बहुत सा अंधेरा होरहा है । हे राधा ! और तुह्मे कुछ संदेह करना नहि चाहिये । प्यारी सखी के समझानेसे राधाजी निकुञ्जवनमें प्राप्तहोकर लालजीके वशहोगई । यह निकुञ्ज नाम वन कालिन्दीं नदीके तटपर है और यह कानन राधा कृष्णजीके क्रीडासे सबही वनोंसे अति उत्तम है ॥ १ ॥

इदानीं कविः सरस्वतीलक्ष्म्योःकीर्तनपूर्वकं कृष्णस्य सुरतक्रीडावर्णनं कर्तुमाह वसंततिलकावृत्तेन—

वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरण
चारणचक्रवर्त्ती ॥ श्रीवासुदेवरतिकेलिकथासमेत
मेतं करोति जयदेवकविःप्रबन्धम् ॥ २ ॥

सं०टी० वाग्देवतेति । जयदेवकविःएतं प्रबंधं कृष्णकेलिकथाप्रतिपादकग्रंथं करोतीत्यन्वयः । कथंभूतो जयदेवकविःवाग्देवताचरितचित्रितचित्तसद्मा वाग्देवतायाःसरस्वत्याश्चरितेन वचनरचनाचारविशेषेण चित्रितं मंडितं चित्तसद्म मनोगृहंयस्यसः । पुनःकथंभूतः पद्मावस्याःलक्ष्म्याश्चरणचारणेन संवाहनेन चक्रवर्तीनृपइव लक्ष्मीसेवया चक्रवर्तित्वं प्राप्त इति । कथंभूतं प्रबंधं श्रीवासुदेवेति श्रीरू-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पिणी राधा वासुदेवःश्रीकृष्णश्च तयोःरतिकेलिकथया सुरतक्रीडाकथनेन समेतंयुक्तम् ॥ २ ॥

भा० टी० श्रीकृष्ण-चरित्र--चित्रित-हृदय और श्रीराधाजीका चरणचिन्हितशरीर जयदेवस्वामी कवि लालजीकी रासलीला वर्णन करनेके कारण यह गीतगोविन्द पुस्तक सब लोगोंमें प्रकाश करते है ।

अथ कविर्निजग्रंथप्रयोजनमाह द्रुतविलंबितेन वृत्तेन—

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् ॥ मधुरकोमलकान्तपदावलिं शृणु तदा जयदेवसरस्वतीम् ॥ ३ ॥

सं० टी० यदीति। हेकृष्णभक्त तदा तर्हि जयदेवसरस्वतीं शृणु इत्यन्वयः । यदि यर्हि हरिस्मरणे कृष्णचिंतने सरसं सानुरागं तव मनः । अस्तीत्यध्याहारः । यदि यर्हि विलासकलासु विलासःश्रीकृष्णविलासःकलाश्चतुःषष्टिस्तासु कुतूहलमस्तीति । कथंभूतां जयदेवसरस्वतीं मधुरा सरसा अर्थतः शब्दतश्चकोमला अतएव कांता मनोहरा पदावलिःपदसमूहो यस्यां सा ताम् ॥ ३ ॥

भा० टी० हे भक्ति प्रधान, जब कृष्णजीका ध्यान करके अपना हृदय शीतल करना चाहो, और नारायणजीकी रासलीला और काननक्रीडा श्रवण इच्छा चाहो, तब जयदेवस्वामीकृत गीतगोविन्द पुस्तक पाठ और श्रवण करो॥ ३ ॥

कविरन्यग्रंथेभ्यो मद्ग्रंथे वहवो गुणाःसंतीति द्योतयन् शार्दूलविक्रीडितेनाह—

वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः॥शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धनस्पर्द्धी कोऽपि नविश्रुतः श्रुतिधरो धोईकविक्ष्मापतिः ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं० टी० वाचइति। उमापतिधरो नाम कविर्वाचः वचनानि पल्लवयति विस्तरयति नतु गुणान्। गिरां संदर्भशुद्धिंअर्थतः शब्दतश्च ग्रन्थन-विशुद्धिं जयदेव एव परं जानीते नान्य इत्यर्थः। शरणो नाम कविः दुरूहद्रुतेःविषमग्रंथस्य शीघ्रोच्चारतःश्लाघ्यःस्तुत्यः। शृंगारेति शृंगारोत्तराणि शृंगारप्रधानानि संति उत्कृष्टानि प्रमेयानि वा वचनानि तेषां रचनैःप्रबंधैःआचार्यगोवर्धनस्पर्धी कोपि न विश्रुतःआचार्यगोवर्द्धनःकविःशृंगारप्रधानमेव प्रबंधं करोतीत्यर्थः। धोईनामा कविक्ष्मापतिः कविराजःश्रुतिधरःश्रुत्या श्रवणमात्रेणैव धारयति न पुनरर्थादिग्रहणे प्रवीणःइति राजपदेन महाहंकारकथनम् ॥४॥

भा० टी० कवि उमापतिधर वाक्य विन्यासमे श्रेष्ठ था, शरण दुरूह रचनामे प्रसिद्ध था,गोवर्द्धनाचार्य शृंगार रस युक्त कवित्त लिखने के कारण से मान को प्राप्त हूआथा,एवं घोई नाम कविराज श्रुतिधर था किंतु केवल जयदेव विशुद्ध रचनाकेलीये अति आदरणीयहै ॥ ४ ॥

कविरधुना भक्तानुग्रहार्थं विघ्नाभावार्थं च दशावतारवर्णनमाह-

अथ प्रथमप्रबंधो मालवरागेण रूपकताले गीयते॥ १॥

प्रलयपयोधिजले धृतवानसि वेदम्॥ विहितवहित्रचरित्रमखेदम्॥केशवधृतमीनशरीर जयजगदीश हरे॥ १॥

सं० टी० प्रलयेत्यादि जगदीशइत्यंतं। अस्य गीतस्य मालवरागःरूपकतालः।तल्लक्षणं "नितंविनीचुंवितवक्रपद्मःशुकद्युतिःकुंडलवान्किरीटी।संगीतशालां प्रविशन्प्रदोषे मालाधरो मालवरागराजः" "रूपकेस्यात् द्रुतं लघुरिति"। हेकेशव धृतंमीनस्य शरीरं वेदोद्धरणार्थं येन सः हे जगदीश हे हरे जय उत्कर्षेण वर्द्धस्व। कस्मादित्यत आह त्वं प्रलयपयोधिजले कल्पांतसमुद्रजले निमग्नं वेदं धृतवानसि। कथं अखेदं अपरिश्रमं यथा भवति तथा। पुनःकथं विहितेतिविहितं कृतं वहित्रचरित्रं समुद्रतरणकारणनौकाचेष्टितं यत्र क्रियायाम् ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी० हे भगवान्, प्रलयके समयमें आपने मीनरूप धारण करके वेदशास्त्रकी रक्षा कियाथा; हे मीनरूपीभगवान् ! तुह्मारी सदाहि जयहो जयहो जयहो ॥ १ ॥

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे ॥ धरणिधरणकिणचक्रगरिष्ठे ॥ केशव धृतकच्छपरूप जय जगदीश हरे ॥ २ ॥

सं०टी० क्षितिरिति।हेकेशव धृतं कच्छपस्य रूपं येन स तत्संबोधनं हेजगदीश हेहरे जय पूर्ववत् । तव पृष्ठे क्षितिःपृथ्वी तिष्ठतीत्यन्वयः । कथंभूते पृष्ठे अतिविपुलतरे अतिक्रांतःविपुलतरःपदार्थों येन । पुनःकथंभूते धरण्याःक्ष्मायाः धरणेन वहनेन यत् किणचक्रं मूर्तिपडस्तेन गरिष्ठे दृढे ॥ २ ॥

भा०टी० हे भगवान् ! आपने कूर्मरूप धारणकरके अपने पृष्ठपर पृथिवीको धारण कियाथा; इस कारणसे आपकीपृष्ठपर व्रणचिन्ह है। हे जगदीश भगवान् तुह्मारी नित्यही जयहो जयहो जयहो ॥ २ ॥

वसति दशनाशिखरे धरणी तव लग्ना ॥ शशिनि कलंककलेव निमग्ना ॥ केशव धृतसूकररूप जय जगदीश हरे ॥ ३ ॥

सं०टी०वसतीति।हेकेशवेत्यादिपूर्ववत्।धृतं सूकरस्य रूपं येन तव दशनाशिखरे दंताग्रभागे धरणी पृथ्वी लग्ना संबद्धा वसति।तत्र दृष्टांतः केव शशिनि चंद्रे निमग्ना अंतः स्थिता कलंककलेव कलंकरेखेव ।३।

भा०टी०हे भगवान्, आपने सूकररूप धारण करके प्रलयके पानीसे पृथिवीको अपने दंतोंसे उद्धार किया इस हेतु से धरणी आपके दंतोंमें प्राप्त होकर कलंक रेखा सदृश शोभायमान हो रही है हेभगवान् तुह्मारा जयहो जयहो जयहो३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तव करकमलवरे नखमद्भुतशृंगम् ॥ दलितहिरण्यकशिपुतनुभृंगम् ॥ केशव धृतनरहरिरूप जय जगदीश हरे ॥ ४ ॥

सं॰टी॰ तवेति। हे केशव धृतं नरहरेः रूपं नरसिंहस्य स्वरूपं येन तत्संबोधनं। तव करकमलवरे हस्तपद्मश्रेष्ठे नखं अस्तीत्यध्याहारः। कथंभूतं नखं अद्भुतशृंगं आश्चर्यकरं शृंगमग्रभागो यस्य। अद्भुतत्वे हेतुमाह दलितः विदारितः हिरण्यकशिपोर्दैत्यस्य तनुरेव भृंगो भ्रमरो येन। अन्यत्र भ्रमरेण कमलाग्रं दल्यते इह तु वैपरीत्येनाश्चर्यम् ॥४॥

भा॰टी॰ हे भगवान्, आपने नृसिंह रूप धारण करके अपने हि नखोंनोंसे दैत्यराज हिरण्यकशिपुको विनाश किया था, इसकारण आपको भक्तजन बहुतहि प्रिय है, हे भगवान्, तुम्हारी सदैव कालहि जयहो जयहो जयहो ॥ ४ ॥

छलयसि विक्रमणे बलिमद्भुतवामन ॥ पदनखनीरजनितजनपावन ॥ केशव धृतवामनरूप जय जगदीश हरे ॥ ५ ॥

सं.टी. छलयसीति। धृतं वामनस्य रूपं येन हेअद्भुत वामन आश्चर्यहेतुः वामन त्वं विक्रमणे पादविक्षेपे कर्तव्ये बलिं असुरं छलयसि प्रवंचयसि। कीदृशस्त्वमिति संबोधनं पदेति पदनखनीरेण पदनखाग्रसंबंधिजलेन गंगारूपेण जनितं कृतं जनपावनं लोकपावित्र्यं येन ॥५॥

भा॰टी॰ हेभगवान्! आपने वामन रूप धारण करके दैत्यराज बलिको छलन किया था, और आप हि अपने चरण नखोंके पानीसे सकल लोगोंको पावन किया था, हेभक्तजन रक्षक तुम्हारी जयहो जयहो जयहो ॥ ५ ॥

क्षत्रियरुधिरमये जगदपगतपापम् ॥ स्नपयसि पयसि शमितभवतापम् ॥ केशवधृतभृगुपतिरूप जयजगदीश हरे ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं० टी० क्षत्रियेति । हे धृतभृगुपतिरूप धृतपरशुरामरूप क्षत्रिय रुधिरमये पयसि जगत् स्नपयसीत्यन्वयः । क्षत्रियाणां शोणितविकारे जले जगत्स्नापयसि । स्नानेन फलमाह कथंभूतं जगत् अपगतपापं गतकलुषं । पुनः कथंभूतं शमितभवतापं दूरीकृतसंसारतापम् ॥ ६ ॥

भा० टी० हेभगवान्! आपने परशुरामरूप धारण करके कठोर आत्मावाले क्षत्रीलोगोको विनाश किया था; और आनके उनीके रुधिरसे पृथिवीको तृप्त किया था; हेभगवान्! तुम्हारी जयहो जयहो जयहो ॥ ६ ॥

वितरसि दिक्षु रणे दिक्पतिकमनीयम् ॥ दशमुख मौलिबलिं रमणीयम् ॥ केशव धृतरघुपतिरूप जय जगदीश हरे ॥ ७ ॥

सं० टी० वितरसीति । हेधृतरघुपतिरूप धृतरामशरीर त्वं रणे संग्रामे दशमुखमौलिबलिं रावणमस्तकोपहारं दिक्षु दिशासु वितरसि ददासि । कीदृशं दिक्पतिकमनीयं इंद्रादीनां रमणीयं काम्यं इच्छाविषयमित्यर्थः ॥ ७ ॥

भा० टी० हेभगवान्, आपने सर्व लोगोंपर दयाकरनेके लिये रामरूप धारण करके पृथिवीमें प्राप्तभयेथे, और सर्वदेवताओंको प्रसन्न करनेके लिये राक्षसराज रावणको संहार किया था, हेभगवान्! तुम्हारी जयहो जयहो जयहो ॥ ७ ॥

वहसि वपुषि विशदे वसनं जलदाभम् ॥ हलहति भीतिमिलितयमुनाभम् ॥ केशवधृतहलधररूप जय जगदीश हरे ॥ ८ ॥

सं० टी० वहसीति । हेधृतहलधररूप धृतबलभद्ररूप त्वं वपुषि वसनं वस्त्रं वहसि धारयासि । कथंभूते वपुषि विशदे शुभ्रे कथंभूतं वसनं जलदाभं सजलमेघसदृशं । पुनःकथंभूतं हलहतिभीत्या लांग-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लाघातभयेन मिलिता उपस्थिता या यमुना तद्वत् आभा दीप्ति र्यस्य तत् । भयेनातिश्यामत्वंभवति ॥ ८ ॥

भा॰टी॰ हेभगवान्, आपने हलधर रूप धारण करके मेघ सदृश नीलवस्त्र परिधान किया था, तब आपके शुभ अंगमें वह नीलवसन हलभीता यमुना स्वरूप शोभायमान हुवाथा, हेभगवान्, तुम्हारी जयहो जयहो जयहो॥८॥

निंदसि यज्ञविधेरहह श्रुतिजातं ॥ सदयहृदय दर्शितपशुघातम् ॥ केशव धृतबुद्धशरीर जय जगदीशहरे ॥ ९ ॥

सं॰टी॰ निंदसीति । हेधृतबुद्धशरीर धृतबुद्धावतार हेसदयहृदय दया सहितांतःकरण जय । ननु वेदनिंदकस्य कथं स्तुतिरित्यत आह त्वं यज्ञविधेःक्रतुविधानसंबंधि श्रुतिजातं वेदवाक्यसमूहं निंदसि दूषयसि न तु सर्वमित्यर्थः । सोपि किमिति निंद्यते इत्यत आह अहह कष्टं दयायां वा दर्शितःबोधितः पशूनां घातो वधो येन तादृशं वेदोपि पशूनां घातं बोधयतीत्यतः अहोकष्टमित्येव निंदय सीतिभावः॥९॥

भा॰टी॰ हेभगवान्, आपने सर्वजीवोंपर दया प्रकाश करनेके कारण बुद्ध रूप धारण किया था, और पृथिवीमें पशु संहार करके यावत् यज्ञयाजनादिक कर्म्म होतेथे, उनके निन्दाकारी आपहि हुवेथे, हेभगवान्, बुद्ध रूपके धारी तुम्हारी जयहो जयहो जयहो ॥ ९ ॥

म्लेच्छनिवहनिधने कलयासि करवालं ॥ धूमकेतुमिव किमपिकरालं ॥ केशव धृतकल्किशरीर जय जगदीश हरे ॥ १० ॥

सं॰टी॰ म्लेच्छेति । हेधृतकल्किशरीर धृतकल्क्यवतारशरीर तच्चेष्टितमाह त्वं म्लेच्छनिवहनिधने म्लेच्छानां निवहाः समूहास्तेषां निध-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ने नाशनिमित्तं किमपि अनिर्वचनीयं करवालं खड्गं कलयसि धारयसि । कथंभूतं करवालं धूमकेतुमिव औत्पातिकतारकापातमिव करालं भयानकं । अथवा धूमकेतुरग्निस्तमिव ॥ १० ॥

भा०टी०हेभगवान्, आपने दुष्ट म्लेंच्छोंको संहार करनेके लिये धूमकेतु स्वरूप होकर खड्ग धारण किया था, हेभगवान्! तुम्हारी जयहो जयहो जयहो ॥ १० ॥

धृतवानसीत्यादिभिर्वर्तमानप्रयोगैरवताराणां भगवतश्च लीलायाः नित्यत्वं दर्शितं । एवं तत्तदवतारगुणैः स्तुतिं कृत्वा संप्रत्यवतारिणं स्तुवन्प्रार्थयते-

श्रीजयदेवकवेरिदमुदितमुदारम् ॥ शृणुसुखदं शुभदं भवसारम् ॥केशव धृतदशविधरूप जय जगदीश हरे ॥११॥

इति श्रीगीतगोविंदेप्रथमः प्रबंधः ॥ १ ॥

सं०टी०श्रीजयदेवेति । हेधृतदशविधरूप धृतानि दशविधानि रूपाणि येन तत्संबोधनं श्रीजयदेवकवेः इदंगीतं उदितं भाषितं शृणु आकर्णयेति भक्तजनंप्रत्युक्तिः । कीदृशं उदारं मनोहरं सुश्राव्यत्वात् शुभदं कल्याणदायकं भवसारं संसारे धनरूपम् ॥ ११ ॥

भा०टी०श्रीजयदेव भणित स्तोत्र श्रवण करके आनंद और कल्याण होताहै, और यह स्तोत्र सब स्तोत्रोंमें श्रेष्ठ है, हेभक्त इसको प्रीति पूर्वक आनंदसे श्रवण करो, हेभगतजन दयाल,तुम्हारी जयहो जयहो जयहो ॥ ११ ॥

उक्तानेवावतारान्पुनःसंक्षेपेण कीर्तयति-

वेदानुद्धरते जगन्ति वहते भूगोलमुद्बिभ्रते दैत्यंदारयते बलिं छलयते क्षत्रक्षयं कुर्वते ॥ पौलस्त्यं जय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ते हलं कलयते कारुण्यमातन्वते म्लेच्छान्मूर्च्छय
ते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ १ ॥

स०टी०वेदानिति । तुभ्यं कृष्णाय नमःअस्तु इत्यन्वयः। कथंभूताय वेदानुद्धरते मीनरूपेण । पुनःकथंभूताय जगन्ति वहते धारयतेकूर्मरूपेण। भूगोलं पृथ्वीचक्रं उद्बिभ्रते ऊर्ध्वं धारयते वाराहरूपेण । दैत्यं हिरण्यकशिपुं दारयते नृसिंहरूपेण। बलिं बलिदैत्यं छलयते वंचयते वामनरूपेण। क्षत्रक्षयं क्षत्रियनाशं कुर्वते परशुरामरूपेण। पौलस्त्यं रावणं जयते रामरूपेण। हलं लांगलं कलयते धारयते बलभद्ररूपेण । कारुण्यं दयां आतन्वते विस्तारयते बुद्धरूपेण। म्लेच्छान् अंत्यजान् मूर्च्छयते नाशयते कल्किरूपेण। अतएव दशाकृतिकृते दशविधरूपधारिणे ॥ १ ॥

भा०टी०हेभगवान्, आपने मीन रूप धारण करके प्रलयके पानीसे वेद शास्त्रों को रक्षा कियाथा, और कूर्म्म रूप धारण करके पृथिवीको अपनीहि पृष्ठपर वहन कियाथा, और वराह रूपधारण करके अपने दन्तोंसे पृथिवीको पानीमेंसे उठायाथा, और नृसिंहरूप धारण करके पापात्मा अतिउग्रहिरण्यकशिपुको विनाश कियाथा, और वामनरूप धारण करके बलि राजाको छल कियाथा, और जामदग्नि स्वरूप धारण करके क्षत्रिलोगोंका संहार कियाथा, और राम रूप धारण करके पौलस्त के पुत्र दुर्दांत रावण को हनन कियाथा, और हलायुध रूप धारण करके हल प्रति चालन कियाथा, और बुद्ध रूप धारण करके अहिंसा धर्म्म को प्रकाशित कियाथा, और कल्कि रूप धारण करके दुराचार महाभ्रष्ट म्लेच्छ लोगोंका विनाश करते है। आपके चरण कमलोंमें मेरा वारंवार दण्डवत नित्यप्रणाम है ॥ १ ॥

कविरिदानीं गुर्जरीरागेण कृष्णं स्तौति–

अथ द्वितीयप्रबंधो गुर्जरीरागेण प्रतिमंठताले गीयते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रितकमलाकुचमंडल धृतकुंडल ए ॥ कलितललित वनमाल जयजयदेवहरे ॥ १ ॥

सं०टी० श्रितेति । रागलक्षणं "श्यामासुकेशीमलयद्रुमाणां मृदूल्लसत्पल्लवतल्पयाता। श्रुतेःस्वराणांदधतीविभागं तंत्रीमुखा दक्षिणगुर्जरीयं" इति ॥ हेदेव हेहरे जयविजयस्व भक्तपक्षपातेसर्वोत्कर्षेण वर्द्धस्व । श्रितेत्यादीनि अष्टपद्याः पदानि संबोधनानि ज्ञातव्यानि। ए इतिपदं हे इत्यर्थः हेश्रितकमलाकुचमंडल श्रितं आश्रितं कमलायाः लक्ष्म्याःकुचमंडलं स्तनमंडलं येन हेधृतकुंडल धृते कुंडले येन तस्य संबोधनं कलितेति कलिता धृता ललिता सुंदरा वनमाला पुष्पदाम येन ॥ १॥

भा०टी० हेभगवान्! आपने लक्ष्मीदेवीका स्तन युगल धारण कियाहै; आप कर्णभूषणसे शोभायमानहै; और आपके कण्ठदेशमें वनमाला विराजमान होकर बहुत सुंदर शोभायमान होरही हैं । हे कमलाकान्त ! तुम्हारी प्रतिदिन जयहो जयहो जयहो ॥ २ ॥

दिनमणिमंडलमंडन भवखंडन ए ॥ मुनिजनमानसहंस जय जय देव हरे ॥ २ ॥

सं०टी० दिनमणीति । हेदिनमणिमंडलमंडन सूर्यमंडलालंकार हेभवखंडनभक्तानां संसारनाशक हेमुनिजनमानसहंस मुनिजनानां मानसे हंस इव मानसे सरासि हंसोस्ति तद्वत् । जय जयेति पूर्ववत् ॥ २ ॥

भा०टी० हेभगवान्! आप सूर्य्यमण्डलके भूषण स्वरूप हो और आपहि सर्व लोगोंको गति और मुक्ति भुक्तिके दायक हो; और आपहि संत भक्तजन लोगों के हृदयरूप सरोवरमें हंसके सदृश विराजमान रहते हो। हेनारायण, तुम्हारी जयहो जयहो जयहो ॥ २ ॥

कालियविषधरगंजन जनरंजन ए ॥ यदुकुलनलिनदिनेश जय जय देव हरे ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०कालियेति। कालियनाम्नः सर्पस्य गंजन हिंसक हेजनरंजन हे यदुकुलनलिनदिनेश यादवकुलकमलसूर्य ॥ ३ ॥

भा०टी०हेभगवान्! आपने कालीयनागको दमन कियाथा, और अपने भक्त-जनोंकी वांच्छाके परिपूरण करनेवालेहो; और यदुवंशरूप कमलके लिये सूर्य्य स्वरूप है। हेयदुकुल प्रकाशक, तुम्हारी जयहो जयहो जयहो ॥ ३ ॥

मधुमुरनरकविनाशन गरुडासन ए ॥ सुरकुलकेलि निदान जय जय देव हरे ॥ ४ ॥

सं०टी०मधुमुरेति। मधुमुरनरकसंज्ञानां दैत्यानां विनाशन गरुडासन गरुडएव आसनं यस्य सः सुरकुलेति सुरकुलानां देवसमूहानां केलेः क्रीडायाः सुखस्योति यावत् निदान आदिकारण ॥ ४ ॥

भा०टी०हेभगवान्! आपने मधु दैत्यका वध कियाथा, और मुरनाम असुर का विनाशभी कियाथा, और नरक निवासि पापिष्ठ लोगोंको मुक्ति देनेवाले आपहि है। और नागारि खगपति आपका वाहनहै, और आपहि देवतोंकी क्रीडाके निदान हो, परिपूर्णतासे, हे नारायण! आपकी जयहो जयहो जयहो ॥ ४ ॥

अमलकमलदललोचन भवमोचनए ॥ त्रिभुवनभव ननिधान जय जय देव हरे ॥५॥

सं०टी०अमलेति। अमलकमलवत् निर्मलपद्मपत्रवत् लोचने यस्य। हेभवमोचन संसारभंजक। त्रिभुवनभवननिधान त्रिभुवनमेव भ-वनं गृहं तत्र निधानमिव निधिरिव ॥ ५ ॥

भा०टी०हेभगवान्! आपके नेत्रोंसे कमलनिर्मित हुवा है, इस हेतुसे आपका नाम कमललोचनहै, और आपजीवोंको संसार रूप बंधनसे मुक्त कर देनेवाले है, हेनारायण, आपके असंख्यक नाम निर्मल शुचिपवित्रता वाले है; और जिन नामोंसे संपूर्ण भक्ति प्रधान जीवोंका हृदय शुद्ध होताहै। हेभक्तजनपालक! तुम्हारी जयहो जयहो जयहो ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनकसुताकृतभूषण जितदूषणए ॥ समरशमित दशकंठ जय जय देव हरे ॥ ६ ॥

सं०टी०जनकेति। जनकसुतायाः सीतायाः कृतभूषण कृतालंकार! जितदूषण जितो दूषणनामा राक्षसो येन । समरेति समरेसंग्रामे शमितो मारितो दशकंठो रावणो येन ॥ ६ ॥

भा०टी०हे भगवान्! आपने मिथिलाराजपुत्री सीता का अंग भूषित किया था। और आपनेही निर्दय दुष्ट पापिष्ठ दूषण नाम राक्षस का वध कियाथा और पापरूप लंकापति रावणका विध्वंस कियाथा, हे भगवान्! आपका नाम धन्य है ॥ ६ ॥

अभिनवजलधरसुन्दर धृतमंदरए॥ श्रीमुखचंद्रच कोर जय जय देव हरे ॥ ७ ॥

सं०टी०अभिनवेति। अभिनवजलधरसुंदर हे सजलमेघकांते धृतमंदर धृतमंदराचल । श्रीमुखचंद्रचकोर लक्ष्मीमुखमेव चंद्रस्तत्र चकोर इव ॥ ७ ॥

भा०टी०हेभगवान्! आपका रूप नवीन मेघ के तुल्य है, और आपने गोवर्द्धन पर्वतको कनिष्ठा अङ्गुलीमें धारण करके व्रजपुरीकी रक्षा करी थी, और आप लक्ष्मीदेवी के मुखरूप चन्द्रमा के चकोर रूप है। हेभगवान्, आपका नाम धन्य है ॥ ७ ॥

तवचरणे प्रणतावयमितिभावयए॥ कुरु कुशलंप्र णतेषु जय जय देव हरे ॥ ८ ॥

सं०टी०तवेति। एवंभूत हेहरे जयजयेति । तव चरणे वयं प्रणताः अतीव नम्रा इति भावय जानीहि । प्रणतेषु मादृशेषु कुशलं कल्याणं कुरु ॥ ८ ॥

भा०टी०हेभगवान्! हमलोक आपके चरणारविंदोंमें नम्रता पूर्वक अहोरात्र

आम्नाय-ग्रन्थालय, ...
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रणाम करते हैं, और आप हम लोगोंके मङ्गल करने वाले है। हेभगवान्! दीनदयाल आपका नाम धन्य है ॥ ८ ॥

श्रीजयदेवकवेरिदं कुरुतेमुदम् ॥ मंगलमुज्ज्वलगीतं जय जय देव हरे ॥ ९ ॥

इति श्रीगीतगोविंदेद्वितीयप्रबंधः ॥ २॥

सं०टी०श्रीजयदेवेति। हेदेव हेहरे जयजयेति प्रार्थयते श्रीजयदेवकवेःइदं उदितं मंगलं गीतविशेषः मुदं हर्षं कुरुते शृण्वतां भक्तानामितिशेषः । कथंभूतं इदं मंगलं उज्ज्वलं गीतं तदनुगमने रम्यं गीतं गानं यस्मिन् ॥ ९ ॥

भा०टी०श्रीमान् जयदेव स्वामी कृत वहि गीत माला सकलसंसारी लोगों के मङ्गल देनेवाली है ॥ ९ ॥

अधुना कविः कामोद्दीपकत्वात् वसंतस्य व्याजेन कृष्णक्रीडां वक्तुं भक्तान् प्रति आशिषं ब्रुते—

पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितमुरोमधुसूदनस्य ॥ व्यक्तानुरागमिवखेलदनंगखेदस्वेदाम्बुपूरमनुपूरयतु प्रियंवः ॥ १ ॥

सं०टी०पद्मेति। मधुसूदनस्य उरो वक्षःस्थलं वः युष्माकं प्रियमभीष्टमनुपूरयतु संपूर्णं करोतु। कथंभूतं मधुसूदनस्य उरः पद्मेति पद्मायाः लक्ष्म्याः पयोधरतटीस्तनपरिसरस्तस्य परिरंभणेन आलिंगनेन लग्नं यत्काश्मीरं कुंकुमं केशरं तेन मुद्रितं चिन्हितं। ममैवेदं वक्षःस्थलं नान्यस्य इतिभावः । पुनः कथंभूतमिव व्यक्तानुरागमिव । पुनःकथंभूतं उरः खेलदिति खेलन् खेलनगतिं कुर्वन् योऽनंगस्तस्य खेदेन सुरतायासेन स्वेदांबुपूरो घर्मजलप्रवाहो यत्र ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०शृङ्गारके समयमें राधाजीके स्तन युगल के अग्रभाग में जो केशर लगाहुआथा, उससे श्रीकृष्णचंद्रजीका हृदय स्थान लिप्त हो गया, और केशरकी शोभावाला महाराजजीका हृदय तुम लोगोको मङ्गल करे ॥ १ ॥

अधुना विरहोत्कंठितायाः राधायाः काचित्सखी कृष्णवार्तां वक्तुमाह-

वसंते वासन्तीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे बहुविहितकृष्णानुसरणाम् ॥ अमन्दंकन्दर्पज्वरजनिताचिंताकुलतया चलद्बाधां राधांसरसमिदमूचे सहचरी ॥२॥

सं०टी०वसंत इति । वसंतकाले काचित्सहचरी सखी सरसं सविलासं इदं वक्ष्यमाणं राधां प्रत्यूचे अवदत् । कथंभूतां राधां वासंतीकुसुमसुकुमारैर्माधवीपुष्पकोमलैरवयवैरंगैरुपलक्षितां । उपलक्षणे तृतीया । कथंभूतां राधां कांतारे दुर्गमे वर्त्मनि भ्रमंतीं । पुनः कथंभूतां बहुविहितं वारंवारं दूतीद्वारेण कृतं कृष्णानुसरणं कृष्णानुसंधानं यया । पुनः कथंभूतां अमंदं अत्युत्कंठं यथा स्यात्तथा कंदर्पज्वरेण जनिता उत्पादिता या चिंता तत्कृता याआकुलता तया कृत्वा चलंती उद्गच्छंती बाधा पीडा यस्याः तां ॥ २ ॥

भा०टी०वसन्त ऋतुमें राधाजी कामदेव के अति उग्र बाणसे पीडित होकर कृष्ण चंद्रजीके मिलने के कारण धूपसे क्लेशित होकर फूलोंसे परिपूरण खिलने वाले वनके मध्यमें भ्रमण करती भई, तब राधाजी की प्रिय सहचरीने उदासीन राधाजीको देखकर कथन करने लगी ॥ २ ॥

पूर्वोक्तमर्थं गीतेनाह-

अथ तृतीयप्रबंधो वसंतरागेणरूपकताले गीयते

ललितलवंगलतापरिशीलनकोमलमलयसमीरे ॥
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥१॥ विहरति हरिरिह सरसवसंते ॥ नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरंते ॥ ध्रुव०॥

सं०टी०ललितेति । एतस्य प्रबंधस्य वसंतरागः रूपकतालः तल्लक्षणं "शिखंडबर्होच्चयबद्धचूडः पुष्पान्पिकं चूतलतांकुरेण ॥ भ्रमन्मुदावासमनंगमूर्तिर्मत्तो मतंगस्य वसंतराग इति" हे सखि हरिः इह सरसः वसंते विहरति युवतिजनेन समं नृत्यति चेति ध्रुवगतपदेनान्वयः । हे राधे हरिः कृष्णः इह अस्मिन् मनोहरवसंतसमये क्रीडति युवतिजनेन समं कामिनीसमूहेन सह नर्तनं करोति च । कुत्र स्थले इत्यपेक्षायां सप्तमपद्यस्थितवृंदावनविपिनशब्देनान्वयः । कीदृशे विरहिजनस्य दुरंते दुःखेनापि गंतुमशक्ये इति वसंतवृंदावनयोर्विशेषणं । कीदृशे वसंतसमये ललितेत्यादिसप्तपदीपदानि वसंतसमयविशेषणानि ललितायाः मनोहरायाः लवंगलतायाः लवंगशाखायाः परिशीलनेन संपर्केण कोमलो गंधो मनोहरः मलयसमीरो मलयानिलो यत्र । अनेन वायोः सुगंधत्वेन शीतत्वादीन्युक्तानि । मधुकरेति मधुकरनिकरेण भ्रमरसमूहेन करंबितैर्मिश्रितैः कोकिलैः कूजितः शब्दितः कुंज एव लतागृहमेव कुटीरोऽल्पाकुटी यत्र ॥ १ ॥

भा०टी० हे सखि ! मलय पवन लवंगकी पत्तोकरके निकुञ्जवनको आलिंगितं कररहाहै; और वह पवन क्या सुंदर यमुनाके शीतल स्निग्ध नीरसे मिलकर मन्द मन्द वहरहा है। और मधुमक्षिका और कोकिलादिक जीव अपनी अपनी ध्वनिसे सकल काननोंको आनंद देरहे हैं। और आप हि हरि नारायण वसंतसमे में नारी गण सहित निकुञ्जमें अति सुंदर नृत्य करते हैं, हे सखि ! वसन्त काल विरहिजनोंको सततदुःखदाता होता है ॥ ३ ॥

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ॥ अलिकुलसंकुलसुमनससमूहनिराकुलबकुलकलापे ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०उन्मदेति । उद्गतौ मदमदनौ हर्षकामौ यत्र एवंभूतो मनोरथो यस्य एवंभूतो यः पथिकवधूजनः पांथस्त्रीजनस्तेनोत्पादितो विलापः परिदेवनं यत्र । अलिकुलेति अलिकुलैः भ्रमरसमूहैः संकुलो व्याप्तः कुसुमसमूहस्तेन निराकुलो निःशेषेण आकुलः बकुलानां वृक्षाणां कलापः समूहो यत्र ॥ २ ॥

भा०टी०वसन्त कालके आनेसे सकल संसार मे आनन्द होताहै, जो नारायण वहि संसार सृष्टि को किया करते हैं, और सब जीवों के हृदय कमलमें सुख दुःखके देनेवाले हैं, और वहहि नारायण वसन्त कालको विरही जनोंके कारण दुर्जन भी गहगया है और पतिविरहे पथिकवधू मदनसे उन्मत्त होके विलाप किया करती है, और बकुलके फूल पर भ्रमर बैठताहै, इसलिये पुष्प बहुताहि पीडित होजाता है, एतादृशजानो ॥ २ ॥

मृगमदसौरभरभसवशंवदनवदलमालतमाले ॥ युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ३

सं०टी०मृगमदेति । मृगमदस्य कस्तूरिकायाः सौरभरभसवशंवदा सुरभितोत्साहस्यायत्तवादिनी नवा नूतना दलमाला पत्रपंक्तिर्येषां ईदृशास्तमाला यत्र नूतनपत्रस्तमालो मृगमदगंधमनुकरोतीति । युवजनेति युवजनानां तरुणजनानां हृदयं विदारयति एवंविधो यो मनसिजः कंदर्पस्तस्य यानि नखानि तद्वत् रुचिर्दीप्तिर्येषां एवंभूतानां किंशुकानां पलाशपुष्पाणां जालं समूहो यत्र ॥ ३ ॥

भा०टी०तमाल वृक्षोंके फूलों कि कस्तूरी सदृश सुगन्धसे निकुञ्जवन परि पूरण आनन्द होरहाहै, और निकुञ्जवन चारो औरमें पलाशके पुष्पोंसे सुवरण सदृशहोरहा है, वह दर्शन करनेसे प्रतीत है, मदनविरही लोगोके हृदय विदारणकेलिये जानो वसन्त अपने नखोंकोहि विस्तारित कररहाहै ॥ ३ ॥

मदनमहीपतिकनकदंडरुचिकेसरकुसुमविकाशे ॥

आम्नाय-ग्रन्थालय, वाराणसी, ...
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ४

सं०टी०मदनेति। मदनमहीपतेः कामनृपस्य कनकदंडछत्रं तद्वत् रुचिर्यस्य एवंभूतः केसरकुसमविकाशो नागकेशरपुष्पप्राचुर्यं यत्र। मिलितेति मिलिताः शिलीमुखाः भ्रमराः येषु तैः पाटलिपटलैः पाटलपुष्पसमूहैः कृतः स्मरतूणविलासः कामतूणीरचेष्टितं यस्मिन् तस्मिन् ॥ ४ ॥

भा०टी०कहीं कहीं स्थानोंमें सुंदर नागकेशर पुष्प खिलरहे है, और उनके देखने से प्रतीत होता है जो क्षितिनाथ कामदेवको सिरपर मानो सुवर्ण का छत्रहि धारण किया हुआहै; और कोई कोई स्थानोंमें सुंदर पाटलीके फूल फुलरहे है, और उनके ऊपर भ्रमर बैठे है और गुञ्जार शब्दकी शोभा होरही है। उनको देखके मदनका तूण बोलके प्रतीत होताहै ॥ ४ ॥

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे ॥
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे ५

सं०टी० विगलितेति। विगलितस्य शिथिलावयवस्य अतएव लज्जितस्य जगतः अवलोकनेन दर्शनेन तरुणकरुणैः तरुणकरुणवृक्षैः पुष्पविकाशव्याजेन कृतो हासो हास्यं यत्र विरहीति विरहिनिकृंतनानि वियोगिमारकानि कुंतमुखाकृतीनि भल्लमुखाकाराणि यानि केतकीपुष्पाणि तैर्दंतुरिता व्याप्ता आशा दिशो यस्मिन् तस्मिन् ॥५॥

भा०टी०हेसखि! वसन्तको देखके सकल जगत विलज्जित होगयाहै; इस देखने से सर्व नवीन कुसुम फुलनछलसे हांसीकररहेहै। आप देखिये संपूर्ण केतकी के पुष्प वल्लभ सदृश होकर विरहि जनोंके हृदयको वेधित करते हैं ॥ ५ ॥

माधविकापरिमलललिते नवमालतिजातिसुगन्धौ ॥
मुनिमनसामपिमोहनकारिणितरुणाकारणबन्धौ६॥

सं०टी०माधविकेति। माधविकायाः वासंतीलतायाः परिमलेन गंधे-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न ललिते मनोहरे नवमालिकानि मालतीपुष्पाणि जातिः जातिपुष्पाणि ताभ्यां सुगंधौ मुनिमनसामपि ऋषिचित्तानामपि मोहनकारिणि मदनजनके तरुणानां यूनां अकारणबंधौ सहजमित्रे ॥ ६ ॥

भा०टी०वसन्तकाल माधवी और नव मालिका कुसुमके सुगन्धसे ललितहै; हायरे हाय ! इसमें जितेन्द्रियसत्यवादि सन्तजन भी मोहित होजातेहै। वह का काल युवक युवतीयों को मिथ्या बन्धुहै ॥ ६ ॥

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते॥
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥ ७ ॥

सं०टी०स्फुरदिति । वृंदावनविपिने हरिः क्रीडतीत्यन्वयः । स्फुरंत्याश्चलंत्याः अतिमुक्तलतायाः परिरंभणेन आलिंगनेन मुकुलितः पुष्पितः पुलकितः हृष्ट आम्रवृक्षो यत्र । कथंभूते वृंदावनविपिने परिसरेति परिसरे पर्यंतभुवि परिगतं प्राप्तं यत् यमुनाजलं तेन पूते पवित्रे ॥ ७ ॥

भा०टी०आम्रवृक्ष माधवींसे आलिंगित होकर आनन्द और मुकुलसे पूर्णहै, यहि सर्व दर्शन करके ऐसा प्रतीत होताहै जो रतीनाथ यमुनाजीमें स्नान कर शुद्ध निर्मल होके सुंदर वनमें प्रविष्ट होगयाहै ॥ ७ ॥

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम्
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ८।

इति श्रीगीतगोविंदे तृतीयःप्रबंधः ॥ ३ ॥

सं०टी०श्रीजयदेवेति । श्रीजयदेवकवेरिदंभणितं उदयतु उदयं प्राप्नोतु इत्यर्थः । हरिचरणयोः स्मृतिः स्मरणं सारो मुख्यो यत्र । सरसं सुमनोहरं वसंतसमयसंबंधिनो वनस्य वर्णनं यत्र अनुगतः अनुकृतः मदनविकारः कामविलासो यस्मिन् ॥ ८ ॥

भा०टी०श्रीमान् जयदेव स्वामी हरिचरण अवलम्बनकरके वसन्तसमें वृ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्दावन के निकुञ्ज को वरणन करताहै और वसन्त समे गोपीगणोंके हृदय में जो विरह पीडा हुआथा; सोभी वरणन करताहै; ॥ ८ ॥

वियोगिनां दुःसहं वंसतवायुं वर्णयति—

दरविगलितमल्लीवल्लिचञ्चत्परागप्रकटितपटवासैर्वासयन्कानननानि॥इहहिदहतिचेतः केतकीगन्धबन्धुः प्रसरदसमबाणप्राणवद्गन्धवाहः॥ १ ॥

सं०टी०दरेति। इह वसंते गंधवाहो वायुः विरहिणां चेतः दहतीत्यन्वयः। अर्थात् किंकुर्वन् दरविगलितायाः ईषद्विकासितायाः मल्ल्याः माल्लिकायाः वल्लीषु लतासु चंचद्भिरुद्गच्छद्भिः परागैः पुष्परजोभिः प्रकटितपटवासैः स्फुटीकृतपटवासचूर्णैः काननानि वनानि वासयन् सुरभीकुर्वन्। पुनः कथंभूतः केतकीपुष्पाणां गंधस्य बंधुर्मित्रं प्रसरंतो ये असमबाणाः कामबाणास्तेषां प्राणवत् प्राण इव ॥ १ ॥

भा०टी०सखि!देखो आज मलय पवन आई विकासित माल्लिका फूलके परागसे कानन के पल्लव वसन को सुवासित कियाहै, और केतकि फूलको सुगन्धित पवन के साथ मिलके विरहि लोगोंके हृदयको दग्धकरता है ॥ १ ॥

अद्योत्संगवसद्भुजंगकवलक्लेशादिवेशाचलंप्रालेयप्लवनेच्छयाऽनुसरतिश्रीखंडशैलानिलः॥ किंच स्निग्धरसालमौलिमुकुलान्यालोक्यहर्षोदयादुन्मीलंति कुहूःकुहूरिति कलोत्तालाः पिकानां गिरः॥२॥

सं०टी० अद्येति। राधे अद्य इदानीं वसंतसमये श्रीखंडशैलानिलः मलयजपवनः उत्संगे क्रोडे वसंतो ये भुजंगाः सर्प्पास्तेषां कवलक्लेशादिव ग्रासोपतापादिव ईशाचलं हिमाचलं प्रालेयप्लवनेच्छया तुहिनमज्जनेच्छयानुसरति अनुगच्छति किंच पक्षांतरे पि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कानां गिरो वाण्यः स्निग्धरसालमौलिमुकुलानि कोमलचूतस्तवक-कुड्मलानि आलोक्य दृष्ट्वा हर्षोदयात् आनंदोदयात् उन्मीलंति उद्गच्छंति । कथंभूता गिरः कुहूः कुहूरिति कलोत्तालाः कुहूःकुहूरि-त्याकारेणाऽव्यक्तमधुरशब्देनोत्तालाः प्रत्ताशाः ॥ २ ॥

भा०टी०हेसखि ! मलय पर्व्वत का पवन सकलजीवों को आनन्दकारीहै; किंतु वह पवन विरहिलोगोंको दुःखदेनेवालीहै. इससे ऐसा प्रतीतहोताहै; जो वह पवन मलयपर्वत के चन्दन वृक्षोंके खोकरामें जो सर्प वासकरतेहैं और उनके श्वासों के साथ मिलनेसे विष सदृशहै; और वहही पवन शीतल होनेके लिये हिमालय पर्वतराजकि ओर जाता है, और रसाल आम्र वृक्षोंके मुकुलके निरीक्षण करके कोकिल आनन्दको प्राप्तहोकर अपने मधुर ध्वनीसे काननको शब्दायमान आनन्दित करदेतीहै ॥ २ ॥

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ॥ नीयन्ते पथिकैः कथंकथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमीवासराः ॥ ३ ॥

सं०टी०उन्मीलदिति । अमी वसंतसंबंधिनो वासराः दिवसाः पथिकैर्मार्गस्थैर्विरहिभिः कथं कथमपि अत्यंतं दुःखेन नीयंते उल्लंघ्यंते। कथंभूताः वासराः उन्मीलदिति उन्मीलंश्चासौ मधुगंधश्च पुष्परसगंधस्तत्र लुब्धा ये मधुपाः भ्रमरास्तैर्व्याधूताः कंपिताः ये चूतांकुराः आम्रांकुरास्तेषु क्रीडतां कोकिलानां काकलीकलकलैः सूक्ष्माव्यक्तमधुरध्वनिकोलाहलैः कष्टजनकत्वेन उद्गीर्णः प्रकाशितः कर्णज्वरः श्रवणोपतापो येषु । कथं नीयंत इत्यत आह ध्याने चिंतने अवधानं चित्तैकाग्र्यं तेन क्षणं अल्पकालं प्राप्ताया अनुभूतायाः प्राणसमयाः समागमरसेन संबंधस्वरूपरसेन उल्लासो येषांते ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०हेसखि ! आम्र मुकुल के गन्ध इतना विस्तार होताहै; मधुगन्ध लोभी मक्षिका तितनाहि उनको कम्पायमान करतीहै; और पवनसे आन्दोलित आम्र वृक्षोंके शिर पर बैठके कोकिला कुहूं कुहू शब्दसे विरहि-लोग पथिकों के कर्णोंमें अतिपीडा देतीहै, हाय रे हाय ! वे पथिक आज अपनी प्राणप्यारी स्त्रीकों चिन्तन करतेहैं; और चिंताके कारण किञ्चित् सुख-प्राप्त होकर पश्चात् अतिक्लेशसे दिन व्यतीत करतेहै ॥ ३ ॥

अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलास लालसम्॥मुरारिमाराद्रुपदर्शयंत्यसौ सखी समक्षं पुनराह राधिकाम् ॥ ४॥

सं०टी० अनेकेति । असौ सखी राधिकां पुनराह इत्यन्वयः। कथंभूता सखी आरात् दूरे वर्तमानं समक्षं यथा स्यात्तथा कृष्णं उपदर्शयंती विषयं कारयंती। कथंभूतं हरिं अनेकनारीणां परिरंभसंभ्रमेणालिंगनादरेण स्फुरन् इतस्ततो गच्छन् मनोहारी मनोज्ञो यो विलासः क्रीडा तत्र लालसं आदरवंतं ॥ ४ ॥

भा०टी०और बहुतर नारीयोंके साथ मिलाप करके कृष्णजी कौतुकमें था किन्तु अभी उनको राधाजीके साथ क्रीडा करणेकी इच्छाहुई देखके सर्व सखियों राधाजीकों बोलतीथीं ॥ ४ ॥

अमुमेवश्लोकोक्तमर्थं गीतेनाह-

अथ चतुर्थप्रबंधो रामकरिरागेण रूपकताले गीयते।

चंदनचर्चितनीलकलेवरपीतवसनवनमाली ॥ केलिचलन्मणिकुंडलमंडितगंडयुगस्मितशाली॥ १ ॥
हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे॥ध्रु०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०चंदनेति । रामकरिरागः तस्य लक्षणं " स्वर्णप्रभाभास्वरभूषणा च नीलं निचोलं स्वतनौ वहंती । कांतोपदोपांतमधिश्रितापि मानोन्नता रामकरिः प्रदिष्टा इति" । हे विलासिनि राधे इह मुग्धवधूनिकरे मनोहरकामिनीसमूहे हरिर्विलसति क्रीडतीत्यन्वयः । कथंभूते मुग्धवधूनिकरे केलिपरे क्रीडातत्परे। कथंभूतो हरिः चंदनेति चंदनेन मलयजेन चर्चितं रेखाकारेणानुलिप्तं नीलं कलेवरं शरीरं यस्य पीतं सुवर्णवर्णं वसनं वस्त्रं यस्य वनमाला यस्यास्तीति ततः प्रत्येकं कर्मधारयः । पुनः कथंभूतः केल्या क्रीडया चलती ये मणियुक्ते कुंडले ताभ्यां मंडितं शोभितं गंडयुगं यस्य स्मितेन ईषद्धास्येन शालते शोभते ततः कर्मधारयः॥ १ ॥

भा०टी०अय कृष्णविलासिनि राधा!यहां हि वृन्दावन में कृष्णजी व्रजवालों के साथ क्रीडामें है कृष्णजीने शुभ्र चंदन अपने नील अंगों में लेपनकियाहै और पीताम्बरने उनअंगोंको शोभित किया कृष्णजीने अपने कण्ठ में सुन्दर; वनमालाको धारण करके शोभित कियाहै; और कृष्णचंद्रमहाराजजीके काम सकल क्रीडोंके कारण कपोल हांसी सहित चंचलतासे पूर्ण हुआ करतेहै और उनके कुण्डल अभीआन्दोलित होनेसे बडी सुंदरशोभायमान धारण कियाहै १

पीनपयोधरभारभरेणहरिं परिरभ्यसरागम् ॥ गोपवधूरनुगायतिकाचिदुदंचितपंचमरागम् ॥ २ ॥

सं०टी० पीनेति । हे राधे काचित् गोपवधूः गोपांगना पीनपयोधरभारभरेण विपुलकुचगौरवातिशयेन सरागं यथा तथा परिरभ्य आलिंग्य हरिं अनुपश्चादूर्ध्वकृतं पंचमरागं गायति गानंकरोति॥२॥

भा०टी०कोई कोई उन्नतस्तनी ग्वालोंकी वधू प्रेमसें उन्मत्त होकर कृष्णजीको आलिंगन करके पञ्चम रागमें गीत गातीहै ॥ २ ॥

कापि विलासविलोलविलोचनखेलन जनितमनोजम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्यायतिमुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥ ३ ॥

सं०टी० कापीति । काचिन्मुग्धवधूर्मनोहरगोपांगना अधिकमतिशयेन मधुसूदनवदनसरोजं कृष्णस्य मुखांबुजं ध्यायति चिंतयति । विलासेन विलोलयोर्विलोचनयोः लेखनेन संचारेण जनित उत्पादितो मनोजः कामो येन तत् ॥ ३ ॥

भा०टी०कोई कोई गोप कामिनीने कृष्णजीके भ्रूभंगीसे मोहित होकर उनके मदनविकासितमुखकमलको भ्रमरके सदृश चुम्बन करके बहुतही आनन्दमें प्राप्त होतीभई ॥ ३ ॥

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले॥
चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले ॥ ४ ॥

सं०टी० कापि कपोलेति । कापि नितंबवती गोपांगना दयितं कृष्णं कपोलतले गंडदेशे चारु मनोज्ञं यथा स्यात्तथा चुचुंब चुंबितवती । कथंभूता किमपि कार्यं लपितुं वक्तुं श्रुतिमूले कर्णप्रदेशे मिलिता संलग्ना । कीदृशे कपोलतले पुलकैः रोमोद्गमैः अनुकूले प्रेमप्रियकथने ॥ ४ ॥

भा०टी०और किसी किसी गोपाङ्गनाने गुप्तकहनेका छल करके अपने वदनको कृष्ण चंद्रके करणके समीप लेजाती भई, और उसी समयमें चातुरीसे कृष्णजी के मुखरूपी कमलको आनन्दसे चुम्बन किया ॥ ४ ॥

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ॥
मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले ॥५॥

सं०टी०केलीति । काचिद्गोपी केलिकलाकुतुकेन शृंगाररसक्रीडातात्पर्येण हेतुना करेण हस्तेनामुं कृष्णं दुकूलेवस्त्रे विचकर्ष आकृष्टवती । कथंभूतं अमुं यमुनाजलकूले यमुनाजलोपलक्षिते कूले तीरे मंजुलो मनोहरो यो वंजुलकुंजो वेतसलतागृहं तत्र गतं वर्तमानम् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा० टी० कोई कोई गोपरमणीने प्रेमसे उन्मत्तहोकर जमुनाजी के तटके वैतस वनमें कृष्णजीका जो पीताम्बर लग्नहुवाथा उसको चुम्बनकिया॥ ५ ॥

करतलतालतरलवलयावलिकलितकलस्वनवंशे ॥
रासरसे सह नृत्यपरा हरिणा युवतिः प्रशशंसे ॥६॥

सं० टी० करतलेति । काचित् युवतिः गोपांगना हरिणा कृष्णेनप्रशशंसे स्तुता रासरसे गोपीक्रीडानुरागे सहनृत्यपरा कृष्णसमकालं नृत्यंती । कथंभूते रासरसे करतलयोर्हस्तयोस्तालेन चपेटध्वनिना तरलया चंचलया वलयावल्या कंकणपंक्त्या कलितः मिश्रितः कलस्वनवंशोऽव्यक्तमधुरशब्दसहितो वंशो वेणुर्यत्र ॥६॥

भा० टी० कोई रमणीका करतालिकाके साथ उनके कंगनकी ध्वनि मिलताहै; यहि ध्वनियोंको श्रवण करके कृष्णजीने वही रमणीकी बहुतहि प्रशंसा कियाहै ॥ ६ ॥

श्लिष्यति कामपि चुंबति कामपि रमयति कामपि रामां ॥ पश्यति सस्मितचारु परामपरामनुगच्छति वामां ॥७ ॥

सं० टी० श्लिष्यतीति । हे राधे श्रीकृष्णः कामपि गोपिकां श्लिष्यति आलिंगति तथा कामपि चुंबति तथा कामपि रामां रमयति क्रीडयति अपरां नायिकां स्मितचारु हासमनोहरं यथा स्यात्तथा पश्यति अपरां वामां सुंदरीमनुगच्छतीत्यर्थः ॥ ७ ॥

भा० टी० कृष्णचन्द्रमहाराजजीने कोई रमणीको आलिंगनसे, और किसीको चुम्बनसे किसीके साथ क्रीडाकरके सब गोपांगनाको प्रसन्नकियाहै। कृष्ण जी किसीरमणीके हास्यमुखदर्शन करके आनंदकरताहै, और कोईके अतिनम्रभाव प्रदर्शन करताहै ॥ ७ ॥

आम्नाय-ग्रन्थालय, ... वाराणसी-5

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यं ॥ वृंदा
वनविपिने ललितं वितनोतुशुभानि यशस्यं ॥८॥
इति श्रीगीतगोविंदे चतुर्थप्रबंधः ॥४॥

सं॰टी॰ श्रीजयदेवेति । श्रीजयदेवकवेरिदं गीतं शुभानि कल्याणानि वितनोतु । अर्थात् भक्तानां गीतं कीदृशं अद्भुतं आश्चर्यकरं केशवस्य कृष्णस्य केलिरहस्यं क्रीडाहर्षौ यत्र अद्भुतत्वं युगपत्सर्वासां प्रीत्युत्पादनात् वृंदावनविपिने वृंदावननाम्नि वने ललितं नानारसान्वितमित्यर्थः । यशस्यं यशसे हितं यशस्करमित्यर्थः ॥ ८ ॥

भा॰टी॰श्रीजयदेवस्वामी विरचित भगवानजीका वहीवृन्दावन क्रीडा को विवरण सर्वत्र विस्तार है ॥ ८ ॥

श्लोकः ॥ विश्वेषामनुरंजनेन जनयन्नानंदमिंदीव
रश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं ॥
स्वच्छंदं व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितःशृं
गारःसखिमूर्तिमानिव मधौ मुग्धो हरिः क्रीडति॥१॥

सं॰टी॰ विश्वेषामिति । हेसखि राधे मधौ वसंते मुग्धो मनोहरो हरिः कृष्णः क्रीडतीत्यन्वयः। क इव मूर्त्तिमान् शरीरधारी शृंगाररस इवकिंकुर्वन् अनुरंजनेन अनुरागेण विश्वेषां सर्वेषां भक्तानां आनंदं संतोषं जनयन् । पुनः किंकुर्वन् इंदीवरश्रेणीनामिव नीलकमलपंक्तीनामिव श्यामलकोमलैः कृष्णमनोहरैरंगैरवयवैः अनंगोत्सवंकामहर्षं उपनयन् उत्पादयन्। पुनःकथंभूतःस्वच्छंदं स्वेच्छया व्रजसुंदरीभिः गोपीभिः अभितः सर्वतो भावेन प्रत्यंगं प्रत्यवयवं आलिंगितः गोपीभिरालिंगने यया यदंगं प्राप्तं तया तदेवालिंगितमितिभावः। "श्यामो भवति शृंगारः सितो हासः प्रकीर्तितः" इति शृंगारविशेषणान्यप्येतानिपदानि ॥ १॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी० व्रजकामिनीयोंके आलिंगनसें भगवान् आपही शृङ्गार रस स्वरूप होगयाहै, और वसंतकालमें सर्वत्रव्रजनारीयोंकी वाञ्छाको पूर्णकरताहै भगवानके नीलवदनमें कामभोग अनुभवकरके सकल व्रजनारीयां क्रीडा कौतुकमें मगनहोगईहै ! ॥ १ ॥

कविः कथोपक्रमंत्यक्त्वा लोकानाशिषयति--

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवामभ्यर्णे परिरभ्य निर्भरमुरःप्रेमांधया राधया ॥ साधुत्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिव्याजादुद्भटचुंबितः स्मितमनोहारी हरिः पातु वः ॥ २ ॥

सं०टी० रासोल्लासेति । हरिः कृष्णः वः युष्मान् पातु इत्यन्वयः । कथंभूतो हरिः रासोल्लासभरेण गोपीक्रीडायां हर्षातिशयेन विभ्रमभृतां शृंगारविलासधारिणीनां आभीरवामभ्रुवां गोपिकानां अभ्यर्णे समीपं निर्भरं गाढं यथा तथा उरः वक्षःस्थलं परिरभ्य आलिंग्य राधया उद्भटं प्रकटं यथा स्यात्तथा गीतस्तुतिव्याजात् गानप्रशंसाच्छलेन चुंबितः । ननु भवतु तासु विभ्रमः प्रत्यक्षं युवतिगणं पश्यंत्या तया कथं चुंबितस्तत्राह प्रेमांधया प्रेम्णा हर्षातिशयेनांधया कृष्णं विनान्यं न पश्यतीति तया । किं कृत्वा त्वद्वदनंत्वन्मुखं सुधामयममृतमयं साधु शोभनं इति व्याहृत्य उक्त्वा । कथंभूतो हरिः स्मितमनोहारी राधायाः चुंबनकौशलं दृष्ट्वा स्मितेन ईषद्धास्येन मनो हर्तुं शीलं यस्य सः ॥ २ ॥

भा०टी० राधाजीने प्रेमसेव्याकुलान्ध होंके सकल गोपाङ्गनाके सन्मुखमें भगवान्जी को आलिङ्गन प्रदान किया और उनको कहा कि हे भगवान् आपका मुख कमल अमृत पूर्णहै; यही कथन करके राधाजीने उनका वदन चुम्बनकियाहै; भगवानजीका यही मुखकमल सर्वजीवोंको मङ्गलकरे ॥ २ ॥

इति श्रीकविराजश्रीजयदेवकृते गीतगोविंदे महाकाव्ये सामोददामोदरोनामसटीकः प्रथमः सर्गः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वितीयसर्गः प्रारभ्यते ।

विहरति वने राधासाधारणप्रणये हरौ विगलित निजोत्कर्षादीर्ष्यावशेन गतान्यतः ॥ क्वचिदपि लताकुंजे गुंजन्मधुव्रतमंडलीमुखरशिखरेलीना दीनाप्युवाचरहः सखीं ॥ १ ॥

सं०टी० विहरतीति । राधा रहः एकांते सखीं उवाच । कथंभूता राधा वने वृंदावने हरौ कृष्णे विहरति क्रीडति सति विगलितनिजोत्कर्षात् गतनिजभाग्यात् ईर्ष्यावशेन असहिष्णुतया अन्यतोऽन्यस्मिन् स्थले गता । कथंभूते हरौ साधारणप्रणये अन्यगोपीतुल्यप्रेम्णि । अतएव क्वचिदपि लताकुंजे लतागृहे लीना गुप्ता । कथंभूते कुंजे गुंजतां गंभीरशब्दं कुर्वताम् मधुव्रतानां भ्रमराणां मंडल्या समूहेन मुखरशिखरे शब्दायमानाग्रभागे अतएव दीनापि दुःखितापि ॥ १ ॥

भा०टी०भगवान् प्रेमसे उन्मत्तहोकर और और स्त्रीयोंके साथ क्रीडा कौतुकमें है, यह देखकर प्यारीजिने अपने हृदयमें हीरसकियां और मधुपानमत्त भ्रमर सेवित लतागृहके पश्चात् गुप्तहोकर अपनीसखीको वडा खेदकरके कहनेलगी ॥ १ ॥

श्लोकोक्तमर्थं गीतेनाह—

अथपंचमप्रबंधोगुर्जरीरागेणरूपकताले गीयते

संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं ॥ चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं ॥ १ ॥

रासे हरिमिह विहितविलासं ॥ स्मरतिमनो ममकृतपरिहासम् ॥ध्रु०॥

सं०टी० संचरदिति । हेसखि मम मनः हरिं स्मरति गोचरं करोति सर्वानुभूतविषयत्वात् । कथंभूतं हरिं संचरता उद्गच्छता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधरसुधामधुरेण अधरामृतमनोहरेण ध्वनिना शब्देन मुखरितः शब्दितो मोहननामा वंशो येन । पुनः कीदृशं चलितेति चलितः आवर्जितः दृगंचलः कटाक्षो येन चंचलः दोलायमानो मौलिः शेखरो यस्य कपोलयोर्गंडस्थलयोर्विलोलौ चंचलौ वतंसौ कर्णाभरणे यस्य तं ततः प्रत्येकं कर्मधारयः। पुनःकीदृशं इह रासे गोपीक्रीडायां विहितः कृतः विलासः क्रीडा येन तम् । मया सह कृतः परिहासः नर्म येन तम् ॥ १ ॥

भा०टी०हेसखि! जोहरिने अपनीवंशी की ध्वनिसे सकललोगों को विह्वल विचेतनकियाहै, और वंशीवादनके समयमें चारों ओर दृष्टि करने से जो हरिकेशिरका भूषण एवं कानोंके कुण्डल चलितहोतेहैं, यह हरिके रास केलि अन्यतद्उपहास उनके मेरे मनविषे सतत प्रकटहोतेहै और मेरे मन. मे यह प्रतीतहोताहै जो माधवजी मेरे सन्मुखमेंही अपनी मोहिनीवंशीकी ध्वनिसे गायन कररहेहै ॥ १ ॥

चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं ॥ प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं ॥ २ ॥

सं०टी० चंद्रकेति । चंद्रकेण विचित्रवर्णचिन्हेन चारूणां मयूरशिखंडकानां मयूरपिच्छानां मंडलेन समूहेन वलयिताःवलयाकारेण वेष्टिताः केशाः येन अत एव प्रचुरेण विस्तीर्णेन पुरंदरधनुषा अनुरंजितश्चित्रितो मेदुरोनिबिडस्निग्धो योमुदिरो मेघस्तद्वत्सुवेशं सुंदरम् ॥ २ ॥

भा०टी०हरिजीके शिरके सकल केश कंकनके समान गुंढीहोकर मयूर पुच्छके सदृश शोभायमानहोरहेहै, और उनकी कान्ति इन्द्रधनुषसे शोभित मेघोंके तुल्यहै ॥ २ ॥

गोपकदंबनितंबवतीमुखचुंबनलंभितलोभं ॥ बंधुजीवमधुराधरपल्लवमुल्लसितस्मितशोभं ॥ ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी० गोपेति। गोपकदंबस्य गोपसमूहस्य नितंबवतीनां स्त्रीणां मुखचुंबनेन लंभितः लोभो येन। पुनः कीदृशं बंधुजीवपुष्पवन्मधुरो मनोहरोऽधरपल्लवः ओष्ठपल्लवो यस्य। पुनः कीदृशं उल्लसितेन विकासितेन स्मितेन शोभा यस्य तम् ॥ ३ ॥

भा०टी०जो हरिजीने नितम्बवती गोपबालाओंके मुखकमलोंको चुम्बन करनेकोलिये लोभ कियाहै और जिसहरिके बन्धुजीवपुष्पतुल्य अधरमें हांसी विराजमानहै, उसहरिकी मूर्त्ति मेरे हृदयमे निरन्तर प्रकट होतीहै ॥ ३ ॥

विपुलपुलकभुजपल्लववलयितबल्लवयुवतिसहस्रं ॥ करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रं ४

सं० टी० विपुलेति। विपुलाः बहुलाः पुलका रोमोद्गमा ययोस्ताभ्यां भुजपल्लवाभ्यां वलयितं वेष्टितं बल्लवानां आभीराणां युवतिसहस्रं गोपिकावृंदं येन। पुनःकीदृशं करौ चरणौ उरश्च एषां समाहारः करचरणोरस्तस्मिन्वर्तमानानां मणिगणयुक्तभूषणानां किरणेन दीप्त्या विभिन्नं नाशितं तमिस्रमंधकारो येन सः तं ॥ ४ ॥

भा०टी०जो हरिने नवीन पल्लव स्वरूप अपने कोमलहस्तोंसे सहस्र सहस्र कामिनियोंके कण्ठको वेष्टनाकियाहै, और जिसहारिजीके हाथोपदोंके रत्नोसे समस्त तिमिरका नाशहोताहै; उसहरिकी मूर्त्ति मेरे मनविषे प्रकटहो रहीहै॥ ४॥

जलदपटलचलदिंदुविनिंदकचंदनतिलकललाटं ॥ पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् ॥ ५ ॥

सं० टी० जलदेति। पुनःकीदृशं हरिं जलदपटले मेघसमूहे चलतः इंदोश्चंद्रस्य विनिंदकं समानं चंदनातिलकं चंदनकृततिलकं यत्र तादृशं ललाटं यस्य। अभूतोपमेयं। क्वचिज्जलदपटलचलदिंदुविनिंदकचंदनबिंदुललाटमिति पाठः। तदा जलदपटले चलन्संचरन् य इंदुश्चंद्रस्तस्य विशेषेण निंदकस्तिरस्कारकः चंदनबिंदु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मंडलाकृतितिलको ललाटे यस्य तं। पुनः कीदृशं पीनौ मांसलौ यौ पयोधरौ स्तनौ तयोः परिसरस्य पर्यंतदेशस्य मर्दने निर्दयं दयारहितं हृदयकपाटं कपाटवद्विस्तीर्णं हृदयं यस्य तादृशम् ॥ ५ ॥

भा०टी०जिसहरिके सुंदर ललाट में चंदनका तिलक मेघस्थित चंद्रमाके तुल्य विराजमान होरहाहै; और पीनस्तन प्रान्त पीठनके हेतु जिसहरिका हृदय विकसितहोरहाहै, उसहरिकी मूर्ति मेरे हृदयमे प्रकट होतीहै ॥ ५ ॥

मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं ॥
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं ॥६॥

सं० टी० मणिमयेति । मणिमयेन मणिरूपेण मकरवन्मनोहराभ्यां कुंडलाभ्यां मंडितोऽलंकृतो गंडो गंडस्थलं यस्य । पुनः कीदृशं उदारं महांतं अभीष्टदातारं वा । पुनःकीदृशं पीतं वसनं वस्त्रं यस्य । महत्त्वमाह अनुगता आश्रिता ये मुनिवराः शुकनारदादयः मनुजाः परीक्षिदादयः सुरवरा ब्रह्मरुद्रादयः असुराः प्रह्लादादयस्ते परिवाराः परिजनाः यस्य तादृशं । द्वंद्वांते वरपदस्य प्रत्येकं संबंधात् तेषां वरा इति ग्रहणम् ॥ ६ ॥

भा०टी०जिसहरिके गण्ड देशमें सुंदर कुण्डल भूषण शोभायमान होरहे हैं, और जिस हरिके चरणकमलकी सेवा ऋषिगण, मनुष्यसमूह, देवतागण, और असुर संघ संपूर्ण निरंतर करतेहैं, और जिस हरिने सुंदर पीताम्बरसे अपने अद्भुत कोमल अंगोको शोभित कियाहै, उसहरिकी सुंदरमूर्त्ति मेरे हृदयकमलमें सतत प्रकाश होरहीहै ॥ ६ ॥

विशदकदंबतले मिलितं कलिकलुषभयं शमयंतं ॥
मामपि किमपि तरंगदनंगदृशा मनसा रमयंतं॥७॥

सं०टी० विशदेति । विशदकदंबतले मिलितं उपस्थितं । पुनः कीदृशं कलिकलुषात्कलिकालजातपापाद्भयं तन्नाशयंतं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनःकीदृशं मां अपि किमपि अनिर्वचनीयं यथा स्यात्तथा तरंगन् उद्गच्छन् अनंगयोगो यस्यां तादृश्या दृष्ट्या मनसा हृदयेन च रमयंतं ॥ ७ ॥

भा०टी०कदंब वृक्षोंके सुन्दर फूलों से शोभित गोपांगनाको देख कर जो हरिजी उसके नीचे जो गोपियां थी, उनके साथ विराजमान होरहे हैं; और जो भगवान्‌जीने मधुर वचनों से उन्के मनोमय दुःखको नष्ट किया; और जो हरि अपने नेत्रकमलों से और मनसे मेरे प्राण एवं हृदय को प्रसन्न करता है, उस हरिकी कोमल मूर्ति मेरे मन विषे प्रकट होरही है ॥ ७ ॥

श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं ॥
हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपं ॥८॥

इति श्रीगीतगोविंदे पंचमः प्रबंधः ॥ ५ ॥

सं०टी० श्रीजयदेवेति । श्रीजयदेवभणितं पुण्यवतां भक्तानां हरिचरणयोः स्मरणं प्रति अनुरूपं योग्यं भवतु इत्यध्याहारः । कथंभूतं अतिसुंदरं मोहनं मोहकारकं मधुरिपो रूपं कृष्णस्य रूपं यस्मिन् ॥ ८ ॥

भा० टी० श्रीजयदेवस्वामी विरचित हरिगुण गायन सकल भक्तजनोंके लिये शुभपूर्वक भक्तिके देनेवाला है; और भक्तजन सतत हरिके नाम एवं गुणानुवाद को स्मरण करते रहै ॥ ८ ॥

इदानीं राधायाः कृष्णे वसतश्चेतसो वश्यत्वमाह-

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च
परीतोषं दोषं विमुंचति दूरतः ॥ युवतिषु चलत्तृष्णे
कृष्णे विहारिणि मा विना पुनरपि मनो वामं कामं
करोति करोमि किं ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं० टी० गणयतीति हेसखि मम मनाश्चित्तं पुनरप्यधुनापि कृष्णे काममिच्छां करोति किं करोमि निवृत्तौ उपायांतरं नास्तीत्यर्थः। युवतिषु चलतृष्णे जाताभिलाषे। पुनः कीदृशे मां विना विहारिणि क्रीडाशीले। कीदृशं मनः वामं अवशमित्यर्थः। वामत्वे कारणमाह। मम मनः सापराधस्यापि कृष्णस्य गुणग्रामं गुणसमूहं गणयति भ्रमादपि भ्रामं विस्मरणं नेहते न चेष्टते भाममपीति पाठे भामं क्रोधं नेहते न वांछति तद्गुणाकर्णनेन परितोषं संतोषं वहति दोषं मदीयावज्ञादिकं दूरत एव मुंचति परित्यजति ॥ १ ॥

भा० टी० राधाजीके मुखारविंदसे इतना वचन श्रवण करके सकल सखियां राधाजीसे कथन करने लगी; कि हेराधा! कृष्णजी तुमको त्यागकर जवने और गोपियोंके साथ मिलकर क्रीडा व्यवहार करते है; तब तुम क्यों उनके ऊपर इतने आशक्तहो, यह वचन सखियोंका सुनकर राधाराणीजी उनसें कहने लगी, कि हे सखिजनो, मेरा मन तो कृष्णजीसे मिलगया है; चाहे कृष्णजी मुझको छोडकर और २ गोपियों के साथ क्रीडा किलोल व्यवहारमे उन्मत्त होवे, परंतु मेरा मन तो उनपर अति आशक्त है; और उनसे मिलगया है; इसलिये मे तो और जनोको नहीजानशक्तीहुं। हेप्यारि सखियों! मेरी क्यादशा होगी, दया करके मुझसे कहो! मेंने तो भूलकर भी उनके गुणोंको कभी कलंक नहि लगाया है, परंच और उनके ध्यान स्मरण करनेसे मेरा मन अतिप्रसन्न होता है॥ १

पुनरपि राधा गीतेन सखीमाह—

अथ षष्ठप्रबंधो मालवरागेण एकतालीताले गीयते.

निभृतनिकुंजगृहंगतया निशि रहसि निलीय वसंतं ॥ चकितविलोकितसकल दिशा रतिरभसभरे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ण हसंतं ॥ १ ॥ सखि हे केशिमथनमुदारं ॥ रमय मया सह मदनमनोरथभावितया सविकारं ॥ ध्रु० ॥

सं०टी० निभृतेति । हेसखि त्वं केशिमथनं कृष्णं मया सह रमय क्रीडां कारय । कीदृशं कृष्णं उदारं महांतं । कथंभूतया मया मदनस्य मनोरथः इच्छास्मिन् भावो रत्याख्यः संजातो यस्याः । कथंभूतं कृष्णं सविकारं भावसहितं । कीदृश्या मया निभृतं गूढं यन्निकुंजगृहं तत्र गतया प्राप्तया । कथंभूतं कृष्णं निशि रात्रौ रहसि एकांतस्थले निलीय तिरोहितो भूत्वा वसंतं तिष्ठंतं । कथंभूतया मया चकितं सभयं यथातथा विलोकिता दृष्टाः सकलदिशो यया । पुनः कथंभूतं कृष्णं रते रभस उत्साहस्तस्य भरेण आधिक्येन हसंतं सस्मितमुखं । अस्मिन् गीते पूर्वार्द्धे राधाविशेषणं उत्तरार्द्धे कृष्णस्येति बोद्धव्यं ॥ १ ॥

भा०टी० हेसखि ! जिस कृष्णचन्द्रजीने केशीनाम दैत्यको हनन कियाथा उसी श्रीकृष्णचन्द्रजीसें मेरा मिलाप करादी जिये, क्योंकि हम दोनोहि कामके वसीभूत होकर व्याकुल एवं उन्मत्त होरहेहैं । हेसखि ! मे भी निकुञ्जवनमें आगई हूं, और कृष्णजीके किलोलक्रीडा व्यवहार पर मेरा ध्यान निरंतर लगारहताहै; इसलीये कुञ्जकुटीर आज मुझको देखकर उपहासही कररहे है १

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं ॥ मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं ॥ २ ॥

सं०टी० प्रथमेति । प्रथमसमागमेन नूतनसान्निध्येन लज्जितया लज्जायुक्तया । कथंभूतं कृष्णं वैलक्ष्यदूरीकरणाय पटुचाटुशतानि कुशलानि यानि चाटुशतानि स्तवशतानि तैरनुकूलं आनुकूल्यकारकं । मृदु कोमलं मधुरं स्मितपूर्वकं भाषितं यस्याः सा तया । शिथिलीकृतं जघनदुकूलं जघनस्थितं पट्टवस्त्रं येन तं ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०हेसखि ! मे तो कृष्णमहाराजजीके मिलनेसे प्रथमहि लज्जावतीहो रहूंगी क्योंकि तव नन्दलालजी मेरी चित्त वृत्तिके प्रसन्न करनेके कारण बहुतसी विनती करेंगे; तव इससे मेरी लज्जा दूर हो जावेगी, और तब अंत्यकालमें कृष्णजी मेरे वस्त्रको स्थानभ्रष्ट वा शिथिल करदेवेंगे ॥ २ ॥

किसलयशयननिवेशितया चिरमुरसिममैव शयानं॥कृतपरिरंभणचुंबनया परिरभ्य कृताधरपानं ॥३॥

सं० टी० किसलयेति । किसलयशयने पल्लवकृतशय्यायां निवेशितया । कथंभूतं कृष्णं ममैवोरसि वक्षःस्थले चिरं शयानं कृतालिंगनमित्यर्थः । कथंभूतया मया कृतं परिरंभणपूर्वकं आलिंगनपूर्वकं चुंबनं यया सा तया । कथंभूतं कृष्णं परिरभ्य आलिंग्य कृतं अधरपानं ओष्ठपानं येन सःतं ॥ ३ ॥

भा०टी०मे तो कुञ्जकुटीर के अभ्यन्तर पल्लवशय्या मे सयन करूंगी, और तव सुन्दरश्यामजी मेरे साथ विराजमान होकर पंचशर ज्वालावृत्त कर परंच मेरे अधरामृत को पान कर के अति तृप्ती को प्राप्त होंगे ॥ ३ ॥

अलसनिमीलितलोचनया पुलकावलि ललितकपोलं। श्रमजलसिक्तकलेवरया वरमदनमदादतिलोलं ॥४॥

सं० टी० अलसेति । अलसेन सुरतसौख्येन निमीलिते मुद्रिते नेत्रे यस्याः सा तया । पुलकावल्या रोमांचपंक्त्या ललितौमनोहरौ कपोलौ यस्य तं । श्रमजलेन सुरतश्रमजनितेनवारिणा सिक्तं कलेवरं शरीरं यस्यास्तया । वरमदनमदात् उत्तमकामजनितहर्षात् अतिलोलं अतिचंचलं सतृष्णमित्यर्थः ॥ ४ ॥

भा०टी०इस काम भोग के समयमें मेरे दोनोहि नयन अर्द्धमुद्रित होरहेंगे, और उनको दोनोहि कपोल अति सुंदर मूर्त्ति को धारण करें गे; और मेरे वदन पर श्वेदसे आर्द्र देखकर कृष्णजी वारंवार मुझको निरीक्षण करेंगे ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कोकिलकलरवकूजितया जितमनसिजतंत्रविचारं ॥ श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारं ॥ ५ ॥

सं० टी० कोकिलेति । कोकिलकलरववत् अव्यक्तध्वनिवत् कूजितं शब्दो यस्यास्तया । जितः मनसिजस्य कामस्य तंत्रविचारः शास्त्रसिद्धांतो येन सः तं । श्लथाः शिथिलाः कुसुमैः पुष्पैराकुलाः व्याप्ताः कुंतलाः चूर्णकुंतलाः यस्याः सा तया । नखेन लिखितश्चिन्हितो घनो निबिडः स्तनभारो येन स तं ॥ ५ ॥

भा० टी० और मे मधुरी अपनी वाणीसे कोयला नाम पक्षीकोभी जित जीत लूंगी परंच कृष्णजी रतीशास्त्रप्रसंग करके जयश्रीको प्राप्त होंगे तब अनंगपीडित होने से मेरी केशस्थ कुसुमावली भ्रष्ट एवं मलीन होवेगी, और शिरके केशोंसे मेरा ललाट एवं कपोलस्थानभी आच्छादन हो जावेंगे, पुनर श्रीश्यामसुन्दरजीके नखों से मेरे स्तन विक्षिप्त वा चिन्हित होवेंगे ॥ ५ ॥

चरणरणितमणिनूपुरया परिपूरितसुरतवितानं ॥ मुखरविशृंखलमेखलया सकचग्रहचुम्बनदानं॥६॥

सं० टी० चरणेतिं । चरणयोः पादयोः रणितौ शब्दितौ मणियुक्तनूपुरौ यस्याः तया । परिपूरितं संपूर्णीकृतं सुरतवितानं सुरतसमूहो येन तं । मुखरा शब्दायमाना विशृंखला उन्मुक्ता मेखला कांची यस्याः सा तया । सकचग्रहं कचग्रहणसहितं चुंबनदानं यस्य तं॥६॥

भा० टी० मेरे मणिमय चरणभूषण नूपुर के झुनझुनशब्द से मोहन प्यारे कुञ्जकुटीर अतिआनंदसे परिपूर्ण हो जावेंगे; परन्तु कृष्णजी को कामानलनिर्वाण होनेसे मेरा जघनस्थान अति शिथिलता को प्राप्तहो जावेगा; किंतु ऐसे समय मे श्रीकृष्णचंद्रजी मेरे केशों को अवलंबन करके और मेरेहि मुखकमल को प्रसन्न होकर चुम्बन करेंगे ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतिसुखसमयरसालसया दरमुकुलितनयनसरो
जम् ॥ निःसहनिपतिततनुलतया मधुसूदनमुदि
तमनोजं ७ ॥

सं०टी०रतिसुखेति । रतिसुखसमये सुरतसुखकाले प्रीत्या अलसया आलस्ययुक्तया । दरमुकुलितनयनसरोजं ईषन्मीलितनेत्रकमलं । निःसहं असमर्थं निपतिता तनुलता शरीरलता यस्यास्तया । कथंभूतं कृष्णं मधुदैत्यं सूदयतीति तं । उदितः जातो मनोजः कामो यस्य तं ॥ ७ ॥

भा०टी०मदन—संग्राम में आसक्त होने से मेरे अंगोंमें एकान्त शिथिलता अवश्य होजावें गी ! और कृष्णजी के नेत्रकमलभी अनंगराग से मुदित होजावें गे । श्यामसुंदरजी मेरी यही दशा देखकर मेरे से बहुत-हि आसक्त होवें गे ॥ ७ ॥

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशी
लं ॥ सुखमुत्कण्ठितराधिकया कथितं वितनोतु
सलीलम् ॥ ८ ॥ इति श्रीगीतगोविंदे षष्ठः प्रबंधः॥६॥

सं०टी०श्रीजयदेवेति । इदं श्रीजयदेवेन भणितं उक्तं गीतं कर्तृ सुखं-पापरलौकिकसुखानिऐहिकानि च वितनोतु विस्तारयतु। केषां गायतां शृण्वतां च। कथंभूतं श्रीजयदेवभणितं अतिशयमधिकं मधुरिपोः कृष्णस्य निधुवनशीलं सुरतचरितं यस्मिन्। पुनः कीदृशं उत्कण्ठितयाराधिकया गोपवध्वा कथितं सलीलं शृंगाररसक्रियासहितं ॥ ८ ॥

भा०टी०राधा राणी पुनर्कथन करने लगी; कि हेसखि! जैसे मधुप नाम जीवविशेष सकल कुसुमों के मधुरस को पान करके अंत्यकालमें पूर्ण तृप्त होने के लिये पुष्पराज कमल के प्रियतर मधुररसको सुख पूर्वक पान करने के कारण बहुत आनंद से आताहै, एतादृशहि कृ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ष्णचंद्रजी और और कामिनीयों के साथ किलोल क्रीडा करके अंत्यमें मेरे पास अवश्य ही आवें गे । श्रीमान् जयदेव स्वामी विरचित यहि राधाजीको अनुसार के सकल वचन सर्व शक्ती प्रधान लोगों को प्रसन्नता के देने वाले हैं। ॥ ८ ॥

अधुनाऽत्युत्कण्ठया सख्या नीयमाना सा गोपीगणवृतं कृष्णं दृष्ट्वा परावृत्य सखीमाह-

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलम् ॥ मामुद्वीक्ष्य विलज्जितस्मितसुधामुग्धाननं कानने गोविंदं व्रज सुंदरीगणवृतं पश्यामि हृष्यामि च ॥१॥

सं०टी० हस्तेति । हेसखि गोविंदं अहं पश्यामि हृष्यामि हर्षं प्राप्नोमि च । पश्यामीति वर्तमानसामीप्याद्वर्तमानता । कथंभूतं गोविंदं कानने वृन्दावने व्रजसुंदरीगणेन गोपीसमूहेन वृतं वेष्टितं । ननु सपत्नीभिः परिवृतं दृष्ट्वा कथं ते हर्ष इत्यत आह । मां उद्वीक्ष्य दृष्ट्वा हस्तात्स्रस्तो व्यस्तो विगलितः विलासवंशः क्रीडावंशो यस्य तं । अनृजुभ्रूवल्लिमतीनां कुटिलभ्रूलतायुक्तानां गोपीनां समूहे उत्सारि ऊर्ध्वतिर्यग्गामिदृगंतेन कटाक्षेण वीक्षितमीक्षणं यस्य तं । मय्यागतायां भिया दृगंतचेष्टयान्यगोपीरपसारयंतमिति भावः । अतिस्वेदेनातिघर्मेणार्द्रं गण्डस्थलं यस्य तं । विलज्जितस्मितं सलज्जहास्यं तदेव सुधामृतं तया मुग्धमाननं मनोहरं मुखं यस्य तं ॥ १ ॥

भा०टी०हेसखि ! जो हरिने व्रजवालों से वेष्टित हुवेहै; और सकल कामिनीयां गुप्त गुप्त अभिप्राय प्रकाश करने के छल से जिस हरिको और दृष्टिपात करताहै, मुझको देख कर जिस हरि के मुख से निरन्तर हांसी प्रकाश होति है, और कन्दर्पराग से जिस हरि की

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वंशी प्राप्त होजाति है, और जिसके गण्डस्थल पसीना से आर्द्र होरहे है, उस गोविन्दको कानन में केलीकरते देखने से मेरे मनमें बडा आनंद प्राप्त होताहै ॥ १ ॥

पुनः विभावयन्नाह—

दुरालोकस्तोकस्तबकनवकाशोकलतिकाविकाशः कासारोपवनपवनो पिव्यथयति ॥ अपि भ्राम्यद्भृंगीरणितरमणीया न मुकुलप्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥२॥

सं०टी० दुरालोकेति । हे सखि दुरालोक्यते वियोगिनामुद्वेगजनकत्वात् स्तोकोल्पः स्तवकः गुच्छो यस्य नवकाशोकलतिकायाः विकाशःउद्योतः मां व्यथयति पीडयति ।किंच कासारोपवनस्य सरोवरनिकटवनस्य पवनोपि मां व्यथयति । कासार इत्यनेन वायोः शैत्यं उपवनसंबंधित्वेन सौगंध्यं वृक्षैरुपहतगतित्वेन मांद्यं च ध्वनितं । अपि च चूतानामाम्राणां इयं मुकुलप्रसूतिः कलिकोद्भेदो मां न सुखयति । कथंभूता प्रसूतिः भ्राम्यंतीनां चलंतीनां भ्रमरांगनानां रणितैः शब्दितैः रमणीया मनोज्ञापीत्यर्थः । शिखरिणी प्रशस्ताग्रभागवती भृंगीणां चलनं नायकान्वेषणार्थमिति ध्वनितं । शिखरिणीनामकं छंद इतीदं सूचितं ॥ २ ॥

भा०टी०हेमेरीप्यारि! मेरीदुःखकी विवर्णता और क्या कहूंगी! क्या नवीन अशोक लल और क्या सरोवर तीर के कुसुम कानन किसीसें मेरे हृदयमें आनंद नहि होताहै । हेसखि ! उपवनकी वायु भी मेरे लिये बडा दुःख दायक होरहाहै । भ्रमरका राग और आम्रकी सुन्दर कलीयां सतत आनन्दके देनेवालीहै किन्तु हेसखि; मेरे दुरभाग्यसे वे मुझे आनंद को नहि देते है ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधुना कविः लोकानाशिषयति-

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूव ल्लीकमलीकदर्शितभुजाबालार्द्धहस्तस्तनं ॥ गोपीनां निभृतं निरीक्ष्य ललितां काचिच्चिरं चिंतयन्नंतर्मुग्धमनोहरो हरतु वः क्लेशं नवः केशवः ॥३॥

इतिश्रीकविराजश्रीजयदेवकृतेगीतगोविंदे महाकाव्ये अक्लेशकेशवो नाम सटीको द्वितीयः सर्गः २

सं०टी० साकूतेति। नवः शृंगारस्तरुणो वा केशवः वः युष्माकं भक्तानां क्लेशं दुःखं हरतु दूरीकरोतु। कीदृशः साकूतं साभिप्रायं स्मितमीषद्धास्यं यत्र गोपीनां निभृतं गोपीभावं निरीक्ष्य दृष्ट्वा कांचिद्दयितां अंतर्मनसि चिरं चिंतयन् मुग्धमनोहरः मोहयुक्तसुंदरः। कथंभूतं निभृतं आकुलाकुलोत्यंतास्तव्यस्तः गलन् उन्मुक्तीभवन् धम्मिल्लः केशपाशो यत्रउल्लासिताउच्चैः कृता भ्रूवल्ली यत्र अलीकेन जृंभणादिच्छलेन दर्शिताः भुजा बालार्द्धहस्तस्तना यस्मिन् भुजे च बालाश्चार्धहस्तौ च स्तनौ चेति द्वंद्वः ॥ ३ ॥

भा०टी०सकल गोपियों के हास्य—सहित मुखों को, और काम-वेश से मुक्त वेणी, सानन्द भ्रुकुटी, एवं स्तनों को देख कर कृष्ण चंद्रजीने सर्व कामिनीयों से राधाजी को अधिक तर अनुमान करके अतिनिश्चय किया; तव कृष्णजी राधाके लिये एकांत चित्तयुक्त धीर्य वान् होगये। यहि राधाजीको प्रियतम श्रीकृष्णचंद्रजी तुह्ले मङ्लके देनेवाले है ॥ ३ ॥ इतिश्री कविराज श्रीजयदेवकृते गीतगोविन्दे महाकाव्ये अक्लेश केशवो नामद्वितीयः सर्गः ॥ २ ॥

अथ तृतीयसर्गः प्रारभ्यते

एवं राधायाः विरहमुक्त्वा कृष्णस्यापि विरहव्यथां तस्यामाह-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कंसारिरपि संसारवासनाबन्धशृंखलां ॥ राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥ १ ॥

सं०टी०कंसेति। कंसारिरपि कृष्णोपि राधां हृदये मनसि आधाय स्थाप्य व्रजसुंदरीर्गोपीस्तत्याज त्यक्तवान्। कीदृशीं राधां संसारे वासना संस्कारस्तस्या बंधाय शृंखलां निगडरूपां। सौंदर्यवतीर्बह्वीरपि तत्याजेति राधायां कृष्णस्यानुरागातिशयो ध्वनितः ॥१॥

भा०टी०नानाप्रकार के पदार्थों के मिलने में साधु यैसे निकृष्ट को त्याग श्रेष्ठ को आदर पूर्वक स्वीकार करताहै, और वहि उत्तम पदार्थ का आश्रय मान कर सुखपूर्वक अपने दिनों को व्यतीत करताहै, तैसेहि श्रीकृष्णचंद्र महाराजजी और और काममन्त कामिनीयों का परिहार करके श्रीराधाराणीजी के साथ बडे हि अति आशक्त होते भये ॥ १ ॥

पुनः किंकृतवान्—

इतस्ततस्तामनुसृत्य राधिकामनंगबाणव्रणखिन्नमानसः ॥ कृतानुतापः स कलिंदनंदिनीतटांतकुंजे निषसाद माधवः ॥ २ ॥

सं०टी०इतस्ततइति। स माधवः कलिंदनंदिन्याः यमुनायास्तटांतकुंजे तीरलतागृहे निषसाद स्थितवान्। किं कृत्वा इतस्ततः अनेकस्थानेषु तां राधिकां अनुसृत्यान्वेष्य। कीदृशः अनंगबाणव्रणेन कामशरक्षतेन खिन्नं दीनं मनो यस्य। कृतोनुतापः पश्चात्तापो येन सः ॥ २ ॥

भा०टी०श्रीराधाप्यारीजी के विरह से नंदलाल जी काम बाण से वेधित तथा व्याकुल होकर घूमते फिरते यमुना नदीके तीरमे जो निकुञ्ज था उसमें प्रवेश करगये, और अपने हृदयमें बहुतसा विलाप, तथा संताप, भी करने लगे; एव हाराधा हाराधा ऐसे पुकारते भये ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतानुतापत्वमेवाहे गीतेन–

अथ सप्तमप्रबंधः गुर्जरीरागेण प्रतिमंठताले गीयते

मामियं चलिता विलोक्य वृतं वधूनिचयेन ॥ साप
राधतया मयापि न वारितातिभयेन ॥ १ ॥ हरिह
रि हतादरतयागता सा कुपितेव ॥ ध्रु० ॥

सं०टी०मामिति। गीतस्यास्य गुर्जरीरागः प्रतिमंठतालः तयोर्लक्षणं प्राक् कथितं। हरिहरीति खेदानुकारे सा राधा हतादरतया हतबहुमानत्वेन कुपितेव कोपं प्राप्तेव गता अन्यस्थाने गता । ननु सा कुपिता त्वया कथं ज्ञाता तत्राह। मां कृष्णं वधूनिचयेन गोपीसमूहेन वृतं वेष्टितं विलोक्य चलिता इतो गता इति भिन्नैव वाक्यरचना। तर्हि सा गच्छंती त्वया किं न निवारिता तत्राह । मयापि कृष्णेनापि सापराधतया कृतापराधत्वेन हेतुना अतिभयेन न वारिता । यद्वा कथंभूतेन मया अतिभयेनातिशयितं भयं यस्येति ॥ १ ॥

भा०टी०कृष्णजीने अपने मनमें बहुत सा विलाप किया है; कि मैंने और और नारियोंके साथ क्रीडा किलोल कौतुकादि व्यवहार किया है, यहि देखकर राधाराणीने अपने मनमें अति क्रोध किया और यहां से शीघ्र चलीगई। हाय रे हाय ! मैंने अतिउग्र दोष किया, इस हेतुसे उनको निवारण करने नही सकि ॥ १ ॥

किं करिष्यतिकिंवदिष्यति सा चिरं विरहेण॥किं
जनेन धनेन किं मम जीवितेन गृहेण ॥ २ ॥

सं०टी०किंकरिष्यतीति। सा राधा चिरं विरहेण चिरकालं मद्वियोगेन किं करिष्यति विरहतापशांत्यर्थं कमुपायं करिष्यतीत्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किं वदिष्यति । ननु एतावता तस्यामेव को वा ग्रहः अन्यगोपीजनस्य धनादिना चित्तव्यावर्तनं कर्तव्यं तत्राह । तां राधां विना मम जनेन लोकेन किं । तद्वियोगेन सर्वजनपरित्यागात् धनेन किं । ननुधनं विना गृहसौख्यं न स्यात्तत्राह । गृहेणकिं प्रयोजनं न किमपि तद्वियोगेन वनवासांगीकारात्। ननु सुखास्पदं गृहं विना सुखं न स्यात्तत्राह मम सुखेन किं । तां विना सर्वं निष्फलमित्यर्थः । सैव मे सुखरूपेति भावः ॥ २ ॥

भा०टी०कृष्णजी बहुत विचारकर कथन करने लगेकि हाय रे हाय! मैंने राधाजीका आदर नहि किया इस हेतु से राधाराणीने मनमे, क्या जाने, क्रोध किया और,यहां से चली गई। हाय रे हाय अभि विरह उसे विशेष रूपको करके अतीउग्र पीडाकर रहा होगा और वहि विरहकारी पीडासे दुःखित होकर नेत्रोंने राधाजीने अपनी प्यारी सखिके साथ क्या कथन किया होगा अभि मेरा मन धन वा जन इत्यादि किसी वस्तु में स्थिर नहि होता है ॥ २ ॥

चिंतयामि तदाननं कुटिलभ्रुरोषभरेण ॥ शोणपद्ममिवोपरिभ्रमताकुलं भ्रमरेण ॥ ३ ॥

सं०टी०चिंतयामीति । अहं तस्याः राधायाः आननं मुखं चिंतयामि स्मरामि । कीदृशमाननं रोषभरेण क्रोधातिशयेन कुटिले वक्रे भ्रुवौ यत्र । किमिव उपरि भ्रमता भ्रमरेण आकुलं व्याप्तं शोणपद्ममिव । अत्र रोषारुणे मुखे शोणपद्मसादृश्यं बोध्यं । वारंवारं रोषाद्वक्रीभवंत्योर्भ्रुवोर्भ्रमरापेमाद्र्र बोध्या ॥ ३ ॥

भा०टी०अभि भ्रमरगण मधुरसके पानकरनेके लिये उसके मुखकमलपर बैठने लगरहाहै, किन्तु क्रोधसे उसके नयनोंमें रुधिरके समान लाली छारहीहै और अभी किंचित कुंचित भि होरहेहैं। मेतो अभि उस राधाके सुन्दर मुखकमलको अपने हृदयमे ध्यानकरताहूं ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तामहं हृदि संगतामनिशंभृशं रमयामि ॥ किं वने
नुसरामि तामिह किं वृथा विलपामि ॥ ४ ॥

सं०टी० तामिति । अहं हृदि संगतां राधां अनिशं वारंवारं भृशमतिशयेन रमयामि क्रीडयामीतिभावः । इह वने तां राधां किमनुसरामि हृदि संगतत्वादेव वृथा व्यर्थमेव किंविलपामि विलापं करोमि ॥ ४ ॥

भा०टी०हेराधा मेतो तुह्मारि मनोहारिमूर्त्तिको अपने हृदय कमलके सिंहासनमें स्थापनकरके उसकी नित्यही पूजना करताहूं परन्तु तुझको इस अखण्ड वनमें अनुसंधान वाअन्वेषन करनेकेलिये खेदपानेसे मेरा क्या काम है४

हृदि संगतां तां प्रत्याह—

तान्वि खिन्नमसूयया हृदयं तव कलयामि ॥ तन्न
वेद्मि कुतो गतासि न तेन तेऽनुनयामि ॥ ५ ॥

सं०टी० तन्वीति । हे तन्वि असूयया असहिष्णुत्वेन दुःखितं तव हृदयं आकलयामि तर्कयामि तत्तस्मादहं न वेद्मि न जाने कुतः कुत्र गतासीति तेनकारणेन ते तुभ्यं न अनुनयामि नप्रसादयामि। "क्रियार्थोपपदस्ये" ति चतुर्थी ते इति ॥ ५ ॥

भा०टी०हे तन्वी सूक्ष्मदेहि राधा! मैं और और रमणीयोंके साथ विहार करताहूं इससे ऱ्हस्व स्वरूप विषे तुह्मारे हृदय में बहुतसा दगादे रहाहै; हे राधा मेने अछि तऱ्हासे समजाहै । तुम अभी कहाहै वह मे जानता नहीहै इसकारण मैने किसीसें तुह्मारे हृदयको प्रसन्न करुंगा॥ ५ ॥

दृश्यसे पुरतो गतागतमेव मे विदधासि ॥ किं पुरेव
ससंभ्रमं परिरंभणं न ददासि ॥ ६ ॥

सं०टी० दृश्यसे इति । हे राधे त्वं मम पुरतः अग्रे गतागतं गमनागमनमेव विदधासि करोषीति दृश्यसे । तर्हि पुरेव पूर्ववत् ससंभ्र-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मं सवेगं परिरंभणमालिंगनं किं केन कारणेन न ददासि । विरहिणो, हि चित्तानुषंगात्सर्वतस्तामेव पश्यंति ॥ ६ ॥

भा०टी०हे मेरि प्यारी! तु एकवारोभि मेरी दृष्टिकरक्यों नहिआतिहै और किसहेतु तु मुझे पूर्ववत आलिंगन नही देती है ॥६॥

क्षम्यतामपरं कदापि तवेदृशं न करोमि ॥ देहि सुंदरि दर्शनं मम मन्मथेन दुनोमि ॥ ७ ॥

सं०टी० क्षम्यतामिति । हे सुंदरि पूर्वकृतमपराधं क्षम्यतां अपरमीदृशं तवापराधं कदापि न करोमि न करिष्यामि अत एव मम दर्शनं देहि ॥ यतः अहं मन्मथेन कामेन दुनोमि पीडामनुभवामि ॥७॥

भा०टी०हे सुंदरी! तुझे मेरा अपराध क्षमा करना चाहिये; अबमे ऐसा काम कभी नहि करूंगा । एकवारमें मेरे सन्मुख प्राप्तहो जावो! मेतो और कष्ट लेने नही सक्ताहूं । तुम देखा आभि मदनअपनेबाणोंसे मुजको पीडा देरहां है ॥७ ॥

वर्णितं जयदेवकेन हरेरिदं प्रणतेन ॥ किंदुबिल्वसमुद्रसंभवरोहिणीरमणेन ॥८॥

इति श्रीगीतगोविंदे सप्तमः प्रबंधः

सं०टी० वर्णितमिति । जयदेवकेन स्वार्थे कः।इदं गीतं वर्णितं । कीदृशेन जयदेवकेन हरेः प्रणतेन कृष्णस्याराधनपरेण । पुनः कीदृशेन किंदुबिल्वंजयदेवकुलं तदेव समुद्रस्तस्मात्संभवो यस्य एतादृशो रोहिणीरमणश्चंद्र इव । यथा सागरादुत्पन्नश्चंद्रस्तथा किंदुबिल्वोत्पन्नो जयदेव इति । यद्वा किंदुबिल्वं शासनं ॥ ८॥

भा० टी०क्षीरोदसमुद्रसमान चंद्रमास्वरूप केन्दु बिल्वग्रामनिवासीय श्रीमान् भाक्तिप्रधान जयदेव स्वामीने कृष्णजीके यही परितापका वर्णन कियाथा । एतत् गीत सर्व भाक्तिप्रधानजनोंको तृप्तिके करनेवालाहै॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं काम एव मे दुःखं प्रयच्छतीति तमुपालंभगोचरं करोमीत्याशयेनाह—

हृदि बिसलताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी कंठे न सा गरलद्युतिः॥ मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हरभ्रांत्यानंग क्रुधा किमु धावसि॥ १ ॥

सं०टी० हृदीति । हे अनंग त्वं मयि हरभ्रांत्या महादेवभ्रमेण न प्रहर मा प्रहारं कुरु। क्रुधा कोपेन किमु किमिति धावसि मारयितुं धावनं करोषि। कीदृशे मयि प्रियारहिते राधावियोगिनि।सर्वदा प्रियायुक्तो ऽहं त्वधुना प्रियारहित इति मयि हरभ्रमो न युक्त इति भावः। हरभ्रांतिं परिहरति हे काम मम हृदि बिसलतायाः हारो मृणाललताया हारस्तद्विरहजन्यसंतापशांत्यर्थं धृतः नायं भुजंगमनायकः शेषः। इयं मे कंठे कुवलयदलानां नीलोत्पलानां श्रेणी पंक्तिः शैत्याय धृता न तु सा गरलद्युतिर्हालाहलदीप्तिः । इदं मलयजरजश्चंदनलेपः सर्वांगे तापशांत्यर्थं धृतः न तु भस्म विभूतिः॥१॥

भा०टी०कृष्णजी पुनर्वार कथन करने लगे की अमोघ बाणवाले हे कामदेव! मेरा अभि प्रिय प्यारिसे वियोग होरहा है क्या इसहेतुसे तुम मुझे महादेव भस्मधारि को पैछानकर अति पीडा देरहाहे! किन्तु तुमनिश्चयसे जानो के मे महादेव नहि हूं।मेरे कण्ठ देशमें जो हार है उसे तुम भुजङ्ग नागराज सर्परूप करके मतजानो; मेरे कण्ठमें केवलहि नीलपद्माकों हार है; वहकाभि विषपानका चिह्न नहिहो सक्ताहै। जो मेरे अंगोमे श्वेतचन्दनलगाहुआहै उसे कदाचित् तुम भस्म मतजानो; वह चंदनाहिहै॥ १ ॥

पुष्पसायकत्वेन कामः प्रसिद्धोऽतः इमान् चूतमंजरीरूपानेव बाणान् धनुष्यारोप्य मां ताडयिष्यतीति शंकया पुनरपि कामायैव दैन्यं करोति—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्वमूर्छितजनाघातेन किं पौरुषं ॥
तस्या एव मृगीदृशो मनसिज प्रेंखत्कटाक्षानि
लज्वालाजर्जरितं मनागपि मनो नाद्यापि संधुक्षते२

सं०टी० पाणाविति । हे क्रीडानिर्जितविश्व क्रीडया लीलया जितं भुवनं येन सः । अमुं चूतसायकं आम्रपुष्पबाणं पाणौ हस्ते मा कुरु चापं धनुः मारोपय सशरं मा कुरु । हस्तेपि चेत्करोषि तर्ह्यमुं सायकं मा संधेहीत्यर्थः । हे मनसिज मदन यतः मूर्च्छितस्य मूर्च्छां प्राप्तस्य मादृशजनस्याघातेन पीडया किं ते पौरुषं कस्तव पुरुषार्थः न किमपीत्यर्थः । मूर्च्छितत्वे कारणमाह । तस्याएव मृगीदृशो हरिणीनयनायाः । तस्या एवेति विरहाधिक्येन राधानामग्रहणाशक्तिः प्रतिपाद्यते । प्रेंखंतश्चलंतः कटाक्षा एवानलाः वन्हयस्तेषां श्रेण्या पंक्त्या जर्जरितं खंडखंडीभूतं मम मनः मनागपि स्वल्पमपि नाद्यापि संधुक्षते स्वस्थं न भवति । क्वचित्कटाक्षाशुगेतिपाठः तदा कटाक्षा एवाशुगा बाणाः ॥ २ ॥

भा०टी०हे मदन तुम और आम्रके कलीस्वरूपबाणको धारण ना करो ; यदि धारणकरनेकी तुह्मारी एकान्त मनसाहि होरहीहै तब उसे धनुषपर मत चढाणा, देखो की इस संसार में ऐसा कौनहै जो क्रीडामें जयी होकर मूर्छागतवालेको पुनर बाण प्रहार करताहै ! और ऐसाकरनेसे किसमें तुह्मारा गौरववा पौरुष प्रकट होगा ! में कुरङ्गनयनी राधाके नेत्ररूपबाणोंसे अति पीडित होरहा हूं इसलिये मेरे मनमे स्वस्थतानहीहै ॥ २ ॥

ननु तत्कटाक्षादिचिंतनादेव तव दुःखं भवति मदनस्य तर्हि कोपराधस्तत्राह--

भ्रूपल्लवो धनुरपांगतरंगितानि बाणा गुणः श्रवणपा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लिरिति स्मरेण ॥तस्यामनंगजयजंगमदेवताया-
मस्त्राणिनिर्जितजगंति किमर्पितानि ॥ ३ ॥

सं॰टी॰ भ्रूपल्लवइति । इतीत्थंप्रकारेण स्मरेण कामेन तस्यां राधायां अस्त्राणि अर्पितानि स्थापितानि किं तर्कयामि किं वितर्कें। नन्वस्त्राणि वीरेण स्वहस्ते स्थापयितुमुचितानि नत्वन्यत्रेत्याह। नीर्जितानि जगंति यैस्तानि तैरेवास्त्रैर्जगत्त्रयं जित्वा तत्र स्थापितानीति भावः । तर्ह्यन्यत्र किं स्थापितानीत्याह । अनंगस्य कंदर्पस्य जये त्रैलोक्यविजये जंगमदेवतायां गमनशीलदेवतारूपायां । इतीति किं । भ्रूपल्लवो भ्रूलता तदेव धनुः अपांगतरंगितानि कटाक्षनिरीक्षणानि एव बाणाः श्रवणपालिः कर्णप्रदेश एव गुणः प्रत्यंचा॥३॥

भा॰टी॰हेअनंग! तुह्मारे पास क्या है? तुह्मारे सर्व अस्त्रोंको राधाजीने लेलिआ हुआहै! और तुझेभी जीत लियाहै! तुम एकवार देखो राधाजीका भ्रू तुह्मारा धनुषहै, उसकी चातुर दृष्टि तुह्मारा बाणहै, उसके कर्णोंके अंत तुह्मारो धनुषका गुणहै । हे कामदेव अभि तुह्मारा तेज कहां है कहाहै कहाहै ३

अधुना मनोविषयीकृतां राधां प्रति स्वीयं दुःखमाह—

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कबरीभारोपि मारोद्य
मं ॥ मोहं तावदयं च तन्वि तनुतां बिंबाधरो राग
वान् सद्वृत्तस्तनमंडलस्तव कथं प्राणैर्मम क्रीडति४

सं॰टी॰ भ्रूचाप इति । हे तन्वि कृशांगि भ्रूचापे भ्रुवावेव चापो धनुस्तत्र निहितः अर्पितः कटाक्षविशिखः कटाक्षबाणः मर्मव्यथां मर्मपीडां तावन्निर्मातु । करोतु विशिखस्य मर्मव्यथाजनकत्वं युज्यत एवेतिभावः । अनु च श्यामात्मा श्यामवर्णः कुटिलः वक्राकारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कबरीभारोपि केशसमूहोपि मारोद्यमंकामौन्नत्यं तावत्करोतु। योंत-र्मलिनः कुटिलश्च भवति सोन्यमारणाय यत्त एवेति सूचितं। अयं च बिंबाधरः बिंबोष्ठः मोहं तनुतां विस्तारयतां। कथंभूतो बिंबाधरः रागवान् लोहितवर्णः रागिणो विषयिणः मोहो ममत्वं युज्यत एव।सद्वृत्तःसाधुवर्तुलः तव स्तनमंडलः मम प्राणैः कथं क्रीडति।येसद्वृत्ताःसन्मार्गप्रवर्तकास्ते तु परप्राणघातका न भवंति। विरोधनामालंकारः४

भा०टी०हेकृशांगि राधा! तेरे भ्रूस्वरूप धनुषमें तुह्माराही चातुरदृष्टि स्वरूपबाण आरोपित होकर मुझे बहुतसा यन्त्रणाको देताहै, मेरी यहि पीडापर तुह्मारी कबरीनें पुनर्वार मेरे ज्ञान मोहन करनेकेलिये चेष्टाकिया। तुह्मारे बिम्बाधर और स्तनयुगल मेरेप्राणनाश करनेके उद्योगी होरहेहै ॥ ४ ॥

तानि स्पर्शसुखानि ते च तरलाःस्निग्धा दृशोर्विभ्रमास्तद्वक्त्रांबुजसौरभं स च सुधास्यंदी गिरां वक्रिमा ॥ सा बिंबाधरमाधुरीति विषयासंगेपि मन्मानसं तस्यां लग्नसमाधि हंत विरहव्याधिःकथंवर्तते५

सं०टी० तानीति। तान्येव स्पर्शसुखानि यानि पुरा नायिकासंगमानुभूतानि। एतेन त्वगिंद्रियविषयलाभः। ते च तरलाश्चंचलाः स्निग्धाः प्रेमान्विताः दृशोश्चक्षुषोर्विभ्रमा विलासाः। एतेन रूपंतदेव वक्त्रांबुजसौरभं वदनकमलसुरभित्वं। एतेन गंधत्वं। स च सुधास्यंदी अमृतद्रवयुक्तः गिरां वचसां यः वक्रिमा वक्रत्वं। एतेन शब्दः। सा च बिंबाधरमाधुरी बिंबसदृशोष्ठमाधुर्यं तदेव।एते न रसः। इत्येवं प्रकारेण विषयासंगेपि तस्या रूपरसस्पर्शादीनां सान्निध्येपि मम मानसं मनस्तस्यां राधायां लग्नसमाधि प्राप्तस्थानं चेद्यदि तदा हंत इतिखेदे विरहव्याधिः व्यथा कथं वर्तते। ध्यानयुक्तस्य योगिनोव्याधिनाशात् ॥ ५ ॥

७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०हेराधा! में कभी तुह्मारा स्पर्श वा कभीतुह्मारा सुंदरमुखका अनुभव कियाकरताहूं ; और कभी तुह्मारे चंचल नयनों का दर्शन पाताहूं ; कभी तो तुह्मारे मुखकमल की सुगंधि को आघ्राण करता हूं , कभी तुह्मारो मधुर प्रिय वचनों को श्रवण करता हूं, और कभी तुह्मारे बिम्बाधर की सौंदर्य्यताका दर्शन करताहूं। हेप्रियप्यारी राधा! तब किसकारण मेरी विरहरूपी पीडा की शांति क्यो नहिहोतीहै ॥ ५ ॥

अधुना कविः सर्गांते भक्तानाशिषयति--

तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्यवंशोच्चरद्गीत स्थानकृतावधानललनालक्षैर्न संलक्षिताः ॥ संमुग्धं मधुसूदनस्य मधुरे राधामुखेंदौ मृदुस्पंदं कंदलिताश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः ॥ ६ ॥

सं०टी० तिर्यक्कंठेति। मधुसूदनस्य कृष्णस्य कटाक्षोर्मयः कटाक्षदर्शनतरंगाः वः युष्माकं भक्तानां क्षेमं कल्याणं ददतु प्रयच्छंतु कीदृशाः मधुरे सुन्दरे राधायाः मुखमिंदुरिव तस्मिन् संमुग्धं अव्यक्तं मृदुस्पंदं किंचिच्चलनं च यथा स्यात्तथा पल्लविताः। इंदुदर्शनात्तरंगाः अतीव भवंतीति कटाक्षाणां तरंगसाम्यं। नन्वन्यासु पश्यंतीषु कथं राधामुखचन्द्रएव पल्लविता ऊर्मयः अतआह। वंशादुच्चरत्सु वेणोर्निर्गच्छत्सु गीतस्थानेषु गानपदेषु कृतावधानैर्दत्तमनोभिर्ललनालक्षैर्गोपांगनासहस्रैर्न संलक्षिताः न ज्ञाताः। कथं भूतस्य मधुसूदनस्य तिर्यग्वक्रः कंठो यस्य विलोलश्चंचलो मौलिर्मस्तकः किरीटो वा यस्य तरलश्चंचल उत्तंसः अवतंसो यस्य सः पश्चात्कर्मधारयः। लक्षपदं बहुत्वोपलक्षकं। मुग्धोहरिर्विरहीत्यर्थः॥ ६ ॥

इति श्रीकविराज श्रीजयदेवकृते गीतगोविंदे महाकाव्ये मुग्धमधुसूदनो नाम सटीकस्तृतीयः सर्गः३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०राधाजीके मुख शशधरपर माधवके कटाक्षपातके लिये कण्ठदेश वक्र हुवाथा, और शिरके भूषणभी आन्दोलित हुवेथे । माधवजीको वंशी गीतिमें एकाग्रचित्त हेतु कोई गोपरमणीने वहसब अनुभव नहीं कीथी । श्रीमान् जयदेवस्वामी प्रगटकरते है की कृष्णचंद्र महाराजजीकी यही कटाक्ष दृष्टि तुह्मारेको मंगलके देनेवालिहै ॥६॥

इति तृतीय सर्गः ॥

अथ चतुर्थः सर्गः प्रारभ्यते

इदानीं राधासखी कृष्णं प्रत्याह –

यमुनातीरवानीरनिकुंजे मंदमास्थितम् ॥ प्राह प्रेमभरोद्भ्रांतं माधवं राधिकासखी ॥ १ ॥

सं०टी०यमुनेति । राधिकायाः सखी माधवं कृष्णं वक्ष्यमाणं प्राह उक्तवती कीदृशं माधवं यमुनायास्तीरे यो वानीरनिकुंजः वेतसोपलक्षितं लतागृहं तस्मिन् मंदं तूष्णीं आस्थितं आसीनं। पुनः कीदृशं प्रेम्णा राधायां प्रेमातिशयेन उद्भ्रांतं उद्विग्नचितं कथं मयि प्रसादंयास्यतीत्युद्भ्रांतं ॥ १ ॥

भा०टी०यमुना नदीके तटस्थ वेतसवनमें राधाप्यारिके प्रेमसे उन्मत्त एवं व्याकुल कृष्णचंद्रजीको देखके राधाजीकीसखी कृष्णाजीके साथ कथन करने लगीं॥ १ ॥

उक्तश्लोकार्थं गीतेनाह—

अथ अष्टमप्रबंधः कर्णाटकरागेण एकतालीताले गीयते

निंदति चंदनमिंदुकिरणमनुनिंदति खेदमधीरं ॥ व्यालनिलयमिलनेन गरलमिव कलयति मलयस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

मीरं ॥ सा विरहे तवदीना ॥ माधव मनसिजविशिखभयादिव भावनया त्वयि लीना ॥ ध्रु० ॥

सं०टी० निंदतीति । अस्य कर्णाटकरागः तल्लक्षणं " कपोलपाणिनिर्गजदंतपत्रमेकं वहन् दक्षिणकर्णपूरे । संस्तूयमानः सुतचारणौघैः कर्णाटरागः सितनीलकंठः " इति । अत्र गीते विरहोत्कण्ठावर्णनीया " वासकसज्जा सोत्कण्ठा स्वाधीनभर्तृका तथा ॥ कलहांतरिता चापि विप्रलब्धाभिसारिका । खंडिता प्रोषिता चैव वनिताश्चाष्टसंभृताः " । तत्र विरहोत्कण्ठालक्षणं भरतोक्तं । " यस्याः समुचितेप्यन्हि प्रवासी नैति वल्लभः । सा स्मरानलसंतप्ता विरहोत्कण्ठितामता " इति । गीतार्थस्तु हे माधव सा राधा तव विरहे सति दीना दुःखिता त्वयि त्वद्विषये भावनया अनुचिंतनेन कामबाणः कृष्णहृदये प्रविश्य स्थितां मां न पीडयिष्यतीति भावनया लीना प्रविष्टा । कस्मादिव मनसिजविशिखभयादिव । केन प्रकारेणेत्याह हे कृष्ण सा राधा चन्दनं निंदति । इन्दुकिरणं चन्द्रदीधितिं अनुलक्षीकृत्य अधीरं अनल्पखेदं विंदति लभते । मलयसमीरं मलयवातं व्यालनिलयं सर्पस्थानं चन्दनवृक्षस्तस्य मिलनेन स्पर्शनेन गरलमिव विषमिव कलयति मन्यते ॥ १ ॥

भा०टी०हेमाधव ! राधिकाने विरहसे एकान्त कातरहोकर केवल तुह्मारी चिन्तामें व्याकुल वा मगनहीहोरही है ; अभि चंदन और चंद्रमाकी किरणोंसे भी राधाजीके प्राण सीतलताको नही प्राप्त होतेहै । देखोकी यह दोनो वस्तुकी प्रकृती बहुत सीतलहै, परंतु राधाजीके प्रालब्धसे वे उसे अग्निके समान संतापदे रहेहै । इस शोकसे राधाजी एकान्त विखिन्न मनसे कातर होरही है । हेमाधव ! चंदनके वनको मलयाचल पवन चंदन वृक्षोके खोखरा में जो नाग वास करते है उनके स्वासके समान होकर राधाजीके प्राणहृदय विषे संकष्टएवंताप देरहाहै ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अविरलनिपतितमदनशरादिव भवदवनाय विशालम् ॥ स्वहृदयमर्माणि वर्मं करोति सजलनलिनीदलजालम् ॥ २ ॥

सं०टी० अविरलेति । हे कृष्ण सा राधा स्वहृदयमर्माणि सजलनलिनीदलजालं सजलकमलिनीपत्रसमूहमेव वर्म तनुत्रं करोति कस्मै प्रयोजनाय भवदवनाय स्वहृदयस्थितस्य भवतो रक्षणाय। कस्मादिव अविरलं निरंतरं पतितो यो मदनशरः कामबाणस्तस्मादिव । कीदृशं वर्म विशालं विस्तीर्णं त्वं तस्या हृदये सर्वदा इति भावः॥२॥

भा०टी०हेमाधव! राधिकाजी कामरूपिबाणसे बहुत आतुर होरहिहै; औरउस केहृदयमें आपकी सुन्दरमोहनीमूर्त्ति विराजमानहै;केवल तुह्मारी उसके मूर्त्तीको रक्षाके कारणसे राधाजीने अपने हृदयको कमलपत्रमें आच्छादितकरदियाहै २

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम् ॥ व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम् ॥ ३ ॥

सं०टी०कुसुमेति । कुसुमशयनीयं पुष्पशय्यां करोति । कीदृशं अनल्पविलासकलाभिर्बहुतरक्रीडाकलाभिः कमनीयं सुंदरं पुष्पशय्या स्वयमेव मनोज्ञा इयं शय्याविरचनाकुशला शय्याभावे पुष्पशय्यां करोतीत्यर्थः। कामिव कुसुमविशिखः कामस्तस्य शराः पुष्पाणि तान्येव तल्पं शय्या तादृशं व्रतमिव शरशय्याशयनरूपं दारुणं व्रतमिति भावः । किमर्थं व्रतमित्यत आह तव परिरंभसुखाय आलिंगनसुखं प्राप्तुमित्यर्थः॥ ३ ॥

भा०टी०हेमाधव! अभितो सुशोभित कुसुमशय्या राधाके लिये कठोर कण्टक शय्याके सदृश प्रतीत होरहिहै, और तुह्मारे आलिंगनस्वरूप फलकामनासे राधाजीने शररूपि शय्याको आश्रयकर रहिहै॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वहतिचलितविलोचनजलधरमाननकमलमुदारम्।
विधुमिव विकटविधुंतुददन्तदलनगलितामृतधारम्॥४

सं०टी० वहतीति। सा राधा उदारं मनोज्ञं आननकमलं वहति धारयति। कीदृशं चलितं उच्छ्वसितं यद्विलोचनजलं नेत्राश्रु तद्धारयतीति। कमिवविधुमिव। कीदृशं विधुं विकटेन दारुणेन महता विधुंतुदस्य राहोर्दंतेन दलनाद्गलिता ऽमृतधारा यस्मात्॥ ४॥

भा०टी०जैसै अमृतके आधार चंद्रमाको पापिष्टराहू ग्रास किया करता है, तैसेहि श्रीराधाजीके मुखरूपि चंद्रमाको उनके अभी जलरूपि राहूने श्री-भ्रष्ट वा ग्रसित करदियाहै॥ ४॥

विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम्।
प्रणमतिमकरमधो विनिधाय करे च शरं नव चूतम्५।

सं०टी० विलिखतीति। हे कृष्ण सा राधा असमशरभूतं कंदर्पस्वरूपं भवंतं त्वां रहसि एकांते कुरंगमदेन मृगमदेन कस्तूरिकया विलिखति अधः कामरूपस्य भवतोधस्तान्मकरं कामवाहनं विनिधाय कृत्वा करे हस्ते नवचूतं नूतनाम्ररूपं शरं बाणं च विनिधाय संस्थाप्य प्रणमति। पूजानंतरं प्रणामो युज्यत एव। मकरस्य ध्वजत्वे प्रसिद्धे वाहनत्वेपि न दोषः॥ ५॥

भा०टी०श्रीराधाराणीजी कभितो तुले मदन तुल्य चिन्तन करके कस्तूरीसे तुह्मारी प्रकृतिको विचित्र कियाकरतीहै, और नवी आम्रकली स्वरूप बाण वहि चित्रके हाथमें देकर वारंवार उसको नम्र होकर प्रणाम किया करतिहैं॥ ५॥

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं॥ त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं॥ ६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी० प्रतिपदमिति । हे कृष्ण सा राधा प्रतिपदं प्रतिक्षणं इदमपि निगदति । इदं किं हे माधव हेकृष्ण तव चरणे अहं पतिता । किमित्यत आह त्वयि विमुखे पराङ्मुखे सति मयि सपदि तत्क्षणं सुधानिधिरपि चन्द्रोपि तनुदाहं शरीरपीडां तनुते विस्तारयति यतश्चन्द्रोप्येवं कुरुते अतस्तव चरणे पतिता ॥ ६ ॥

भा०टी० राधाजी नम्रहोकर वारंवार कथन करने लगी की हे माधव! में तुह्मारे चरण कमलमें पतित होरहि हूं । और तुह्मारे विमुख होनेसे आज सुधानिधि चंद्रमा मेरे शरीरको दग्ध कररहाहै ॥ ६ ॥

ध्यानलयेन पुरः परिकल्प्य भवंतमतीवदुरापं ॥ विलपति हसति विषीदति रोदिति चंचति मुंचति तापम् ७

सं०टी० ध्यानेति । हे कृष्ण अतीव दुरापं दूतीद्वारापि दुर्लभं भवंतं ध्यानलयेन चित्तैकाग्र्यविशेषेण पुरोग्रे परिकल्प्य कल्पनां कृत्वा मयि स्नेहं इदानीमपि न करोतीति विलापं करोति । हसति । तव दर्शनेन विषीदति हास्यानंतरं आनर्थक्यात् अतएव रोदिति । चंचति स्थानांतरं गच्छति स्थानांतरे आलिंगनादिकं करिष्यतीति अतएव तापं मुंचति मनस्तापं त्यजति ॥ ७ ॥

भा०टी०श्रीराधाजी कभि कभि तुह्मारे स्वरूपको ध्यान करके प्राप्तहोती है, तथा तुह्मारेहि सुंदर मनोहर मूर्तिको प्रत्यक्षकी न्याई देखकर बहुत विलाप करतिहै, और कभि स्वप्नवत तुमको देखकर समीपमे हासी करती है; किसि समयमें तुह्मारे वियोग से रोदन कर्ती है और तुह्मारे समागम के लिये चारों औरमे भ्रमण किया करती हैं; किसिसमय ध्यानमे मग्न होकर स्वप्नतुल्य तुह्मारी मूर्तिके साथ मिलापकर बहुत आनंद पाति है, औ चिन्तारूपि ताको दूर करति है ॥ ७ ॥

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यं ॥ हरिविरहाकुलबल्लवयुवतिसखीवचनं पठनीयं ८

इति श्रीगीतगोविंदे अष्टमः प्रबंधः

सं०टी० श्रीजयदेवेन भणितं कथितं गीतं मनसा चित्तेन अधिकं सातिशयं यदि नटनीयं नृत्तयितव्यं तदा हरिविरहेण कृष्णवियोगेनाकुलाया बल्लवयुवत्याः राधायाः सखीवचनं गीतरूपं पठनीयं। श्रीजयदेवगीतेष्विदमतिशयितव्यमितिभावः ॥ ८ ॥

भा०टी० हे भक्त ! जो तुम अपने हृदयकमलको आनंदसे परिपूर्ण करना चाहते हो तब श्रीमान् जयदेवस्वामीकृत राधाविरहको नित्य पठन करो ।८।

गीतोक्तमर्थं श्लोकेनाह–

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोपि श्वसितेन दावदहनज्वालाकलापायते ॥ सा
पि त्वद्विरहेण हंत हरिणीरूपायते हा कथं कंदर्पोपि
यमायते विरचयञ्छार्दूलविक्रीडितम् ॥ १ ॥

सं०टी० आवास इति । हे कृष्ण हंतेति खेदानुकारे सा राधापि त्वद्विरहेण भवद्वियोगेन हरिणीरूपायते मृगीरूपमिवाचरति । कथमित्यत आह । आवासो गृहं विपिनायते वनमिवाचरतीति । त्वद्विरहात् प्रियसखीमालापि सखीसमूहोपि स्वेच्छागमननिवारकतया जालायते जालमिवाचरति । तापोपि देहदाहोपि श्वसितेन श्वासोच्छ्वासेन दावदहनज्वालाकलापायते अरण्यवह्निज्वालापरंपरेवाचरति ।कंदर्पोपि कथं यमायते यम इवाचरति । हा शब्दः स्वात्मनो दुःखाधिक्यसूचनार्थः । कीदृशः कंदर्पः शार्दूलविक्रीडितं व्याघ्रचेष्टितं विरचयन् मृगीमरणं शार्दूलादेव भवति ॥ १ ॥

भा०टी० हे माधवजी ! हरणी जैसे सार्दूलसे भयमान होकर धावमान दौडती है, और दुर्भाग्यके हेतु ज्वालितवनमें प्रवेश होकर जालमे बद्ध हो-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जाति है. एवं दुर्दशाको प्राप्त होति है, तैसेहि राधाजीकी अवस्था तुह्मारे विरहसे नितान्त मन्द होगयी है। उनका निवास स्थान ज्वलितमानकाननके तुल्य होगयाहै; सब सखियां उनके कारण जालके तुल्य होरहि हैं और उनके श्वास शरीरके दहनकारी है दुष्ट कामदेव निरन्तर राधाजीके पश्चात् व्याधसमान धावमान होताहै॥ १॥

इदानीं सखी पुनरपि राधाया दुःखचेष्टितं गीतेनाह—

अथ नवमः प्रबंधो देशाखरागेण एकतालीताले गीयते

स्तनविनिहितमपि हारमुदारं॥ सा मनुते कृशतनुरिव भारं॥ १॥ राधिका विरहेतव केशव॥ ध्रु०॥

सं०टी० स्तनेति। गीतस्यास्य देशाखराग एकतालीतालः। तल्लक्षणं "आस्फोटनाविष्कृतरोमहर्षो नियुद्धसन्नद्धविशालबाहुः"। हे केशव कृष्ण तव विरहे जाते सति सा राधा एवं चेष्टते। कीदृशमित्यतआह कृशतनुः विरहकृशशरीरा सा स्तनविनिहितमपि स्तनयोः स्थापितं उदारं बहुमूल्यं हारमपि भारमिव मनुते॥ १॥

भा०टी०हे माधव! राधाजीका देह तुह्मारे विरहसे इतना क्षीण होगया है कि जो कण्ठदेशमें हार विराजमानथा, उसका भारभी राधाजीसे ग्रहण नहि हो सक्ता है॥ १॥

सरसमसृणमपि मलयजपंकं॥ पश्यति विषमिव वपुषि सशंकं॥ २॥

सं०टी० सरसमिति। सा राधा सरसमसृणं सार्द्रचिक्कणद्रवरूपं मलयजपंकमपि चन्दनलेपमपि वपुषिं सशंकं विषमिव पश्यति तव विरहात्॥ २॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०हे माधव राधाजीके सुन्दर शरीरमें जो चन्दन लिप्त होरहा है वह उसको विषके सदृश प्रतीत होरहा है; अर्थात् बहुत कष्टके देनेवाला है ॥ २ ॥

श्वसितपवनमनुपमपरिणाहं ॥ मदनदहनमिव वहति सदाहं ॥ ३ ॥

सं०टी० श्वसितेति । सा राधा श्वसितपवनं निश्वासवायुं मदनदहनमिव कामाग्निमिव वहति धारयति वायोरपि दाहकत्वात् । कीदृशं अनुपमः उपमारहितः परिणाहो विशालता यस्य तं अतिदीर्घं सदाहं उष्णत्वाद्दाहयुक्तं ॥ ३ ॥

भा०टी०हे माधव ! राधाजीका श्वास वायु केवल कामाऽनलके समान होरहा है ॥ ३ ॥

दिशिदिशि किरति सजलकणजालं ॥ नयननलिनमिव विगलितनालं ॥ ४ ॥

सं०टी०दिशीति । सा राधा सजलकणजालंअश्रुबिंदुसमूहसहितं नयनमेव नलिनं पद्मं दिशिदिशि भवद्दर्शनवांछया विकिरति क्षिपति । कीदृशमिव विगलितदण्डमिव सर्वतः पश्यतीत्यर्थः ॥ ४ ॥

भा०टी० हे माधव राधाजीका अश्रुजल दोनोहि नयनोको पूर्णित कर रहाहै, और वे नयन अभी मृणाल भ्रष्ट एवं नीरस्थित कमलके तुल्य चलित होरहे है ॥ ४ ॥

नयनविषयमपि किसलयतल्पं ॥ कलयति विहितहुताशविकल्पं ॥ ५ ॥

सं०टी० नयनेति । सा राधा नयनविषयमपि नेत्रगोचरमपि किसलयतल्पं पल्लवशयनीयं विहितः कृतः हुताशस्याग्नेः विकल्पः संशयो यत्र तं अतिसंतापजनकत्वात् तादृशं कलयति मनुते ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा० टी० हे माधव राधाजीने अपने निर्मित पल्लव शय्याको वारंवार निरीक्षण करके उसको अग्निमय छान करती है ॥ ५ ॥

त्यजति न पाणितलेन कपोलं ॥ बालशशिनमिव सायमलोलं ॥६॥

सं०टी० त्यजतीति । सा पाणितलेन हस्ततलेन कपोलं गंडस्थलं न त्यजति शंकितत्वात् । कमिव सायं संध्याकाले अलोलं निश्चलं बालशशिनमिव द्वितीयाचंद्रमिव । हस्तेनाच्छादितत्वात् संध्यासाम्यम् ॥ ६ ॥

भा०टी० हे माधव राधाजीने केवल तुह्मारेहि विरहसे अपने मलीन मुख अपने लोहित हस्ततलपर राखे है; और वह भाव देखनेसे ऐसा प्रतीत होताहै कि, सायंकाल की औरमें बालचंद्रमा उत्थित हो रहा है ॥६॥

हरिरितिहरिरिति जपति सकामं ॥ विरहविहितमरणेव निकामं ॥ ७ ॥

सं०टी० हरिरिति । सा निकाममतिशयेन सकामं साभिलाषं हरिर्हरिरिति जपति । कथंभूतेव विरहेण त्वद्वियोगेन विहितं कृतं मरणं यस्याः सेव । अन्येपि मरणे हरिंरिति मंत्रं जपंति ॥ ७ ॥

भा०टी० हे माधव! राधाजी तुम्हारे विरहसे मृत सदृश होकर केवल अपने हृदयमें हरिजीका नाम जपती है ॥ ७ ॥

श्रीजयदेवभणितमिति गीतं ॥ सुखयतुकेशवपदमुपनीतं ॥ ८ ॥ इति श्रीगीतगोविंदे नवमः प्रबंधः ॥९॥

सं०टी०श्रीजयदेवेति।श्रीजयदेवोक्तं इति पूर्वगीतं केशव एव पदं विश्रांतिस्थानं यस्य तत् भक्तं सुखयतु । कीदृशं केशवपदं उपनीतं उपस्थितीकृतं ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०श्रीमान् जयदेव स्वामी कृत यहिं भगवान्का गीत सकलभ-क्तजनोंको सुखके देवेवाला है ॥ ८ ॥

अधुना सा तव विरहेणावश्यं म्रियत इति सूचयन् शार्दूलविक्रीडितवृत्तेन श्लोकेनाह—

सा रोमांचति सीत्करोति विलपत्युत्कंपते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ॥
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्स्ववैंद्य
प्रतिम प्रसीदसि यदि त्यक्तोन्यथा हस्तकः॥ १ ॥

सं०टी० सारोमांचतीति । हे स्ववैंद्यप्रतिम अश्विनीकुमारतुल्य यदि त्वं प्रसीदसि प्रसन्नो भवसि वरतनुः सुकुमारांगी सा राधा एतावति अतनुज्वरे सति तव रसात्किन्न जीवेत् अपि तु जीवेदेव। रसः शृंगारः औषधं च। अन्यथा प्रसन्नताभावे हस्तकः हस्तालंभस्त्यक्तः । ज्वरे सति एते व्याधयो भवंति ते तस्यां वर्तंत इत्याह सा राधा रोमांचति सरोमांचा भवतीत्यर्थः । सीत्करोति सीत्कारशब्दं करोतीत्यर्थः । विलपति विलापं करोति । उत्कंपते सकंपा भवति । ताम्यति ग्लानियुक्ता भवति। ध्यायति चिंतयति । उद्भ्रमति उच्चैर्भ्रांता भवति । प्रमीलति नेत्रनिमीलनं करोति । पतति शय्यादौ गच्छति । उद्याति उच्चैर्गच्छति । मूर्छति मूर्छां प्राप्नोति। ज्वरिणः पुरुषस्य एतावद्भवतीति ॥ १ ॥

भा०टी०हे अश्विनी कुमार अर्थात् वैद्यश्रेष्ठ कभी राधा विरह स्वरूप विकारसे ज्ञान शून्य होरही है ; कभी उनके शरीरमें कंपहोताहै, कभी राधा विलापकरके बहुत रोदन करतीहै कभी भ्रमयुक्त वचन बोलती है कभी नेत्रोको मुंदित करतीहै और कभी भूमिमें पतित होजातीहै इस पीडाकी शान्तिके लिये बहुत प्रकार की चिकित्सा होती है, किन्तु कुछ उपकार न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ही होताहै । हे माधव ! इस पीडाकी शान्तिके लिये तुमहि केवल वैद्य श्रेष्ठहै इस कारण कृपाकरके राधाजीकी पीडाकी शान्तिको विधान करो ॥ १ ॥

पुनरुपेंद्रवज्रावृत्तेनाह–

स्मरातुरां दैवतवैद्यहृद्य त्वदंगसंगामृतमात्रसाध्यां ॥
विमुक्तबाधां कुरुषे न राधामुपेंद्रवज्रादपि दारुणोसि ॥ २

सं॰टी॰ स्मरातुरामिति । हे दैवतवैद्यवत् अश्विनीकुमारवत् हृद्य सुंदर हे उपेंद्र इंद्रानुज त्वं राधां विमुक्तबाधां त्यक्तपीडां न कुरुषे अतो वज्रात्कुलिशादपि दारुणोसि अधिकविषमोसि । स्मरातुरां कामार्तां । पुनः कीदृशीं त्वदंगसंगस्तव शरीरसम्बंध एवामृतं तन्मात्रेण साध्यां प्रतिकार्यां ॥ २ ॥

भा॰टी॰ हे देवता वैद्यजी यदि तुम अपने शरीर स्पर्शस्वरूप औषधी को दे कर मदनपीडित श्रीराधाजीको स्वस्थ नहि करोगे तब हम मालुम करलेवेगे जो तुम्हारा हृदय देवराज इन्द्रके वज्रसेभी कठिन है ॥ २ ॥

एवंविधापि राधा त्वच्चिंतनेनैव जीवतीत्याह–

कंदर्पज्वरसंज्वराकुलतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमः कमलिनीचिंतासुसंताम्यति ॥ किंतु क्षांतिवशेन शीतलतनुंत्वामेवमेकं प्रियं ध्यायंती रहसिस्थिता कथमसौ क्षीणा क्षणं प्राणिति ॥ ३ ॥

सं॰टी॰ कंदर्पेति । हे कृष्ण अस्या राधायाश्चेतो मनः चिरं चिरकालं चन्दनस्य चन्द्रमसः कमलिन्याश्च चिंतासु स्मरणेष्वपि सन्ताम्यति ग्लानिं प्राप्नोति । इदं महदाश्चर्यं । कीदृश्या अस्याः कन्दर्पज्वरेण तापेन यः संज्वरःपीडा तेनाकुला चंचला तनुः शरीरं यस्यास्तस्याः । किंतु रहसि एकान्ते स्थितासौ राधा त्वामेवं एकं असाधारणं प्रियं वल्लभं ध्यायति ।क्षणं मुहूर्तं क्षांतिवशेन क्षांत्या–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृततया । त्वत्कांतिवशेनेतिपाठः । तदा अस्मिन्क्षणेनायातः क्षणांतरे आगमिष्यतीति अनुरागेण कथं प्राणिति जीवतीति । कथमिति प्रश्ने । कीदृशी क्षीणा कृशांगी ॥ ३ ॥

भा०टी०हे माधव राधाजीने अनंग पीडासे चन्दन प्रभृति लेपनोंका नाम श्रवण करनेसे एकान्त विरमन होति है । श्रीराधाजी केवल एक तुम्हारे नामको श्रवण लेकर अतिशय क्लेशके साध्य दिन अपने व्यतीत कर रहीहै ॥३॥

पुनरपि उद्दीपनविभावेन विरहोद्रेकं पुष्पिताग्रावृत्तेनाह–

क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नया यया ते ॥ श्वसिति कथमसौ रसालशाखां चिरविरहेण विलोक्य पुष्पिताग्रां ॥ ४ ॥

सं०टी०क्षणमिति। हेकृष्ण यया राधया ते वियोगः पुरा पूर्वं क्षणमपि न सेहे न सोढः । कीदृशा राधया नयनयोर्नेत्रयोर्निमीलनेन निरंतरदर्शनघाताच्चक्षुर्निमेषेण खिन्नया दुःखितया । असौ राधा चिरविरहेण तव चिरवियोगेन कथं केन प्रकारेण श्वसिति जीवतीति न ज्ञायते । किं कृत्वा वसंते पुष्पितोग्रभागो यस्यास्तां रसालस्याम्रस्य शाखां विलोक्य दृष्ट्वा ॥ ४ ॥

भा०टी०हेमाधव ! जो राधाने कभी घडी पलके लिये तुम्हारे विरह की पीडाको सहन नहि किया अभी नवीन आम्रकी कलियाको देखकर तौ न किस तरहासे अपने जीवन को धारणकरती है । हे माधवजी ! इससे अन्य क्या आश्चर्य है ॥ ४ ॥

इदानीं कथोपक्रमं त्यक्त्वा कविर्भक्तानाशिषयति शार्दूलविक्रीडितवृत्तेन–

वृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्धनं बिभ्रद्वल्लवसुंदरीभिरधिकानंदाच्चिरं चुंबितः ॥ कंदर्पेण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदर्पिताधरतटीसिंदूरमुद्रांकितो बाहुर्गोपतनोस्तनो तु भवतः श्रेयांसि कंसद्विषः ॥ ५ ॥

सं॰टी॰ वृष्टीति। गोपतनोर्गोपशरीरस्य कंसद्विषः कृष्णस्य बाहुर्हस्तो भवतस्तव भक्तस्येत्यर्थः श्रेयांसि कल्याणानि तनोतु विस्तारयतु। कथंभूतो बाहुः वृष्ट्या जलवर्षेण व्याकुलस्य दुःखितस्य गोकुलस्य गोपसमूहस्य अवनं पालनं तत्र रसोनुरागो वीर्यं वा तस्माद्गोवर्द्धनं पर्वतं उद्धृत्य उत्पाट्य चिरं सप्ताहं बिभ्रत् धारयन्। पुनः कीदृशः बल्लवीभिर्गोपीभिरधिकानंदादतिहर्षाच्चुंबितः कंदर्पेण कामवशात्ताभिर्गोपीभिः अर्पिताः स्थापिताः अधरतट्य एव सिंदूरचिह्नानि लोहितत्वात् तैरंकितश्चिह्नितः॥ ५ ॥

भा॰टी॰जब कृष्णचन्द्र महाराजजी देवराज के क्रोध स्वरूप दृष्टिसे भयमान गोकुल वासियोको परित्राण हेतु गोवर्धन पर्वतको उठाकर कनिष्ठा अंगुलीपर धारण कियाथा तब सर्व व्रज सुंदरीयोंने अतिशय आनंद पूर्ण होकर कृष्णजीके हस्तोंको वारंवार चुम्बन किया था और इस समयमे उन्होंके ललाटस्थ सिंदूरसे वे हस्त रञ्जितहुयेथे। कंससूदन कृष्णजीके वे हस्त तुम्हे मंगल करे ॥ ५ ॥

इति श्रीकविराजश्रीजयदेवकृते गीतगोविंदे महाकाव्ये स्निग्धमाधवो नाम सटीकश्चतुर्थः सर्गः ४

अथ पंचमः सर्गः प्रारभ्यते

इदानीं कृष्णप्रेरिता सखी राधामाह—

अहमिह निवसामि याहि राधामनुनय मद्वचनेन चानयेथाः ॥ इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधाम् ॥ १ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी० अहमिति । इति मधुरिपुणा कृष्णेन नियुक्ता प्रेरिता सखी स्वयमेत्य इदं वक्ष्यमाणं राधां पुनर्जगाद ऊचे । इतीति किं हे सखि अहमिह कुंजे निवसामि स्थितोस्मि त्वं राधां प्रति याहि अनुनय च सांत्वय मद्वचनेन मद्वचसा राधामानयेथाश्च आनयस्व इति ॥१॥

भा०टी० कृष्णका राधाके वास्ते दूती सम्प्रेषण याने अपना सन्देश सखी के मार्फत कहना मै इस निर्जनस्थानमै याने एकान्तमै बैठारहूंगा तू राधाके पास जा उसका कोप शान्तकर और उस्को यहां ल्या इतना कहकर कृष्णने सखी भेजी आप राधाके पास जाकर फिर कृष्णका हाल कहतीभई ॥१॥

यत्सखी जगाद तदेव गीतेनाह—

अथ दशमप्रबंधो वराडिरागेण रूपकताले गीयते॥

वहति मलयसमीरे मदनमुपनिधाय ॥ स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ॥ १ ॥ तव विरहेवनमाली सखि सीदति ॥ ध्रु० ॥

सं०टी० वहतीति । गीतस्यास्य वराडी रागः रूपकतालः तल्लक्षणं " विनोदयंती दयितं सुकेशी सुकंकणा चामरचालनेन । कर्णे दधाना सुरपुष्पगुच्छं वरांगनेयं कथिता वराडो" । अभिसारिका नायिका वर्णनीया रसिकरसत्वे " संस्कृता प्राकृता मित्रा ततोपभ्रंशभाषणा । ततः प्रियतरा वेश्या सर्वतश्चाभिसारिका „ इति । तस्या लक्षणं भरतेनोक्तं "लज्जां हित्वा समाकृष्य यौवनेन मदेन वा । अभिसारयते कांतं कीर्त्तिता साभिसारिका" । गीतार्थस्तु हे सखि राधे त्वद्विरहेत्वद्वियोगे वनमाली कृष्णः सीदति दुःखितो भवति । कस्मिन्सति मदनं कामं उपनिधाय सहायं कृत्वा मलयसमीरे दक्षिणसंबंधिनि पवने वहति सति विरहिणां वियोगिनां हृदयदलनाय आस्फोटनाय कुसुमानां निकरे समूहे स्फुटति सति विकसति सति ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०दिनके तृतीयप्रहरमै वराटी राग रूपक तालसें गाया जाताहै सखीका वाक्य राधासे हे सखि जब सुगंधि वायु चलताहै और वियोगि जनोंके हृदयभेदन याने छातीके तोडनेके वास्ते पुष्प फुल्लित होतेहैं उसवख्त तेरे विरहमै अन्त्यत कामव्यथा पाकर श्रीकृष्ण बडे खेदको प्राप्तहोते हैं याने दुःखी होतेहैं ॥ १ ॥

दहति शिशिरमयूखे मरणमनुकरोति ॥ पततिमद नविशिखेविलपतिविकलतरोऽति ॥ २ ॥

सं०टी० दहतीति। हेराधे सः कृष्णः शिशिरमयूखे हिमकरे दहति सति संतापं जनयति सति मरणमनुकरोति दशमावस्थाजनितपीडामनुभवति त्वत्प्राप्त्याशया कष्टेन जीवनं धारयतीत्यर्थः मदनविशिखे कामबाणे पतति सति अति विलपति अतिशयेन विलापं करोति। कीदृशः कृष्णः विकलतरः विह्वलतरः ॥ २ ॥

भा०टी०जब चन्द्रमा अग्नि तुल्य किरणोंसे दाहकर्त्ता है उसवख्त कृष्ण मृतप्राय याने मृत्युके तुल्य क्लेश पाताहै जब कंदर्पके बाण चलतेहै तब वेहोशहोकर रोताहै अर्थात् चन्द्रमा तो संतापहारक था परंतु विरहीकों सुगंध चन्द्रादिक जो कोई सुखदायक वस्तू हैं वे दुःखदायक होते है। यह विषयद्वेषनामक छठी अवस्थाका वर्णन है ॥ २॥

ध्वनति मधुपसमूहे श्रवणमपिदधाति ॥ मनसि वलितविरहे निशि निशि रुजमुपयाति ॥ ३ ॥

सं०टी० ध्वनतीति। मधु पिबंति ते मधुपा भ्रमरास्तेषां समूहे ध्वनति शब्दं कुर्वति सति श्रवणं कर्णौ अपिदधाति अंगुल्यग्रेणाच्छादयति। मनसि वलितविरहे सति निशिनिशि प्रतिरात्रं रुजं पीडां उपयाति प्राप्नोति ॥ ३ ॥

भा०टी०भ्रमरोंका शब्द सुनकर कर्णोंको हाथसें बन्द कर्त्ता है जब विरह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यथा बढतीहै तब रात्रिमै क्लेशको प्राप्तहोताहै अर्थात् भ्रमरोंका बोलनाभी कानोंमें नहिं सहाराजाताथा ॥ ३ ॥

वसति विपिनविताने त्यजति ललितमपि धाम ॥
लुठति धरणिशयने बहुविलपति तव नाम ॥ ४ ॥

सं॰टी॰ वसतीति । स विपिनविताने अरण्यविस्तारे वसति तिष्ठति । ललितमपि धाम सुंदरमपि गृहं त्यजति । पृथ्वीशय्यायां लुठति विचेष्टते । तव नाम बहु अनेकवारं विलपति अथ वा धामशरीरं अखिललावण्यास्पदं श्रीविग्रहमपि त्वां विना नाशास्त इत्यर्थः ॥४॥

भा॰ टी॰श्रीकृष्ण उत्तमघरको छोडकर निर्जनवनमैं बैठेहै तेरे विरहकी बाधासें जमीनमे लोटतेहै वारवार हेराधेहेराधे कर्के तेराही नाम जपतेहैं ॥४॥

रणतिपिकसमवाये प्रतिदिशमनुयाति ॥ हसति
मनुजनिचये निजविरहमपलपति नेति ॥ ५॥

सं॰टी॰रणतीति । पिकसमवाये पिकानां कोकिलानां समवायः समुदायः तस्मिन् रणति कूजति सति । अणरणवणभणशब्दार्थाः । तस्मात्लटः शता । प्रतिदिशम् दिशंदिशमिति प्रतिदिशम् अव्ययंविभक्तीत्यादिना समासः । अनुयाति कोकिलरवं श्रुत्वा त्वच्छब्दाभासेन तदनुयातीति भावः । मनुजनिचये मनुजानां मनुष्याणां निचये समूहे हसति सति निजविरहं त्वद्वियोगजं विरहं न इति त्वं माभूः इति अपलपति निर्भर्त्सयति । लोकानां सर्वत्रानन्दे स्वीयदुःखतिरस्कारस्य सर्वत्रैव प्रसिद्धिः । लपेः शब्दार्थत्वाद्विकर्मकत्वम् । माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादिवत् ॥ ५ ॥

भा॰टी॰और कोकिलोंका समूह जब मंजुल शब्द करताहै , तब दिशादिशाओंमें सब दूर तेरे शब्दके भांतिसें दृष्टिदेताहै और जब मनुष्योंका समुदाय हंसताहै , तब अपनेको होनेवाला जो तेरा विरहहै, तिस विरहकी निंदा करता-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

है । लोक दूसरे सब लोगोंकूं सुखहुआ देखकर अपनेको जो दुःख होताहै, तिसदुःखका तिरस्कार करतेहैं. यह वार्ता सर्वत्र प्रसिद्धहींहै ॥ ५ ॥

स्फुरति कलरवरावे स्मरति भणितमेव ॥ तवरति सुखविभवे बहुगणयति सुगुणमतीव ॥ ६ ॥

सं०टी० स्फुरतीति । कलरवरावे कलोमन्द्रः रवःशब्दो येषांते-पक्षिणः तेषां रावे शब्दे स्फुरति समुत्पादयति सति भणितं त्वत्कृ-तं सम्भाषणं स्मरति 'भणितं रतिकूजितम्' इत्यमरः । तत्स्मृत्वा अग्रे किमित्यत आह । तव रतिसुखविभवे तव क्रीडासुखोत्पत्तौ त-त्सुखं बहु अतीव सुगुणं यथा तथा गणयति मनुते ॥ ६ ॥

भा०टी० और मंजुल शब्द करनेवाले पक्षियोंका जब मधुर शब्द होताहै, तब तेरे भाषणका स्मरणकरताहै. तथा तेरे सुरतसंबंधी सुखके वैभवमें अत्यं-त उत्कृष्ट गुण मानताहै ॥ ६ ॥

त्वदभिधशुभदमासंवदति नारि शृणोति॥तमपि ज पति सरसं परयुवतिषु न रतिमुपैति ॥ ७॥

सं०टी० त्वदिति । नरि मनुष्ये त्वदभिधशुभदमासं तवाऽभि-धो राधाभिधः शुभदश्चासौ मासः वैशाख इत्यर्थः । "वैशाखे माध वो राधः" इत्यमरः एकदेशविकृतमनन्यवत् । वदति गायति सति शृणोति तत्र लक्ष्यं ददाति । तच्छ्रुत्वा तमेव सरसं रसेन युक्तं यथा तथा जपति एवमपि परस्त्रीषु त्वदन्यस्त्रीषु रतिं सुखं न उपैति न प्राप्नोति ॥ ७ ॥

भा०टी० और हे राधे ! तेरे नामका जो महीनाहै, अर्थात् राध कहिये वैशाख नामका जो मासहै, तिस राधमासको कोई मनुष्यनें उच्चार किये हुए जब सुनताहै, तब बडे प्रीतिकर्के तिस वैशाख मासके पर्यायवाचक राध शब्द कोंहीं जपताहै, परंतु कोईभी अन्य स्त्रियोंमें प्रीति नहीं करताहै. ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भणति कविजयदेव इति विरहविलसितेन ॥ मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥ ८ ॥

इति श्रीगीतगोविंदे दशमः प्रबंधः ॥ १० ॥

सं०टी० भणतीति । कविजयदेवे इति हरेः विरहस्य वियोगस्य विलसितेन विलासितेन भणति सति वियोगचेष्टितं कथयति सतीत्यर्थः । हरिः कृष्णः मनसि जयदेवसंबंधिचित्ते सुकृतेन पूर्वार्जितपुण्येन हेतुना उदयतु उदयं प्राप्नोतु कीदृशे मनसि रभसस्य हर्षस्य विभव आधिक्यं यस्मिन् ॥ ८ ॥

भा०टी०जयदेव कविके कहेहुए इस विरहवर्णन रूप गीतके पुण्यसें मनमे हरिका ध्यानहोइ ॥ ८ ॥

किंच त्वत्प्राप्त्यर्थं तपः करोतीत्याह-

पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थेपुनर्माधवः॥ ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमंत्रावलिं भूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतंवांछति ॥ १ ॥

सं०टी० पूर्वमिति । श्रीकृष्णस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे- निकुंजमेव लतागृहमेव मन्मथमहातीर्थं कामतीर्थं तत्र पुनस्त्वां अनिशं वारंवारं ध्यायन् तवैव आलापमेव संभाषणमेव मंत्रावलिं मंत्राक्षरसमूहं जपन्निव भूयः पुनरपि त्वत्कुचकुंभनिर्भरपरीरंभामृतं त्वदीयस्तनकलशगाढालिंगनं पीयूषमिवामृतमिव वांछति । तस्मिन् कस्मिन् यत्र महातीर्थे त्वया समं पूर्वं रतिपतेः कामस्य सिद्धयो मनोरथाः आसादिताः प्राप्ता यथा सिद्धिप्राप्त्यनंतरं मोक्षामृतं प्राप्यते तद्वत् ॥ १ ॥

भा०टी०फिर सखी राधासें कहतीहै पहिले श्रीकृष्णने जिस जगमैं तेरे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साथ कामदेवकी सिद्धि याने चुंबन आलिंगन सम्भोगादि पाईथी फिर उसी निकुञ्ज यानै सघन वृक्षसमूहके मध्य वही जो कामका बडा तीर्थ है उस्मै बरावर श्रीकृष्ण तेरा ध्यानकर्तेहैं और तेरा नामरूप मंत्रको जपतेहैं वार-वार तेरे छातीके आलिंगनकी इच्छाकरतेहै जैसा कोई सांसारिक जन्मजरा-मरणादिकोसे खिन्नहुआ किसी तीर्थमे एकान्त जगैमै मुक्तिके अभिलाषसे ईश्वरका चिन्तनकर्त्ताहै ऐसाही कृष्ण तेरे वास्ते कर्ते हैं ॥ १ ॥

अथ एकादशप्रबंधः केदाररागेण एकतालीताले गीयते।

रतिसुखसारे गतमभिसारे मदनमनोहरवेषं ॥ न कुरु नितंबिनि गमनविलंबनमनुसर तं हृदयेशं ॥ १ ॥ धीरसमीरे यमुनातीरे वसति वने वनमाली ॥ गोपीपीनपयोधरमर्दनचंचलकरयुगशाली ॥ध्रु०॥

सं०टी० रतीति । गोपीपीनपयोधरयोर्मर्दनेन चंचलेन करयुगेनाढ्यः । "आढ्यः शालीति विख्यातः" हेराधे यमुनातीरे वने यमुनातीरविषये वने अथवा वेतसवने वनमाली श्रीकृष्णो वसति । किंभूते वने धीरो मंदः समीरो वायुर्यत्र एतेन वायोस्त्रैविध्यमुक्तं यस्याश्च स्थानोत्कंठा जनिता इति ध्रुवपदम् । हेनितंबिनि त्वं तं वनमालिनमनुसर अनुगच्छ गमनविलंबनं अभिसाराय कालातिक्रमं न कुरु मा कृथाः हेनितंबिनि बृहन्नितंबत्वाच्चलितुं न शक्नोतीति तां त्वरयति । किंभूतं रतिः संभोगसुखं सारमुत्कृष्टं यत्र अभिस्रियतेऽस्मिन्नित्यभिसारः संकेतस्थानं तत्र गतं प्राप्तं । पुनःकथंभूतं हृदयेशं तवमनस्तदधीनमित्यर्थः । आयुरेवेदमितिवत् केवलसुखहेतुत्वात् शमेव ॥ १

भा०टी०हे राधे सम्भोग सुखका सारभूत संकेतस्थानमै श्रीकृष्ण गयेहैं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जिनका कन्दर्पसमान उत्तमरूप है ऐसे कृष्णके पास तू चल देर मतकर गोपीयोंके कठिन स्तनोके मर्दन कर्नेमै अतिचपल दोनू हाथ जिनके हैं ऐसे श्रीकृष्ण मन्दमन्द सुगन्ध वायु जहां चलताहै ऐसे यमुनातीरमै बैठे हैं॥ १॥

अपिच—

नामसमेतं कृतसंकेतं वादयते मृदु वेणुं॥ बहु मनुते
तनुते तनुसंगतपवनचलितमपि रेणुं ॥ २ ॥

सं०टी०नामसमेतमिति। हेराधे हरिः मृदुवेणुं कोमलं वंशं वादयते। मृद्विति क्रियाविशेषणं॥ कथं यथा स्यात् तव नामाक्षरसंयुक्तं कृतसंकेतं यथास्यात्तथा च पुनः ततो वने तनुसंगतपवनचलितं रेणुमपि बहु मनुते। कथं यथा भवति अतनु अनल्पं यथा भवति॥ २॥

भा०टी०तेरे नामके संकेतसें याने त्वत्परहोकर मधुर स्वरसें वांसुरीबजातेहैं तेरे शरीरसे मिल कर्के चलताहुआ जो वायूहै उसकी उडाई हुई धूलीकोभी प्यारकर्तेहै ॥२ ॥

पतति पतत्रे विचलति पत्रे शंकितभवदुपयानं॥
रचयति शयनं सचकितनयनं पश्यति तव पंथानं॥३॥

सं०टी०पततीति। हेराधे कृष्णः शयनं रचयति तव पंथानं पश्यति कथं भवति सचकितनयनं यथा स्यात्। किंभूतं तव पंथानं शंकितं भवत्या उपयानं आगमो यत्र तं पुंवद्भावात् भवतीशब्दस्य पुंस्त्वं। क्व सति पतत्रे पक्षिणि पतति वृक्षांतरं गच्छति सति। पुनः क्व सति वृक्षपत्रे चलति सति॥ ३॥

भा०टी०जब इधर उधरसे पक्षी जाते आते हैं और वृक्षोंसें पत्ते गिरते हैं तो श्रीकृष्ण चारूं तर्फ तेरा मार्ग देखते है और पत्तोंकी शय्या याने विस्तर तयार कर्ते हैं॥ ३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुखरमधीरं त्यज मंजीरं रिपुमिव केलिसुलोलं ॥
चल सखि कुंजं सतिमिरपुंजं शीलय नीलनिचोलं॥४॥

सं०टी०मुखरमिति। हेसखि राधे त्वं कुंजं चल। अभिसारानुरूप सामग्रीं शिक्षयति। मंजीरं नूपुरं त्यज किंभूतं नूपुरं अधीरं अज्ञं अतएव मुखरं वाचालं अभिसारोचितं न जानाति । अथवा साध्वेत न्मंजीरस्य मुखरस्य यतो निमित्तवन्नैमित्तिकं। कुतः मंजीरमधीर-मित्युक्तेः।पुनः किंभूतं केलौ क्रीडायां सुलोलं अतएव रिपुमिव। अपिच। नीलनिचोलं नीलं कृष्णं वस्त्रं शीलय परिधेहि। किंवि-शिष्टं कुंजं तिमिरपुंजेन सहितं अथवा सतिमिरं पुंजं यथा स्यात्तथा चल। उद्द्योतहीनाभिसारोयुक्तः॥ ४ ॥

भा०टी०वारवार शब्द कर्नेवाला इसीकारण सम्भोग कालमै शत्रुभूत ऐसे नूपुरको छोडदे काला वस्त्र ओढकर संकेत केलिकुञ्जमै जिसमे घना अंधेरा होरहाहै अभी चल॥ ४॥

उरसि मुरारेरुपहितहारे घन इव तरलबलाके ॥
ताडिदिव पीते रतिविपरीते राजसि सुकृतविपाके॥५॥

सं०टी०उरसीति। हेपीते पीतवर्णे गौरि त्वं मुरारेः उरसि सुकृत विपाके दुरापपरिणामे राजसि राजयिष्यसि। वर्तमानसामीप्ये लट्। किंविशिष्टे उरसि उपहितहारे आरोपितहारे। कथं कस्मिन्निव तर-लबलाके घनइव मेघइव चंचलपक्षिविशेषे। केव तडिदिव कदा रति-विपरीते पुरुषायितसुरतसमये उपहितहारं उरः तरलबलाका घने-नोपमीयते। सा पीता तडित् तस्यां पुरुषायितत्वे चंचलत्वं॥५॥

भा०टी०जैसे काले बदलमै विजली चमकतीहै ऐसेही मोतीयोके हार पहिने हुये श्रीकृष्णके छातीके उपर विपरीत रतीमै पुण्यका परिपाक भो-गतीहुई शोभायमान होगी॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विगलितवसनं परिहृतरशनं घटय जघनमपिधानं॥
किसलयशयने पंकजनयने निधिमिव हर्षनिदानम्६॥

सं०टी०विगलितेति। हे राधे किसलयशयनीये वर्तमाने पंकजनयने पुंडरीकाक्षे जघनं घटय आरोपय। किंभूतं विगलितवसनं स्वयमेव तत एव परिहृतरशनं त्यक्तमेखलं। अतएव वसनाभावात् अपिधानं पिधानरहितं। अतएव निधिनोपमीयते। किमिव निधिमिव। किंभूतं निधिं हर्षनिदानं हर्षस्य आदिकारणम्॥ ६॥

भा०टी०हेकमलनेत्रे पत्रोंकि शय्यामै कांछनी खोलकर और कपडे खोलके रतिकेलीमै रत्नभूत ऐसे जघनको नग्न कर्के श्रीकृष्णको प्रसन्न कर॥ ६॥

अपिच-

हरिरभिमानी रजनिरिदानीमियमपि याति विरामं॥
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामं॥७॥

सं०टी० हरिरिति। हेराधे सत्वररचनं शीघ्रसाधनं यथास्यात्तथा मम वचनं कुरु। किं तन्मम वचनं मधुरिपुकामं श्रीकृष्णवांछां पूरय। न चेत्किं स्यात् हरिरभिमानी अतो लाघवं न सहते पश्चात्त्वां त्यक्ष्यति पश्चादपि करिष्यसे चेत् इदानीमेव कुरु अन्यथेयं रात्रिरपि विरामं अवसानं याति गच्छति आभिसारिककालोपि यास्यति॥७॥

भा०टी० श्रीकृष्ण तेरे नहीं आनेमें रुष्ट होकर चलेजावेंगे और रात्रीभी थोडी रहीहै इसवास्ते मेरा वचन मानकर जल्दी चलके श्रीकृष्णके मनोभिलाषको पूर्णकर॥ १४॥

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयं॥ प्र
मुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयं८

इति श्रीगीतगोविंदे एकादशः प्रबंधः॥ ११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०श्रीजयदेवइति। हेवैष्णवाःहरिं नमत नमस्कुरुत। किंभूतं हरिं श्रीजयदेवे सदयंकिंविशिष्टे श्रीजयदेवे परमरमणीयं इदं पूर्वोक्तं भणति कथं प्रमुदितहृदयं। किंभूते कृतहरिसेवे। किंभूतं हरिं सुकृतमिव कमनीयं सुकृतेन वा कमनीयं अभिलक्षणीयम्॥ ८॥

भा०टी० हरिभक्त श्रीमान् जयदेव कवी कहतेहै भक्तलोकोंके प्रति प्रसन्न चित्तहोकर दयामें पुण्यपरंपराकर्के रमणीय ऐसे हरिके वास्ते प्रणामकरो ८॥

इदानीं सत्वरगमनाय प्रोत्साहयति—

विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते प्रविशति मुहुः कुंजं गुंजन् मुहुर्बहु ताम्यति॥ रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लांतः कांते प्रियस्तव वर्तते॥ १॥

सं०टी० विकिरतीति। हेकांते तव प्रियः मदनेन कदनं ग्लानिः तेन श्रांतःक्लांतःतथाविधः सन् किंकरोतीत्याह त्वंनागतैवेति कृत्वा मुहुः श्वासान्विकिराति निःश्वासधाराःमुंचति पुरः अग्रे मुहुर्वारंवारं आशाः दिशःईक्षते विलोकयति च व्याकुलतया कस्या दिशः आगमिष्यतीति सर्वादिशः एककालमवलोकयतितत्राप्यदृष्ट्वा बहिर्निर्यातस्तत्रैव निन्हुतइव तिष्ठतीति मुहुर्मुहुः प्रविशति वारंवारं कुतोनागता किं केन विनिवारिता उत कुतो भयाद्वा इत्यादितस्याअनागमनहेतुं विमृश्य मुहुर्वारंवारं अव्यक्तशब्दं ताम्यति ग्लापयति। अथवा वृथेदं विमर्शनं आगमिष्यत्येवेति मुहुः शय्यां रचयति तथाप्यदृष्ट्वा पर्याकुलं यथा स्यात्तथा ममानुरागादधुना आगमिष्यत्येवेति मुहुरीक्षते इति कदनशब्दस्य तात्पर्यं। हरिणीच्छंदः दीपकालंकारः॥ १॥

भा०टी० फिर सखी राधासें कहतीहै हेसुन्दरि तेरे विरहसें श्रीकृष्णकी यह दशाहै वारवार मुखसें निश्वास छोडतेहैं वारवार चारोंतर्फ दिशाओंको दे-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खतेहैं वारवार केली कुञ्ज मै प्रवेशकर्त्ते हैं फिरफिर अति व्याकुल होकर तेरा रस्ता देखते हैं हरकुछ वात बोलतेहुये वारवार विस्तरा तयार कर्त्तेहैं इसतर ह कंदर्पके सतायेहुये व्याकुल होरहेहैं॥ १ ॥

इदानीं सांप्रतं मे गंतुं योग्यमिति हेतुमाह—

त्वद्वाक्येन समं समग्रमधुना तिग्मांशुरस्तंगतो गो-
विंदस्य मनोरथेन च समं प्राप्तं तमः सांद्रताम्॥ को
कानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना त
न्मुग्धे विफलं विलंबनमसौ रम्योभिसारक्षणः ॥ २॥

सं०टी० त्वद्वाक्येनेति। हे मुग्धे मूढे त्वद्वाक्येनासूयामानसहितेन समं सह समग्रं सामग्र्येणाधुना इदानीं तिग्मांशुः सूर्यः अस्तंगतः असूयामानसहितः सूर्योस्तंगतः अभिसरणकालोयमित्यर्थः। गोविंदस्य कृष्णस्य मनोरथेन इदानीं राधा आगमिष्यतीति वांछया समं सह तमः अंधकारः सांद्रतां निबिडतां प्राप्तं तमसिअभिसरणं योग्यमित्यर्थः। दीर्घामदभ्यर्थना शीघ्रं गम्यतामिति मदीयाप्रार्थना कोकानां चक्रवाकानां करुणस्वनेन विरहदयाशब्देन सदृशी योग्या यथा कोकानां करुणस्वनो नानाप्रकारः श्रूयते तथा मदीयाः काकूक्तयः संप्रति कार्यं भवंतीत्यर्थः। तस्माद्धेतोर्विलंबनं विफलं। असौ अभिसारक्षणोभिसारकालो रम्यो गमनयोग्य इत्यर्थः। सहोक्तिरलंकारः शार्दूलविक्रीडितं वृत्तं॥ २॥

भा०टी० हे सुन्दरि तेरे वाक्यके साथ सूर्य्यभी अस्त हुआ थाने तू अबभी मौन नहीं छोडतीहै श्रीकृष्णके मनोभिलाषके साथ अंधकारभी फैलगया अर्थात् ज्यूंज्यूं अंधेरा पडताहै कृष्णकी इच्छा वढती जातीहै चक्रवाकोंके रोदनके तरह मेरीभी प्रार्थना होगईहै अर्थात् चकी चकओंका रातमै वियोग होताहै रातभर रोतेरहतेहैं पर उनका मेल नही होता इसीतरह मै वा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रवार कहतीहुं तू चलती नही फिरभी कहतीहूं हेराधे विलम्बकर्ना तेरा निष्फल यह बडा सुन्दर चलनैका समय होरहाहै ॥ २ ॥

अभिसारे रसाधिक्यं भवतीत्याह–

आश्लेषादनुचुंबनादनुनखोल्लेखादनुस्वांतजातप्रो द्बोधादनुसंभ्रमादनुरतारंभादनुप्रीतयोः ॥ अन्या र्थंगतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतोर्दंपत्यो र्निशि को न को न तमसि व्रीडाविमिश्रोरसः॥३॥

सं०टी० आश्लेषादिति। दंपत्योर्जायापत्योस्तमसि अन्धकारे व्रीडाविमिश्रो लज्जायुक्तः कःकः रसो न भवेत् इति न अपि तु सव्रीडः सर्व एव शृंगारादिः रसो भवत्येव। कथंभूतयोर्दंपत्योःअन्यार्थं परस्त्रीपरपुरुषार्थं गतयोः संकेतस्थानं प्राप्तयोः।पुनः कीदृशयोः भ्रमाद्भ्रांतेः गाढांधकारे रसात् मिलितयोः संगतयोः। अनंतरं आश्लेषादिविशेषणानि योजनीयानि तत्र एवं संभोगक्रमः प्रथमं आलिंगनं ततश्चुंबनं ततो नखक्षतं ततः कामोद्बोधःततः सत्वरः ततो मैथुनं ततः प्रीतिस्ततो भावनमितिक्रममाह । आश्लेषादालिंगनादनु पश्चान्नखोल्लेखादनु नखक्षतात् पश्चात् स्वांतजातप्रोद्बोधादनु कामबोधात् पश्चात्संभ्रमादनु वेगात् पश्चाद्रतारंभात् अनु सुरतोद्योगात् पश्चात्प्रीतयोस्तृप्तयोः। पुनः कीदृशयोः संभाषणैरालापैर्जानतोः न ममेयं भार्या नायं मम पतिरिति ॥ ३ ॥

भा०टी०हे राधे अन्यपुरुष और अन्य नायिकाके वास्ते गयेहुये नायिका और नायकोंका संकेत स्थानमै आलिंगनके पीछे और चुंवनके पछि नखक्षतदान और कामोद्दीपनके पीछे रतिके आरंभके पीछे प्रसन्नहुवेहुयो मिलेहुए पीछे वोलनेसें यह वह नायिकाहै वह नायकहै कर्के एक चमत्कारका लज्जा सहित रस अंधकारमै स्त्रीपुरुषोंका होताहै ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं त्वल्लाभात्कृष्णः कृतार्थो भवत्वित्याह-

सभयचकितं विन्यस्यंतीं दृशं तिमिरे पथि प्रतित-रु मुहुः स्थित्वा मंदं पदानि वितन्वतीं ॥ कथमपि रहः प्राप्तामंगैरनंगतरंगिभिः सुमुखि सुभगः पश्य-न् स त्वामुपैतु कृतार्थताम् ॥ ४ ॥

सं०टी० सभयेति । हे सुमुखि सुवदने राधे सुभगः सौभाग्यवान् स कृष्णस्त्वां पश्यन् कृतार्थतां उपैतु प्राप्नोतु । कीदृशीं त्वां तिमिरे अंधकारसहिते पथि मार्गे सभयचकितं भयविस्मयाभ्यां सहितं यथा स्यात्तथा दृशं नेत्रं विन्यस्यंतीं निरीक्षयंतीं । निबिडांधकारदर्शना-द्भयः अंधकारे निःशंकागमनाद्विस्मयः । पुनःकीदृशीं प्रतितरु प्र-तिवृक्षे मुहुःपुनःपुनः स्थित्वा मंदं शनैः पदानि चरणव्यापारान् वि-तन्वतीं मे प्रियतमोत्रैवागमिष्यतीति मंदं चरणारविंदं धारयंतीमिति भावः । पुनः कीदृशीं कथमपि अंधकारस्य निबिडत्वात्केनापि प्र-कारेण रहः एकांतस्थलं प्राप्तां । पुनः कीदृशीं कामस्य यस्तरंगः पुनरुद्बोधः स येषु तैः कामोल्लासिभिरंगैर्हस्तपादादिभिरुपलक्षितां । उपलक्षणे तृतीया ॥ ४ ॥

भा०टी०हे राधे अन्धकारकर्के अदृश्यमार्गमें डरतीहुई चकितदृष्टीसें देखती हुई वारवार हरेक वृक्षोंके नीचे खडी होतीहुई मन्दमन्दगतीसें चलतीहुई बडे कष्टसें एकान्तमै मिलीहुई जिसके अंगोंसें कामके तरंग जैसे उठतेहै ऐसी तेरेको देखके श्रीकृष्ण कृतार्थ होवें याने अपनै मनोरथ सिद्धकरैं ॥ ४ ॥

इदानीं कविः सर्गांते भक्तजनमाशिषयति--

राधामुग्धमुखारविंदमधुपस्त्रैलोक्यमौलिस्थलीने-पथ्योचितनीलरत्नमवनीभारावतारक्षमः ॥ स्व-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च्छंदं व्रजसुंदरीजनमनस्तोषप्रदोषश्चिरं कंसध्वं-सनधूमकेतुरवतु त्वां देवकीनंदनः ॥ ८ ॥

सं॰टी॰ राधेति । देवकीनंदनः श्रीकृष्णः त्वां भक्तं चिरं अवतु दुरिताद्रक्षतु । कीदृशः कृष्णः राधाया मुग्धं सुंदरं यन्मुखारविंदं मुखकमलं तस्य मधुपो भ्रमर इव नीलत्वान्मुखपानकर्तृत्वाच्च । पुनःकीदृशः अवन्या भारावतारे क्षमः समर्थः। अवनीभारावतारांतकः इति वा पाठः । तदा अवन्याः भुवः भाररूपोऽवतारो येषामसुराणां तेषामंतको नाशकः । पुनःकीदृशः स्वच्छंदानां स्वाधीनानां व्रज-सुंदरीजनानां गोपीनां मनस्तोषे चित्तसंतोषे प्रदोषो रात्रिमुखमिव । रात्रिमुखे हि नार्यस्तुष्यंति । पुनः कीदृशः त्रैलोक्यस्य लोकत्रयस्य या मौलिस्थली वृंदाटवी तस्या नेपथ्योचितमलंकारयोग्यं नीलर त्नमिव स्थितः। पुनः कीदृशः कंसस्य मातुलस्य मारणे धूमकेतुरि-व स्थितः । राधागमने साकांक्ष इत्यर्थः ॥ ८ ॥

भा॰टी॰ग्रंथकर्त्ता श्रीमान् जयदेव कवी सर्ग समाप्तीमें मंगलाचरण कर्तेहै । रमणी राधाका मुखरूपी कमलके भ्रमर त्रिलोकीके शिरके अलंकार भूत महानीलमणी पृथ्वीके भार कर्नेवाले कंसादिके वधकर्नेमें समर्थ व्रजकी स्त्रियोंका चित्तप्रसन्नकर्नेमें रात्रीरूप कंसके नाशकर्नेमें धूमकेतु स्वरूप ऐसे श्रीकृष्ण तुमारी रक्षाकरैं ॥ ५ ॥

इतिश्री संस्कृतभाषाटीकाद्वयोपेते गीतगोविन्दे अभिसारिकावर्णने साकां-क्षपुण्डरीकाक्षो नाम पञ्चमः सर्गः ॥ ५ ॥

अथ षष्ठः सर्गः प्रारभ्यते।

अथ तां गतुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ॥ तच्चरितं गोविंदे मनसिजमंदे सखी प्राह ॥ १ ॥

सं॰टी॰अथेति । अथशब्दो मंगलार्थः । अनंतरं वा सखी गो-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विंदे कृष्णांतिकमागत्येत्यर्थः। तच्चरितं राधाचरितं प्राह उक्तवती। किं कृत्वा लतागृहे तां राधां गंतुमशक्तां दृष्ट्वा। कीदृशीं राधां चिरमनुरक्तां अनुरागिणीं। कीदृशे गोविंदे मनसिजेन कामेन मंदे पीडिते।

भा०टी०अनन्तर सखीने कृष्णप्रेमउन्मादिनी राधाको क्लान्त शक्तीहीन देखकर लतागृहसे प्रविष्ट होगई; और मदन पीडित कृष्णजीको राधाकी दशाको मधुर वचनसे कथन करनेलगी॥ १॥

अथ द्वादशः प्रबंधो गुणकरीरागेण रूपकताले गीयते-

पश्यति दिशि दिशि रहसि भवंतं॥ त्वदधरमधुरमधूनि पिबंतं॥१॥ नाथ हरे जय नाथ हरे सीदति राधा वासगृहे॥ ध्रु०॥

सं०टी० गुणकरीरागः रागलक्षणं " रतोत्सुकाकांतपथप्रतीक्षामालापयंतीमृदुपुष्पतल्पे। इतस्ततः प्रेरितदृष्टिरार्ता श्यामातनुर्गौणकरी प्रदिष्टा" इति। अस्मिन्वासकसज्जावर्णनं " वासवेश्मनिविकल्पिततल्पे वासमागमविधिं विदधाना। पश्यति प्रियसमागमशय्यां पश्यति स्म प्रियवासकशय्यां " इति। पश्यतीति। हेनाथ हेहरे द्विरुक्तिः सा राधा तव वासगृहे सांकेतिकनिकुंजमंदिरे त्वत् त्वत्तः हेतोः सीदति अवसन्ना भवति। कथमित्यत आह सा राधा एकांते स्थिता सती दिशिदिशि भवंतं त्वां पश्यति अवलोकयति। कीदृशं त्वां अधरवत् नायकाधरामृतवत् मधुराणि मधूनि माध्वीकानि पिबंतं।

भा०टी०हेनाथ हेहरि! राधा अभिरास कुञ्जमें बहुत क्लेशमे है; और तुह्मारेमेही सकल जगत्कि भावना करती है। राधा निरन्तर केवल तुह्माराहि अधरामृत पानकरनेकि चिंताकरके जीतीहै॥ १॥

नन्वेवं चेत्तर्हि किमिति नागतेत्यत आह—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वदभिसरणरभसेन वलंती ॥ पतति पदानि कियं-
ति चलंती ॥ २ ॥

सं०टी०त्वदिति । त्वदाभिसरणे तवाभिसारे रभसउत्साहस्तेन वलंती अभिमुखी भवंती । कियंति कतिपयानि पदानि चलंती सती पतति। त्वद्विरहमूर्च्छया गंतुमसमर्थेत्यर्थः ॥ २ ॥

भा०टी०श्रीराधाजीने तुह्मारे साथ मिलापका भरोसासे बहुतसा आनन्द कियाहै, और इसकारण एकदो पद करके चलती है, किन्तु क्षीणताके लिये भूमिपर निपतित होजातीहै ॥ २ ॥

हाकष्टमेवं चेदशक्ता तर्हि कथं जीवतीत्यत आह–

विहितविशदबिसकिसलयवलया ॥ जीवति पर-
मिह तव रतिकलया ॥ ३ ॥

सं०टी०विहितेति।हेकृष्ण सा राधा तव रतेः कलया सुरतलेखचिंतनेन इह समये परं केवलं जीवति जीवनहेतुरन्यो नास्तीत्यर्थः । कीदृशी विहिताः कृताः विशदाः शुभ्रा बिसकिसलयाः मृणालांकुरा एव वलयाः कंकणानि यस्याः सा ॥ ३ ॥

भा०टी०केवल तुह्मारे साथ कामभोग करनेके लिये राधा सुंदर मृणाल और नवीन पल्लवके कंगन हाथमें लगाकर अभितक आसासे जीतीहै॥ ३॥

मुहुरवलोकितमंडनलीला ॥ मधुरिपुरहमिति भा-
वनशीला ॥ ४ ॥

सं०टी० मुहुरिति । सा कीदृशी पूर्वपदेनान्वयः। पुनः पुनः अवलोकिता मंडनलीला अलंकारविलासो यया । तेन विना निरर्थकमिति पुनः पुनः वदति । पुनःकीदृशी अहं मधुरिपुः कृष्ण इति भावनं ध्यानमेव शीलं स्वभावः सद्वृत्तं यस्याः सा ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०राधाजी अभि तो तुह्मारे समान वेश विन्यास करके अपने मनमें आपहि मुरारि बोलके विचार कर रही है ॥ ४ ॥

तदेवाह–

त्वरितमुपैति न कथमभिसारं॥ हरिरिति वदति सखीमनुवारं ॥ ५ ॥

सं०टी०त्वरितमिति। हरिः मच्चित्तापहारी अभिसारं संकेतस्थलं त्वरितं शीघ्रं कथं कस्माद्धेतोः नोपैति नागच्छतीत्यनुवारं सखीं वदति५

भा०टी०श्रीराधाराणी पुनःअज्ञानको प्राप्त होकर कथन करने लगी कि हे सखी! किसकारण कृष्णचंद्रजी एतत्काल अभिसारमें नहिआयेहै॥ ५॥

अपिच–

श्लिष्यति चुंबति जलधरकल्पं॥ हरिरुपगत इति तिमिरमनल्पं ॥ ६ ॥

सं०टी० श्लिष्यतीति। सा हरिरुपगतः प्राप्त इति बुद्ध्याऽनल्पं बहु तिमिरमंधकारं श्लिष्यति आलिंगति चुंबति च। कीदृशं तिमिरं जलधरकल्पं मेघसदृशं।स्निग्धत्वान्नीलत्वाच्च कृष्णसाम्यं तिमिरस्य६॥

भा०टी०श्रीराधाजीने कभी नवीन मेघस्वरूप अंधकारको निरीक्षण करके भ्रमचित्तसे उसको श्रीहरि बोलके चुम्बन और आलिंगनादिक व्यवहार करती है ॥ ६ ॥

भवति विलंबिनि विगलितलज्जा ॥ विलपति रोदिति वासकसज्जा ॥ ७ ॥

सं०टी० भवतीति। भवति त्वयि विलंबिनि विलंबं कुर्वति सति विगलितलज्जा गतलज्जा सा राधा विलपति हे निःकृप कथमेतावदौदास्यं मयि त्वयाऽऽचरितमिति विलापं करोति रोदिति अश्रूणि मुंचति कीदृशी वासकसज्जा विहितसंविधानेत्यर्थः। लक्षणं तूक्तमेव ॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०श्रीराधाजी ने तुम्हारे कारण अपने कुञ्ज कुटीरको अछि तन्हाँ से लज्जित किया, कि तु तुम्हारे अदर्शन के हेतु अपनी लज्जा को त्यागकर विलाप सहित बहुतसा रोदन कर ही रहै ॥ ७॥

श्रीजयदेवकवेरिदमुदितं ॥ रसिकजनं तनुतामतिमुदितं ॥ ८ ॥ इति श्रीगीतगोविंदे द्वादशः प्रबंधः ॥ १२ ॥

सं०टी० श्रीजयदेवेति । श्रीजयदेवकवेः उदितं भाषितं इदं गीतं रसिकजनं शृंगाररसभावनाभावितांतःकरणं अतिमुदितं अतिशयेन हर्षयुक्तं तनुतां करोत्वित्यर्थः ॥ ८॥

भा०टी०श्रीमान् जयदेवस्वामिकृत यहि शृङ्गार रसपूर्णलीला सकल रसिक लोगों को आनंद करे ॥ ८ ॥

इदानीं तस्यास्त्वदेकपरत्वमाह—

विपुलपुलकपालिः स्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलं व्याहरंती ॥ तव कितव विधायामंदकंदर्पचिंतां रसजलनिधिमग्ना ध्यानलग्ना मृगाक्षी ॥१॥

सं०टी० हेकितव धूर्त सा मृगाक्षी मृगशावलोचना तव रसजलनिधिमग्ना त्वच्छृंगाररससागरे निमग्ना लीना बभूवेत्यध्याहारः । किंकृत्वा अमंदकंदर्पस्य महतः कामस्य चिंतां स्मरणं विधाय हृदि कृत्वा ध्यानेन तवैव चित्ते लग्ना तत्परा । रससागरमग्नायाश्चेष्टितमाह । विपुला महती पुलकपाली रोमांचपंक्तिर्यस्याः सा ध्यानकल्पितत्वत्करस्पर्शेन रोमांचतीत्यर्थः । किं कुर्वती त्वद्दत्तं दंतनखक्षतादिकं परिकल्प्य स्फीतसीत्कारं प्रवृद्धसीत्कारं यथा स्यात्तथा व्याहरंती अंतरभ्यंतरे जनित उत्पादितो जडिमा जडत्वं यस्यां

१०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रियायां तद्यथा तथा काकुना ध्वनिना ध्वनिविकारविशेषेणाऽऽकुलं यथा स्यात्तथा व्याहरंती ध्यानेन तव स्तनालंभनाधरपाननीवीबंधनोन्मोचनासक्तं परिकल्प्य मुंचमुंच नन मामेति निषेधवाक्यं वदंतीत्यर्थः ॥ १ ॥

भा०टी०दुरन्त कामदेवकी पीडासे बहुत व्याकुल तथा चिन्तनवाली राधा अभीं तुह्मारे प्रेम स्वरूप समुद्रमें मग्नहोरही है, और निरन्तर तुह्माराहि ध्यान कररहीहै ; किन्तु ध्यानके हेतुसे राधिकाके चारु कोमल अंगमें रोमहर्ष होरहा हैं और हृदयकी व्यथासे उसके प्राण अत्यन्त व्याकुल होरहैहैं ॥

अंगेष्वाभरणं करोति बहुशः पत्रेपि संचारिणि
प्राप्तं त्वां परिशंकते वितनुते शय्यां चिरं ध्याय-
ति ॥ इत्याकल्पविकल्पतल्परचनासंकल्पली
लाशतव्यासक्तापि विना त्वया वरतनुर्नैषा
निशांनेष्यति ॥ २॥

सं०टी० अंगेष्विति । एषा वरतनुः सुंदरांगी । एषेति बुद्ध्या प्रत्यक्षीकृत्य वदति । राधा अंगेषु हस्तादिषु आभरणं अलंकारं बहुशः करोति । अनेनाकल्पः कथितः । पत्रेपि वृक्षपत्रेपि संचारिणि पक्ष्यादिना चलति सति त्वामागतं परिशंकते सर्वतो वितर्कयतीत्यर्थः । अनेन विकल्पः । अपि च त्वामागतं ज्ञात्वा तव कामकेलिनिमित्तं शय्यां वितनुते कुरुते । अनेन तल्पः कथितः। चिरं बहुकालं ध्यायति त्वदागमनोपायं चिंतयति । रचनेयं दर्शिता कृष्णसंगमे मया इदमिदं कर्तव्यमित्यनेन संकल्पलीलाशतमुक्तं। इति पूर्वोक्तप्रकारेण आकल्पो भूषणं विकल्पस्तर्कः तल्परचना शय्यारचना संकल्पलीलाशतं एतेषु व्यासक्तापि त्वयाविना त्वामृते निशां रात्रिं न नेष्यति प्रभातं प्रापयितुं समर्था न भविष्यतीत्यर्थः २

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०राधाजीने पुनर् अपने सुभ अंगोंमेंसे सकल भूषणोंको उन्मोचन किया है, और पुनर् उन्ही हि अपने अंगोमें धारण करलियाकरती है! कोई शब्दके श्रवण करनेसे राधाजीने उसी समयमें तुह्मारे आगमनका निश्चय बोध करके शय्याकी रचनामें आशक्तहोति है, और तुह्मारे ध्यानमें भी मग्नहो जातिहै।हि शठ नन्दनन्दन! राधा तुह्मारे विरहके कारण आज किसी प्रकारसेभि रातको वितीत करने नही सक्तीहै॥२॥

अधुना कविः सर्गांते भक्तानाशिषयति—

किं विश्राम्यसि कृष्णभोगिभवने भांडीरभूमीरुहि भ्रातर्यासि न दृष्टिगोचरमितःसानंदनंदास्पदं॥ राधाया वचनं तदध्वगमुखान्नंदांतिके गोपतो गोविंदस्य जयन्ति सायमतिथिप्राशस्त्यगर्भागिरः॥ ३ ॥

सं०टी०॥किमिति। गोविंदस्य कृष्णस्य गिरः वाचः जयंति सर्वोत्कर्षेण वर्तंते। कीदृशाः गिरः सायंकाले अतिथीनां प्राशस्त्यं प्रशंसा तद्गर्भे आशये यासां ताः। व्याजोक्तिनामालंकारः कथंभूतस्य गोविंदस्य नंदांतिके नंदगोपपार्श्वे तत्तादृक् संकेतसूचनारूपं अध्वगमुखान्निःसृतं राधायाः वचनं गोपतः गोपनं कुर्वतः। किं तद्वचनं तत्राह। हेभ्रातः पथिक इति कोमलामंत्रणे भांडीरभूमिरुहि भांडीरनाम्नि वटवृक्षे किं विश्राम्यसि विश्रामं मा कृथाः। तत्र हेतुः कृष्णश्चासौ भोगी च तस्य भवने कालसर्पवासे। पक्षे कृष्णस्य भोगिनः शृंगारिणो विलासगृहे। पक्षद्वये नेह स्थेयमिति भ्रातृपदोपादानं श्लेषालंकारश्चात्र। तर्हि क्व यामीत्यत आह। इतो वटात् दृष्टितो गोचरं प्रत्यक्षीक्रियमाणं तत्सानंदं सकलर्द्धिमन्नंदस्यास्पदं नंदगोपगृहं न यासि अपि तु याहीति राधावचनं अध्वगमु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्थानंदांतिके शृण्वतो गोविंदस्य गिरो जयंतीत्यर्थः। सोत्कंठे उत्कंठासहितो वैकुंठः श्रीकृष्णो यत्र ॥ ३ ॥

भा॰टी॰ हेपांथ ! वटवृक्षके नीचुमें कदाचित् विश्राम नाकरो, क्यों कि उसस्थानमें कृष्ण भोगी विश्राम किया करतेहै। वहां से नंदराजका भवनाभी निकटवर्तिहै, तुमने केवल नंदस्थानमें जाना ! पथिकसे राधाने उतनावचन कथनकिया, किन्तु पान्थके भेजने से हि गोविंदजीने अतिथी स्वरूप पथिकके वचन नन्दराजके निकट गुप्तकर अतिथकी प्रशंसाके लिये जो कथन कियो थे उनकथनोंको जयहो जयहो जयहो ॥ ३ ॥

इति श्रीकविराजश्रीजयदेवकृतगीतगोविंदे महाकाव्ये वासकसज्जावर्णने सोत्कंठवैकुंठो- नाम सटीकः षष्ठः सर्गः ॥ ६ ॥

अथ सप्तमः सर्गः प्रारभ्यते ॥

अधुना चंद्रोदयव्याजेन राधाया विरहव्यथाधिक्यं वर्णयन्नाह—

अत्रांतरे च कुलटाकुलवर्त्मपातसंजातपातक
इव स्फुटलांछनश्रीः ॥ वृंदावनांतरमदीपयदं-
शुजालैर्दिक्सुंदरीवदनचंदनबिंदुरिंदुः ॥ १ ॥

सं॰टी॰ अत्रांतर इति। अत्रांतरेऽस्मिन्नवसरे इंदुश्चंद्रः अंशुजालैः किरणसमूहैः वृन्दावनांतरं वृन्दावनमध्यप्रदेशं अदीपयत् प्रकाशितवान्। प्रियलंभहेतुत्वं दर्शयन् विशिनष्टि । कीदृश इंदुः स्फुटा व्यक्ता लांछनश्रीः कलंकशोभा यस्य। कथंभूत इव कुलटानां कृष्णाभिसारिकाणां कुलस्य समूहस्य वर्त्मपातः संकेतमार्गप्रतिरोधस्तेन संजातमुत्पन्नं पातकं यस्य तादृश इव । कुपातकः कष्को व्यक्तो भवतीति चंद्रस्योद्दीपनत्वमाह पुनः कीदृशः दिश एव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुंदर्यः मायिकास्तासां वदनस्य मुखस्य चंदनबिंदुः श्रीखंडतिलक इव स्त्रीतिलको वर्तुलो भवति असतीनां चंद्रोदये गमनाभावाद्धर्मपातः । अत्र क्षेपकोत्प्रेक्षेलंकृती ॥ १ ॥

भा०टी० इसी समयमें चन्द्रमा अपनी किरणोसे सकल वृन्दावनको देदीप्य मान किया करताथा; यहि देख के ऐसा प्रतीत होरहाथा कि पूर्व दिक् रूपि वधुको मुखचन्दनादि तिलक से अधिक शोभायमान होरहाथा और असती अपने कुल स्वरूप पथाको छोड कर विपथगामिभीहोने के कारण जो पाप करतीथी, वहि पाप चन्द्रमाके शरीर में कलंक स्वरूप विराजमान है क्यों कि चंद्रमा अपनी किरणों से वे नारीयों को भ्रष्टकरताहै॥

प्रसरति शशधरबिंबे विहित विलंबे च माधवे मधुरा ॥ विरचितविविधविलापं सा परितापं चकारोच्चैः ॥ २ ॥

सं०टी० अत्र विप्रलब्धा नायिका वर्ण्यते तल्लक्षणं भरते" प्रविलसदनुरागा दूतिकां प्रेक्ष्य पूर्वं सरभसमपिधाय क्वापि संकेतभूमौ । न मिलति खलु यस्या वल्लभो दैवयोगात्प्रवदाति भरतस्तां नायिकां विप्रलब्धां"। प्रसरतीति । सा राधा विरचितः कृतः विविधो नानाप्रकारो विलापो यत्र उच्चैर्महांतं परितापं दुःखं चकार कृतवती । क्व सति शशधरबिंबे चंद्रमंडले प्रसरति उद्गच्छति सति। माधवे कृष्णे विहितविलंबे संकेतागमनंप्रति कालातिक्रमं कृतवति सति ॥ २ ॥

भा०टी०जैसे चंद्रमा क्रम पूर्वक वृद्धिको प्राप्त होकर अपनी किरणों को पवित्रतासे परिपूर्ण विस्तारितकरताहै तैसेहि राधाजीने परमप्यारे माधव को विलंब से देख कर बहुत विलाप करती है ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विलापमेवगीतेनाह--

अथ त्रयोदशः प्रबंधो गौडमालवरागेण प्रतिमंठताले गीयते

कथितसमयेपि हरिरहह न ययौ वनं ॥ ममवि-फलमेतदनुरूपमपि यौवनं ॥ १ ॥ यामि हे क-मिह शरणं सखीजनवचनवंचिता ॥ ध्रु० ॥

सं० टी० कथितेति । गीतस्यास्य मालवगौडीरागः प्रतिमंठस्तुतालः । हे इति स्वचित्तसंबोधनं इह निर्जने वने सखीजनस्य वचनैः कृष्णागमनावेदकैर्वंचिता प्रतारिता अहं कं पुरुषं शरणं रक्षितारं यामि गमिष्यामि किंतु कमेव जलमेव शरणं यामि । जलप्रवेशो वरमित्यर्थः।किमित्यत आह अहहेत्याश्चर्ये हरिः कृष्णः कथितसमयेपि उक्तकालेपि वनं वृंदावनं संकेतस्थानं ययौ न जगाम कृष्णोपभोगाभावात् ममैतदनुरूपं योग्यमपि यौवनं विफलं निरर्थकम्॥१॥

भा०टी० । विलाप करके राधा राणी कथन करने लगी, हायरे हाय! हरिजी अभिभी नहि आयेहै! मेरीसखीया मुझे प्रतारण कररहिं है हायरे हाय मेरी समस्त सौंदर्य यौवन एवं लावन्य केवल निष्फलताको प्राप्त हो-रहेहै अभि मे किसका आश्रय धारण करूंगी ॥ १ ॥

यदनुगमनाय निशिगहनमपि शीलितं ॥ तेन मम हृदयमिदमसमशरकीलितम् ॥ २ ॥

सं०टी० । यदिति । मया यस्य कृष्णस्यानुगमनाय सुरतेन संतोषयितुं निशि रात्रौ गहनमपि निर्जनवनमपि शीलितं सेवितं तेन कृष्णेन हेतुना मम इदं हृदयं मदीयं चित्तं असमशरेण कामेन कीलितं विद्धं कृष्णागमनाभावात् ॥ २ ॥

भा०टी०इन्हो से मिलने के कारण मेने एक वन छोड कर और वन-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्रमणकियाहै, तबभी कृष्णचन्द्रजीने मुझपर निर्दय होकर मेरे कोमल हृदयको मदनबाणसे विद्धकिया ॥ २ ॥

मम मरणमेव वरमतिवितथकेतना ॥ किमिति विषहामि बिरहानलमचेतना ॥ ३ ॥

सं०टी० । ममेति । इह वने अचेतना ज्ञानशून्या विरहानलं वियोगाग्निं किमिति विषहामि सहामि तस्मान्मम मरणमेव वरं श्रेष्ठं । मरणे विरहानलाभावात् । कीदृशी अहं अतिवितथं अतिव्यर्थमेव शरीरं यस्याः । कृष्णेन शरीरसौंदर्योपभोगाभावात् ॥३॥

भा०टी०अभि मरण ही मेरी सखा हो रहींहै, और में मृत्यु को श्रेष्ठ करके मानतीहूं; क्यों कि में कृष्णचन्द्रजीके विरहकी पीडाको धारण कितना करुंगी, मुझै इसलिये मृत्यु हिवरहै ॥ ३ ॥

मामहह विधुरयति मधुरमधुयामिनी॥कापि-हरिमनुभवति कृतसुकृतकामिनी ॥४॥

सं०भा० मामिति ।अहहेति दुःखानुकारे मधुरमधुयामिनी मनोज्ञा वसंतरात्रिर्मां विधुरयति विलक्षयति ।कापि कृतं सुकृतं पुण्यं यया तादृशी कामिनी कांता हरिं कृष्णमनुभवति उपभुंक्ते ॥ ४ ॥

भा०टी० । हायरे हाय! अभि कोनसी कामिनी कृष्णजीको लेकर काम भोगादिसुखको प्राप्तहोरहीहै! केवल में ही हतभाग्यवती हूं, क्यों कि सुंदर चाँदनीरातमें मोहन प्यारे के विरहरुपी अग्नि से दग्ध होरही हूं ॥ ४ ॥

अहह कलयामि वलयादिमणिभूषणं ॥ हरिविरहदहनवहनेन बहुदूषणम् ॥५॥

सं०टी० अहहेति । अहं वलयादिमणिभूषणं कंकणप्रभृति मुक्तालंकारं हरिविरहदहनवहनेन कृष्णवियोगधारणेन हेतुना बहु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दूषणं अतिशयापरं कलयामि मन्ये। प्रियदर्शनेन स्त्रीणामलंकारसाफल्यामितिभावः ॥ ५ ॥

भा०टी०। जब कृष्णजीके विरहसे मुझको निरंतर जलन होवेगा तब मेरी वे मणिरचितभूषण किसकामके हैं केवल व्यर्थ हि है ॥ ५ ॥

कुसुमसुकुमारतनुमतनुशरलीलया ॥ स्रगपि हृदि हंति मामतिविषमशीलया ॥६॥

सं०टी० कुसुमेति स्रगपि पुष्पमालापि अतनुशरलीलया कंदर्पबाणविलासेन मां हृदि हंति। किदृशीं मां कुसुमवत् सुकुमारा कोमला तनुः शरीरं यस्याः सा ॥ कीदृश्या अतनु शरलीलया अतिविषमं अतिदारुणं शीलं स्वभावो यस्याः तया। बाणेन हि क्षतं क्रियते न पुष्पादिना ॥ ६ ॥

भा०टी०। मेरे कण्ठदेश में जो कुसुमों का हार विराजमान हैं, वहभी मुझें मदनबाणसे अधिक पीडादेरहाहै ॥ ६ ॥

अहमिह निवसामि नगणितवनवेतसा ॥ स्मरति मधुसूदनो मामपि न चेतसा ॥ ७ ॥

सं०टी०।अहमिति। गणितवनवेतसा गणिताः प्रतिवनं कृष्णमन्वेषयंत्या परिसंख्याताः वनवेतसवृक्षा यया सा अहं इह कुंजे किं न निवसामि अपि तु वसाम्येव। अहं तु न समर्था शिरश्चालनेपि एवं विधामपि मां मधुसूदनः कृष्णश्चेतसापि न स्मरति आश्चर्यमित्यर्थः ॥ ७ ॥

भा०टी०। मेने बहुत देरपर्यंत वेतस वनमें वैठकरकृष्णजीके आगमन की प्रतिज्ञा कियाहै;किन्तु कृष्णचंद्रजीने एकवारभी मुझेस्मरण नाहिकिया७

हरिचरणशरणजयदेवकविभारती ॥वसतु हृदि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युवतिरिव कोमलकलावती ॥ ८ ॥ इति श्रीगीतगोविंदे त्रयोदशः प्रबंधः ॥ १३ ॥

हरीति ॥ हरिचरणौ रक्षितारौ यस्य स चासौ जयदेवकविस्तस्य भारती गीतरूपा सरस्वती भक्तानां हृदि मनसि वसतु । कीदृशी भारती कोमला अनिष्ठुरवर्णा कलावती कवित्वकलायुक्ता च । केव युवतिरिव । यथा नायकहृदये कोमलकलावती कुमारांगी चतुःषष्टिकामकलायुक्ता च नायिका वसति ॥ ८ ॥

भा०टी०जैसे जुवक अपने हृदयमें सुन्दरी कामिनी को सतत चिंता करताहै, तैसेहि हरिचरण भक्त श्रीमान् जयदेवस्वामी को वहि श्रीराधाकृष्णरतिकथा सकल भक्तलोगों को हृदयमें निरन्तर विराजमानरहै॥८॥

तत्किं कामपि कामिनीमभिसृतः किं वा कला केलिभिर्बद्धोबंधुभिरंधकारिणि वनोपांते किमु भ्राम्यति ॥ कांतः क्लांतमना मनागपि पथि प्र स्थातुमेवाक्षमः संकेतीकृतमंजुवंजुललताकुंजे पि यन्नागतः ॥ १ ॥

सं०टी० तत्किमिति। कांतः कृष्णः संकेतीकृतः अभिसरणस्थानं संपादितः यो मंजुर्मनोहरः वंजुललताकुंजः वेतसलतागृहं तस्मिन्नपि यस्मान्नागतः नायातः तस्मात्कारणात्कामपि कामिनीं नायिकामभिसृतः तदभिमुखं गतः किंवाथवा बंधुभिर्मित्रैः कलाकेलिभिः हास्यादिक्रीडाभिर्बद्धः यंत्रितः । अथवा अंधकारिणि तमोयुक्ते वनोपांते किं भ्राम्यति तमसि मार्गभ्रमात् भ्रमणं युज्यत एव । अभ्यस्तस्य भ्रमाभाव इतिचेत्तत्राह क्लांतमनाः मन्निमित्तं समाकुलमंतःकरणं यस्य तथाविधः सन् पथि मनागपि अल्पमापि प्रस्थातुं आगंतुमक्षमः किं असमर्थः किं । अत्र अ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पिशब्दः किमर्थः । उत्का चेयं नायिका "उत्का भवति सा यस्याः संकेतं नागत प्रियः ॥ तस्या नागमने हेतुं चिंतयन्त्याकुला यथेति" संशयाक्षेपालंकारोऽयम् ॥ १ ॥

भा०टी०इस निर्दिष्ट निकुञ्जमें हरि जी अभिभी नहि आयेहैं; तव क्यां वह और सुंदर कामिनीयों के प्रेममें मग्न हुये होवेंगे, अथवा अपने कोईक प्यारे सखा के साथ मिलरहैंहे, अथवा अंधेरेके कारण वनमें भ्रमण हि कररहेहै, अथवा मेरे विरहसें संतप्त होकर चलने नही सकेहै ॥ १ ॥

अथागतां माधवमंतरेण सखीमियं वीक्ष्य विषादमूकाम् ॥ विशंकमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह ॥२॥

सं०टी० । अथेति । अथानंतरं इयं राधा माधवं कृष्णमंतरेण विनागतां सखीं वीक्ष्य दृष्ट्वा एतद्गीतेन वक्ष्यमाणमाह । कीदृशीं सखीं विषादेन कार्यासिद्ध्या मूकां वक्तुमक्षमां । कीदृशी राधा जनार्दनं कृष्णं कयापि कामिन्या रमितं क्रीडितं विशंकमाना तर्कयंती । कथं दृष्टवत् कामिन्या सहितं कृष्णं दृष्ट्वेत्यर्थः ॥ यद्वा दृष्ट्वाभिधीयते तथा प्राहेत्यर्थः । उक्तिरेषा उन्मादतः । अत्रोपेंद्रवज्रा वृत्तम् ॥ २ ॥

भा०टी०तदनन्तर राधाजी सखीके विनाहि कृष्णजीसे अकेली देखकर चिंतनकिया मनमें कि कृष्ण और कामिनी प्रेममे मग्नहै और यह चिंताके लिये कथन करनेलगी ॥ २ ॥

अथ चतुर्दशप्रबंधो वसंतरागेण एकतालीताले गीयते

स्मरसमरोचितविरचितवेषा ॥ गलितकुसुमदल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विलुलितकेशा ॥ १ ॥ कापि चपला मधुरिपु
णा विलसति युवतिरधिकगुणा ॥ ध्रु० ॥

सं०टी०स्मरेति। गीतस्यास्य वसंतरागः । हेसखी कापि युवतिः कामिनी मधुरिपुणा कृष्णेन सह विलसति क्रीडति। कीदृशी सा अधिकगुणा अतिशयितसौंदर्यादिगुणैर्युक्ता स्मरसमरोचितः कामयुद्धयोग्यः विरचितः कृतः वेषोलंकारादिर्यया सा । पुनः कीदृशी गलितानि कुसुमानि येभ्यस्तादृशाः दलविलुलिता ईषदितस्ततो व्यस्ताः केशा यस्याः सा विपरीतरतियुक्ता ॥ १ ॥

भा०टी०हेसखि! मुझे प्रतीत होताहै, कि अधिक गुण वाली किसी युवतिने माधव को साथ विलास कियाहै; उसको भूषण और भेष रतिरंगभूमिके योग्य होरहेहैं संग्राममें प्रविष्ट होने के कारण उसकी कवरी से कुसुम भ्रष्ट होरहे है, और कवरीभि सिथिलताको प्राप्त होरहिहै ॥ १ ॥

हरिपरिरंभणवलितविकारा ॥ कुचकलशोप
रि तरलितहारा ॥ २ ॥

सं०टी० । हरेः परिरंभणेनालिंगनेन वलितः संभक्तो ललितो मनोहरो वा विकारः कामभावो यस्याः सा कुचकलशयोरुपरि स्तनघटयोर्मस्तके तरलितश्चंचलो हारो यस्याः सा ॥ २ ॥

भा०टी०माधव के आलिंगन से उसी रमणीकेशरीरमें रोमहर्ष हुआहै, इसीकारण उसका शरीर आलस हुआहै, एवं कण्ठ का हार अभि स्तनमंडलपर आनन्दोलित होरहाहै ॥ २ ॥

विचलदलकललिताननचंद्रा ॥ तदधरपानरभ
सकृततंद्रा ॥ ३ ॥

सं०टी० विचलदिति। विचलद्भिः कंपमानैरलकैः स्वर्णकुंतलैः ललितः सुंदरः आननचंद्रो मुखचंद्रो यस्याः सा। पुनः की-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृशी तस्य कृष्णस्य ओष्ठपानहर्षेण कृता तंद्रा रतिसुखानुभव निद्रा यया सा ॥ ३ ॥

भा०टी०आजदिन किसी चन्द्र वदनी नारी ने कृष्णचन्द्रजी के अधरामृतको पान करके बहुतहि आनंद किया है, और उसका अलकावली विचलित होने के लिये मुख अधिक हि शोभायमान होरहाहै ॥ ३ ॥

चंचलकुंडलदलितकपोला ॥ मुखरितरशनजघनगतिलोला ॥ ४ ॥

सं०टी० चंचलेति । चंचलाभ्यां कुण्डलाभ्यां दलितौ संघृष्टौ कपोलौ यस्याः सा पुनः कीदृशी मुखरिता शब्दसहिता रशना कांची यस्मिन् जघने तस्य गत्या चांचल्येन लोला चंचला ॥ ४ ॥

भा०टी०आज किसी भाग्यवती युवतीके कर्ण कुण्डलने चंचल होकर उसके कपोल देशको शोभायमान कियाहै; और आजहि किसी भाग्यवती रमणीके उरुस्थल चंचलहोनेसे उसको कटिदेशकी कांचिभी शब्दायमान होरहीहै ॥ ३ ॥

दयितविलोकितलज्जितहसिता ॥ बहुविधकूजितरतिरसरसिता ॥ ५ ॥

सं०टी० दयितेति । दयितस्य कृष्णस्य विलोकितेन मुखवीक्षणेन लज्जितं संजातलज्जं हसितं हास्यं यस्याः सा । पुनः कीदृशी बहुविधं पिकशिखिकलहंसादीनामिव नानाप्रकारकूजितं यत्र एतादृशो रतिरसः क्रीडारसस्तेन रसिता हृष्टा ॥ ५ ॥

भा०टी०वहही कामिनी प्यारेको देखकर कभि लज्जावती होतीहै और कभि हांसि करतिहै कभि रतिरसरूपिसमुद्रमें मग्न होजातिहै ॥ ५ ॥

विपुलपुलकपृथुवेपथुभंगा ॥ श्वसितनिमीलितविकसदनंगा ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी० विपुलेति । विपुला बहुलाः पुलका रोमांचा यस्याः पृथुर्महान् वेपथुः कंपो भंग इव यस्याः सा । च पुनः कीदृशी श्वसितं सुरतायासेन जनितो निःश्वासः निमीलितं परमानंदावाप्त्या जनितं नेत्रनिमीलितं च ताभ्यां विकसन् प्रकटीभवन् अनंगः कामो रेतोलक्षणो यस्याः सा । निमीलितेत्यनेन च्युतकालः सूचितः ॥ ६ ॥

भा०टी०बहुत आनंद के प्रभावसे उस रमणी के शरीरमें रोमहर्ष होरहाहै, और प्रचण्ड अनंग रंगके लिये उसका निःश्वास अविरतवहताहै; और वारंवार उसके नयनाभि निमीलित होरहैहै ॥ ५ ॥

श्रमजलकणभरसुभगशरीरा ॥परिपतितोरसि रतिरणधीरा ॥ ७ ॥

सं०टी० श्रमेति । श्रमजलकणभरेण सुरतायासघर्मजलाधिक्येन सुभगं मनोज्ञं शरीरं यस्याः सा। एतेन सात्विकभावोत्पत्तिः सूचिता सात्विका भावाः पूर्वमुक्ताः। पुनः कीदृशी उरसि परिपातिता कृष्णवक्षःस्थलं प्राप्य स्थिता । रतिः सुरतं रणइव तत्र धीरा ॥ ७ ॥

भा०टी०आज वह सुरती रमणीके शरीर श्रमवारिसे उसके प्यारेहृदय आर्द्री भाव प्राप्त होगया है ॥ ६ ॥

श्रीजयदेवभणितहरिरमितं ॥ कलिकलुषं जनयतु परिशमितम्॥ ८ ॥

इति श्रीगीतगोविंदे चतुर्दशः प्रबंधः ॥ १४ ॥

सं०टी०श्रीजयदेवेति । श्रीजयदेवेन भणितमुक्तं वर्णितमित्यर्थः यद्धरेः रमितं कृष्णस्य संभोगः तत्कलेः कलियुगस्य कलुषं पापं गायकानां श्रोतॄणां च परिशमितं शांतं जनयतु शमनं करोतु॥८॥

भा०टी०श्रीमान् जयदेवस्वामि विरचित ये हरि विहार विवर्णन सर्वकलियुगकी कलुषता को नाशकरै ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरहपाडुमुरारिमुखांबुजद्युतिरयं तिरयन्नपि वेदनाम् ॥ विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्यथाम्॥ १ ॥

सं०टी० विरहेति। अये हेसखि। चन्द्रदर्शनविषादेन सखीं प्रति ब्रूते। अयं विधुश्चंद्रः मम हृदये मदनव्यथां कामपीडां अतीवात्यर्थेन तनोति विस्तारयति। उद्दीपकविभावनत्वात्। कीदृशो विधुः विरहेण मद्वियोगेन पांडु धूसरं यन्मुरारेः मुखबुजं कृष्णस्य वदनकमलं तस्य द्युतिरिव द्युतिर्यस्य सः। पुनः कीदृशः वेदनामपि तिरयन् आच्छादयन् यथा। जनकत्वे हेतुमाह। मनोभुवः कामस्य सुहृन्मित्रम्॥१॥

भा०टी० हायरे हाय! अनंगप्रबोधकारि चन्द्रमा निरन्तर सर्वजीवोंको संतापको नाशकरताहै, किन्तु मेरे हृदयमें काम पीडाको अत्यन्त दे रहाहै क्योंकि चन्द्रमाकि पाण्डु वर्ण मूर्त्ति के दर्शन करके तादृश पाण्डुवर्णकी मूर्तिवाले मुरारी मेरे हृदय देशमें सतत प्रकट होतेहै ॥ १ ॥

पूर्वगीतेन कस्याश्चिद्विपरीतस्तदुक्तं अधुना कस्याश्चित्स्वाधीनभर्तृकाया नायककर्तृकां क्रीडामाह—

अथ पंचदशप्रबंधो गुर्जरीरागेण एकतालीताले गीयते

समुदितमदने रमणीवदने चुंबनवलिताधरे॥ मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे ॥ १ ॥ रमते यमुनापुलिनवने विजयी मुरारिरधुना ॥ध्रु०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं० टी० समुदितेति । स्वाधीनभर्तृकालक्षणं "यस्या रति-गुणाकृष्टः पतिः पार्श्वं न मुंचति । विचित्रविभ्रमैर्युक्ता स्वाधीनप-तिका यथा" इति । गुर्जरीरागः । हे सखि अधुना अस्मिन्काले यमुनापुलिने यद्वनं तस्मिन् विजयी जयशीलो मुरारिः कृष्णो र-मते क्रीडति । कथं रमत इत्यत आह रम्यतेस्यामितिरमणी त-स्याः मुखे सपुलकं रोमांचसहितं यथा स्यात्तथा मृगमदतिलकं कस्तूर्याः तिलकं लिखति।कीदृशे वदने समुदितः समुपाचितः मदनः कामो यत्र सकाम इत्यर्थः। चुंबनेन वलितः सुमुखीकृत्य संको-चितः अधरो यस्य तस्मिन् चुंबनं दत्त्वा तिलकं लिखतीत्यर्थः। कस्मिन् क इव रजनीकरे चंद्रे मृगमिव लिखतीत्यर्थः॥ १॥

भा०टी०हेसखि ! अभि श्रीहरिजी अपने कामानल निर्वाण करके चार-नीमे गोपालाङ्गनोंके मुखोंका चुम्बन एवं अधरामृतको पानकरतेहै, और उन्होंके ललाटोंमें कस्तूरीका तिलक देकर और उनके साथ यमुनाके तटमें विहारकररहैहै॥ १॥ ॥ ॥ ॥ ॥ ॥

घनचयरुचिरे रचयति चिकुरे तरलिततरुणा
नने ॥ कुरबककुसुमं चपलासुषमं रतिपति
मृगकानने ॥ २ ॥

सं०टी०घनेति । तस्याः घनचयरुचिरे मेघससमूहमनोहरे चिकु-रे केशे । जातावेकवचनं । कुरवककुसुमं अम्लानं पुष्पं वा कोटिपु-ष्पं वा रचयति यथास्थानमर्पयति । पुनः कीदृशे तरलितानि चं-चलीकृतानि तरुणानामाननानि मुखानि येन । अतिसुंदरतया वी-क्षणार्थं । कीदृशं कुसुमं चपलावत् विद्युदिव सुषमा शोभा यस्य लक्ष्यलक्षितया लोहितत्वाच्च विद्युत्साम्यं । पुनः कीदृशे रतिपति-कामः स एव मृगस्तस्य कानने यथा मृगवासो वने तथा चिकुरे का-म इति कामजनके इत्यर्थः । अस्मिन्नेव मेघे विद्युद्भवति तरुणानां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेघसमयः कामजनक इति। घनोदये हरिणानामतिसुखमुत्पद्यते २

भा॰टी॰वह कामिनीका केश समूह मेघके सदृश होरहाहै,एवं वह केशपाश रति नाथ स्वरूप कुरंगके चरण स्थल हो रहे है, और कृष्णजी उन्होकी प्रशंसा करतेहै, और उन्होमे चपला सदृश कुरुवक पुष्प आरोपन करतेहै२॥

घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते ॥ मणिसरममलं तारकपटलं नखपदशशिभूषिते ॥ ३ ॥

सं॰टी॰घटयतीति। सुघने निबिडे कुचयुगगगने स्तनद्वयाकाशे अमलं निर्मलं मणिसरं मुक्ताहारमेव तारकपटलं नक्षत्रसमूहं घटयति योजयति। मृगमदरुचिः कस्तूरिकादीप्तिस्तया रूषिते। पुनः कीदृशे नखपदं नखक्षतं तदेव शशो द्वितीयाचंद्रस्तेन भूषिते अलंकृते। गगनपक्षे शोभिता घना मेघा यस्मिन्नित्यभूतोपमार्थम् ॥३॥

भा॰टी॰वह सुंदरीका स्वरूप आकाश तारोंके समान मणिमय हारसे शोभायमान होरहा है ॥ ३ ॥

जित बिसशकले मृदुभुजयुगले करतलनलिनीदले ॥ मरकतवलयं मधुकरनिचयं वितरति हिमशीतले ॥ ४ ॥

सं॰टी॰जितेति। मृदुभुजयुगले कोमलबाहुद्वये मरकतवलयं मरकतखचितकंकणमेव मधुकरनिचयं भ्रमरसमूहं वितरति ददाति विरचयतीत्यर्थः कीदृशे भुजयुगले जितबिसशकले जितं सदृशीकृतं मृणालखंडं येन। पुनः कीदृशे करतलमेव नलिनीदलं पद्मपत्रं यत्र हिमवत् शीतले संतापहरत्वात् पद्मिनीपत्रयुक्ते बिसशकले भ्रमरसमूहस्तिष्ठतीति। रूपकालंकारः ॥ ४ ॥

भा॰टी॰वह नारीके हस्त मृणाल स्वरूप है, और उसाकीहि हथेलियां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कमल स्वरूप होरहेहै, उसाके हाथोंमे जो मणिमय कंकणहै वह भ्रमरोंके तुल्य शोभादेरहेहै ॥ ४ ॥

रतिगृहजघने विपुलापघने मनसिजकनकासने ॥ मणिमयरशनंतोरणहसनं विकिरतिकृतवासने ॥ ५

सं॰टी॰ रतीति । रतेः शृंगारस्य गृहे आश्रये जघने नितंबे मणिमयरशनं मुक्तामयीं मेखलां विकिरति ददाति । कीदृशे जघने विपुलं महत्तरं अपघनं शरीरं यस्य अतिमांसल इत्यर्थः। पुनःकीदृशे मनसिजस्य कामस्य कनकनिर्मिते सिंहासने इव । कीदृशं मणिमयरशनं तोरणस्य वंदनमालिकाया हसनं उपहासो यस्मात् । यदा राजा सिंहासने उपविशति तदा वंदनमालिका बध्यते ।पुनः कीदृशे कृतं दत्तं वासनं वस्त्रं यस्मिन् । वस्त्रोपरि मेखलां बध्नातीत्यर्थः यद्वा कृतं कामेन वासनं स्थानं यत्र तादृशे ॥ ५ ॥

भा॰टी॰ वह नारीके जघन देश रतिका भवनस्वरूप एवं कामदेवको कनकरचित आसन होरहाहै, उन्हे देखकर हरिजीका मदनरण वृद्धिको प्राप्त होरहाहै, उसपर हरिने मरकतमणिचंद्रहार समर्पण कियाहै, और वह चंद्रहार तोरणस्थ पुष्पहारके सदृश शोभायमान होरहाहै ॥ ५ ॥

चरणकिसलये कमलानिलये नखमणिगणपूजिते ॥ बहिरपवरणं यावकभरणं जनयति हृदि योजिते ॥ ६ ॥

सं॰ टी॰ चरणेति । चरणकिसलयं पदमेव पल्लवं तस्मिन् यावकभरणं अलक्तकपूरणं जनयति करोतीत्यर्थः। कीदृशे चरणकिसलये हृदि योजिते कृष्णानुरागातिशयात् स्वहृदयप्रापिते स्वहृदये तस्याश्चरणं कृत्वा यावकं रचयतीत्यर्थः । कीदृशे हृदि कमलायाः निलये आश्रये । कीदृशे किसलये नखा एव मणिग-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

णाः पुष्परागादिरत्नसमूहास्तैः पूजिते अर्चिते। कीदृशं यावकाभरणं बहिरपवरणं बाह्यमाच्छादकं यत्तद्वितरतीति ॥ ६ ॥

भा॰टी॰ वह नारीके चरण कमल लक्ष्मीदेवीके निवास समानहै, और वह चरण नवरूप मणियोंसे भूषितहोरहेहै कृष्णजी उन्हेको स्वकीय वशमें स्थापन करके अलकरागोंसे भूषित होरहेहै ॥ ६ ॥

रमयति सुदृशं कामपि सदृशं खलहलधरसोदरे ॥ किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे ॥ ७ ॥

सं॰टी॰ रमयतीति। हेसखि खले दुर्जने बलभद्रस्य सोदरेभ्रातरि कृष्णे कामपि सुदृशं शोभने दृशौ नेत्रे यस्यास्तां नायिकां। सदृशं यौवनरूपगुणादिभिः तुल्यं यथा स्यात्तथा रमयति सति इह विटपोदरे लतागृहे अफलं निष्प्रयोजकं विरसं रसरहितं यथा स्यात्तथा चिरं बहुकालं किमवसं स्थितास्मि हेसखि त्वं वद कथय। हलवाहकस्य सोदर इति साभिप्रायं खल इति क्रोधविभावना७

भा॰टी॰हेसखि! मुझे निश्चयसे प्रतीत होताहै कि, निर्दय हलधरका अनुज मुझको प्रतारण करके और किसि रमणीके प्रेममे उन्मत्त होरहाहै, किंतुवह मुझे नमिले तव इस काननमें अवस्थान करना मेरा क्या कामहै ॥७॥

इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके॥ कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके८

इति श्रीगीतगोविंदे पंचदशः प्रबंधः ॥ १५॥

सं॰टी॰ इह मयि कवीनां नृपे जयदेवके कलियुगे चरितमाचरितं कलियुगेन चरितं वा दुरितं पापं न वसतु न तिष्ठतु। प्रार्थनायां लोट्। कीदृशे रसस्य शृंगाररसस्य भणनं कथनं यस्य मधुरिपोः कृष्णस्य चरणसेवके। कर्तरि यक्। अतएव कृतं हरेर्गुणानां गुणनं चिंतनं येन॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा॰टी॰हरि चरण सेवक और हरि गुण गायक कविराज जयदेवके हृदयकमलमें कभी कलियुग कलुष ना प्रवेश करे॥ ८॥

कृष्णस्यागमनात् दुःखितां सखीमाश्वासयंत्याह—

श्लोकः॥ नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे स्वच्छंदं बहुवल्लभः स रमते किं तत्र ते दूषणं॥ पश्याद्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणैरुत्कंठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति॥ १॥

सं॰टी॰ नायात इति। हे सखि हे दूति दूत्यकर्मकुशले यदि निर्दयः दयारहितः शठः धूर्तो वंचकः कृष्णो नायातः। तर्हि किं त्वं दूयसे संतप्ता भवसि। अनागमने कारणमाह बह्व्यो वल्लभाः स्त्रियो यस्य सः कृष्णः स्वच्छंदं स्वेच्छया तत्र स्थाने रमते क्रीडति ते तव किं दूषणं कः अपराधो न कोपीत्यर्थः। तर्हि कथमत्रागमिष्यतीत्यत आह पश्यति हे सखि अद्येदानीं मम इदं चेतो मनः प्रियसंगमाय कृष्णसंभोगार्थं स्वयमेव यास्यति इति त्वं पश्य जानीहि। कीदृशं चेतः दयितस्य कृष्णस्य गुणैः सौंदर्यादिभिः आकृष्यमाणं वशीकृतं। पुनः कीदृशं उत्कंठा औत्सुक्यं आर्तिः कामपीडा तयोः भरोतिशयस्तस्मादिव स्फुटत् बहिर्भवत् अपरमपि वस्त्वंतरसंकुले स्थाने स्थितं वस्तु सांकर्याद्बहिर्भवतीति स्फुटत् विदलदिति वा अन्योपि गुणैरज्जुभिराकृष्टः सन् प्रयातीति। अत्रोत्प्रेक्षालंकारः॥ १॥

भा॰टी॰लोटआती हुई दूतीको देखकर अतिविषण्ण मन होकर विषादसे राधाजी कथन करनेलगी, किहेमेरी प्यरि! तेंने मेरे कारण बहुत क्लेशोंको उठाया, परंतु तुम धूर्त्तको ल्याने सक्की नहि, इसकारण तुह्मारा कुछ अपराध नहिहै मै अच्छी तऱ्हासे जानतीहूं कि वह बहुत कामिनीयोंके प्रेमसे मग्न-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

होरहाहै, इस लीये उसके लेनेमें तुह्मारी क्या सामर्थहै! किन्तु हेसखि! तुम देखो कि मेराचित्त अभि प्यारे के लिये आपहि उनके पास गमन करेगा१॥

अथ षोडशप्रबंधो देशांकरागेणरूपकतालेगीयते
अनिलतरलकुवलयनयनेन॥ तपति न सा कि
सलयशयनेन॥ सखि यारमितावनमालिना॥ध्रु०॥

सं०टी० अनिलेति। देशांकरागः। हे सखि या नायिका वनमालिना कृष्णेन रमिता क्रीडिता सा किसलयशनेन नवपल्लवशय्यायां न तपति नोपतप्ता भवति। अथवा या वनमालिना अरमिता मादृशी सा किसलयशयने न तपति अपि तु तपत्येवेति काक्वा। कीदृशेन वनमालिना अनिलेन वायुना तरलं चंचलं यत्कुवलयं नीलोत्पलं तद्वत् नयने यस्य सः। तेन सार्द्धं रसावलोकनादिति भावः। अस्मिन् गीते संभोगवियोगौ ज्ञातव्यौ॥१॥

भा०टी०हेप्यारी! पवनसे चंचल नील कमलके तुल्यनेत्रयुक्त वन माली जिस नारींके साथ व्यवहार लीला करताहै, तिसकी पल्लवशय्या अनिर्वचनीय सुख देनेवालीहै, और मेरी शय्याके तुल्यदुखदार नहिहै॥१॥

विकसितसरसिजललितमुखेन॥ स्फुटति न
सा मनसिजविशिखेन॥२॥

सं०टी० विकसितेति। विकसितं प्रफुल्लितं यत्सरसिजंकमलं तद्वन्मनोहरं ललितं आननं यस्य स एवंभूतेन वनमालिना या रमिता सा मनसिजविशिखेन कामबाणेन न स्फुटति न द्विधा भवतीति संभोगे। वियोगे तु न स्फुटत्येवेति काक्वा॥२॥

भा०टी०हे सखि! कृष्णजीका मुख प्रफुल्लित कमलके सदृशहै, उन्होने जो कामिनीयोंकी मनसाको पूर्णकियाहै सोकामिनीयोंको मन्मथ कभि मेरे शरीरके सदृश पीडा देने नहि सक्ताहै॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमृतमधुरमृदुतरवचनेन ॥ ज्वलति न सा मलयजपवनेन ॥ ३ ॥

सं०टी०अमृतेति । अमृतवत् मधुराणि मनोज्ञानि मृदुतराणि अतिकोमलानि वाक्यानि यस्य तेन वनमालिना या रमिता सा मलयजपवनेन मलयानिलेन न ज्वलति न संदीप्यते संभोगे । वियोगे तु सा न ज्वलति अपि तु ज्वलत्येव ॥ ३ ॥

भा०टी०हे सखि! लालजीके वचन सुधाके तुल्यहै, और लालजी महाराजने जो नारीयोंकी मनोरथको पूर्णकियाहै, मलय पवन और उसके शरीरको दहन करने नहि सक्ताहै ॥ ३ ॥

स्थलजलरुहरुचिकरचरणेन॥लुठति न सा हिमकरकिरणेन ॥ ४॥

सं०टी०स्थलेति । स्थलोद्भवजलरुहाणां रुचिरिव पद्मानां रुचिर्येषां तादृशौ करौ चरणौ च यस्य तेन वनमालिना या रमिता सा हिमकरस्य किरणेन चंद्रस्य दीप्त्या न लुठति नोत्तप्ता भवति। इतिसंभोगे वियोगे तु न तपति अपि तु तपत्येव। स्थले पद्मस्यातिलोहितत्वेनोपादानम् ॥ ४ ॥

भा०टी०हेसखि! कृष्णचंद्रजीके पद एवं हस्त स्थलकमलके सदृशहैं इसलिये कृष्णचंद्रजीने जिन रमणीयांकी अभिलाषाको पूर्ण कियाहै, सो-नारीयां मेरे समान चंद्रिकासे दग्ध नहि होतिहै ॥ ४ ॥

सजलजलदसमुदयरुचिरेण ॥ दलति न सा हृदि चिरविरहेण ॥ ५ ॥

सं०टी०सजलेति । सजलजलदसमुदयवत् सोदकमेघोदकवत् रुचिरः सुंदरस्तेन वनमालिना या रमिता सा हृदि मनसि विरहभरेण विरहाधिक्येन न दलति न विदीर्यते इति पूर्ववत् ज्ञेयम् ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०हेसखि! जो नारी आज नवजल धर स्वरूप कृष्ण चंद्रके साथ क्रीडाको करतीहै, वह नारी मेरे सदृश विरहकी पीडाको प्राप्त न होगी ॥५॥

कनकनिकषरुचिशुचिवसनेन ॥ श्वसिति न सा परिजनहसनेन ॥ ६ ॥

सं०टी०कनकेति। कनकनिकषस्य सुवर्णरेखाया रुचिरिव शुचि विमलं वस्त्रं यस्य पीतांबरेणेत्यर्थः।तेन वनमालिना या रमिता सा परिजनहसनेन लोकहास्येन सखीहास्येन न श्वसिति संभोगे। वियोगे तु परिजनहसनेन सपत्नीहसनेन न श्वसिति अपि तु श्वसित्येव ॥ ६ ॥

भा०टी०हेसखि! जिसनारीने आज पवित्र कनक वर्ण पीतांबरधारी नारायनके साथ रति प्रसंग कियाहै, सो अपने मनमें अहंकारको प्राप्त होकर किसीकी और नहि देखतीहै, और मेरे सदृश स्वजनके तिरस्कारसेभी नहि डरतीहै ॥ ६ ॥

सकलभुवनजनवरतरुणेन ॥ वहति न सा रुजमतिकरुणेन ॥ ७ ॥

सं०टी०सकलेति सकलभुवने त्रैलोक्ये ये जनाः युवानस्तेभ्योऽपि वरेण श्रेष्ठेन तरुणेन यूना अतिकरुणेनातिदयावता वनमालिना या रमिता सा रुजं पीडां न वहति इति संभोगे। वियोगे तु सा रुजं वहत्येव। कीदृशेन कृष्णेन करुणां दयां अतिक्रांतेन निर्दयेनेत्यर्थः ॥ ७ ॥

भा०टी०हे सखि! जीस कामिनी ने आज दिन भुवनमोहन केशवजीके साथ रतिकियाहै, सो नारी मेरे समान कामानल सें दग्ध नही होने सकिहै।

श्रीजयदेवभणितवचनेन ॥ प्रविशतु हरिरपि हृदयमनेन ॥ ८ ॥ इति श्रीगीतगोविंदे षोडशः प्रबंधः १६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०अनेन श्रीजयदेवभणितं यद्वचनं गीतरूपं तेन हरिः कृष्णोपि हृदयं भक्तानां चित्तं प्रविशतु पुण्यदातृत्वात् । कीदृशं हृदयं हरिचरणचिंतनात् विनष्टपापमिति भावः ॥ ८ ॥

भा०टी०श्रीजयदेव स्वामिकृत यहि श्रीराधाकृष्ण विलास रूपी अमृत सकल भक्तोंके हृदयमें प्रविष्टरहै ॥ ८ ॥

पीडयंतं मलयानिलं प्रार्थयते—

मनोभवानंदनचंदनानिल प्रसीद रे दक्षिण मुंच वामतां ॥ क्षणं जगत्प्राणविधाय माधवं पुरो मम प्राणहरो भविष्यसि ॥ १ ॥

सं०टी०मनोभवेति । हे चन्दनानिल मलयसंबंधिवात प्रसीद ममोपरि प्रसन्नो भव । रे इत्याक्षेपसंबोधनं दुःखकारित्वात् । दक्षिण त्वं वामतां प्रतिकूलतां मुंच त्यज । चन्दनसंसर्गित्वात्तव वक्रत्वं नोचितमितिभावः । ननु मयि वामत्वं नास्तीत्यत आह । हे मनोभवानन्दन काममानन्दयसीति तदुद्बोधेनैव मत्प्रातिकूल्यमाचरसीत्यर्थः । यदि च वामतामपि न मुंचसि तदा हे जगत्प्राण जगतां प्राणभूत क्षणं अल्पकालं माधवं पुरो विधाय कृष्णमग्रे कृत्वा मम प्राणहरो भविष्यसि । प्राणगमनसमये हि कृष्णदर्शनं अतिदुर्लभं इति जगतां प्राणस्य प्राणसंरक्षणं समुचितमिति भावः । दक्षिणस्य वामत्वं जगत्प्राणस्य प्राणहरत्वमिति विरोधनामालंकारश्च ॥ १ ॥

भा०टी०हेमदनसखा चंदनवायु ! आप दक्षिणवर्त्तसे आते हैं आप मेरी और प्रसन्न हो । किंतु यदि कामदेवके सहाय हेतु आप चंदन तरुके कोटस्थ सर्पोंके विषसें मेरे प्राणके नाश करनेकी मनसा करो तब एकबार माधवके साथ मिलाप करायके पश्चात् मेरे प्राणको नष्ट करियो ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनरपिसखींप्रत्याह—

रिपुरिव सखी संवासोयं शिखीव हि मानिलो
विषमिव सुधारश्मिर्दूरं दुनोति मनोगमम् ॥
हृदयमदये तस्मिन्नेवं पुनर्वलते बलात् कुवल
यदृशां वामःकामो निकामनिरंकुशः ॥ २ ॥

सं०टी०रिपुरिति । सः अयं सखीसंवासः सखीभिः सह सम्यक् वासो वासस्थानं रिपुरिव शत्रुरिव मम मनोऽतिसंतापयति । हिमानिलः शीतलवायुः शिखीव वह्निरिव मम मनो दुनोति । सुधारश्मिश्चंद्रो विषं कालकूटमिव दूरं दुनोत्यतिसंतापयति तस्मिन् अदये करुणारहिते प्रिय एवं विचारितमेव मम हृदयं पुनःपुनरपि बलात् हठाद्वलते निवार्यमाणमपि तत्रैव निर्गच्छतीत्यर्थः । यतः कुवलयदृशां नीलोत्पलाक्षीणां कामः कंदर्पो निकामनिरंकुशः अतिशयेन स्वेच्छाचारी अपरतंत्र इत्यर्थः । अतएव वामः क्रूरः । तदुक्तं रसिकरहस्ये " निषिद्धे वर्तते प्रायः कामो वामः स्वभावत" इति । सखीनां रिपुवद्धिमानिलस्य वह्निवत् सुधांशोर्विषवदिति विरोधालंकारश्चात्र ॥ २ ॥

भा०टी०हेसखि! जिस मोहन मूर्त्तिके स्मरण होनेसे सखियोंको संसर्गभि मेरे कारण शत्रुके सखा संतुल्य होताहै; वायु बहुत शीतल होनेसेंभि मेरे शरीरको अग्निके समान दहन कर रहा है, और हिमांशु विषमय प्रतीत होरहे है, वह निर्दयकृष्ण मेरे मनको वारंवार धावित करारहा है । हाय रे हाय नारीयोंके प्रश्न उनके आपना नहि है ॥ २ ॥

पुनरपि जीवितनिरपेक्षत्वेन मलयानिलादीन्प्रत्याह—

बाधां विधेहि मलयानिल पंचबाण प्राणान्
गृहाण न गृहं पुनराश्रयिष्ये ॥ किं ते कृतांत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भगिनि क्षमया तरंगैरंगानि सिंच मम शाम्यतु देहदाहः ॥ ३ ॥

सं०टी०बाधामिति । हे मलयानिल चन्दनवायो बाधां मम पीडां विदेहि कुरु । हेपंचबाण हेकाम त्वं मम प्राणान् गृहाण ! यथा पुनरपि अहं गृहं नाश्रये न यास्यामि तथा प्राणान् गृहाणेत्यर्थः । हे कृतांतभगिनि यमस्वसः यमुने तव क्षमया शांत्या किं यमभगिन्यास्तव शांतिर्नोचितेति भावः । त्वत्तरंगैः स्वकीयैः कल्लोलैः मे अंगं निषिंच प्लावय तेन मम देहदाहः शरीरतापः शाम्यतु । मरणमेव भवत्वित्यर्थः ॥ ३ ॥

भा०टी०श्रीकृष्णजीके विरहसें राधाराणी कथन करतीहै, किमलय पवन तुम अभि विषपूर्ण है, इसकारण मेरे प्राणको नाश करो, हेमदन तुह्मारे पांच वाणोंसे मेरे पांचहि प्राण नाश करनेको योग्यहै, हेधर्म्मराजसहोदरा यमुना तुमको और अपने भाईको बुलाने नहिहोगी आपहि तुम अपने तरंगसे मेरे प्राणको हरन करो ॥ ३ ॥

सर्गांते कविर्नमस्करोति–

श्लोकः ॥ सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिः संदर्शितेंदीवरम् ॥ स्वच्छंदं मकरंदसुंदरगलन्मंदाकिनीमेदुरं श्रीगोविंदपदारविंदमशुभस्कंदाय वंदामहे ॥४॥

सं०टी०सांद्रेति । श्रीगोविंदस्य पदारविंदं श्रीकृष्णस्य चरणपद्मं वंदामहे नमामः । किमर्थं अशुभस्कन्दाय अशुभनाशार्थं । कथंभूतं पदारविंदं सांद्रानंदाः निबिडहर्षाः पुरंदरादिदिविषदः इन्द्रादिदेवास्तेषांवृन्दैः समूहैरमंदादरात् अतिशयितबहुमानादानम्रैः समंतान्नतियुक्तैःकर्तृभूतैःमुकुटानामिंद्रनीलमणिभिःनीलवर्णैः मणि–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भिः करणभूतैः संदर्शित इंदीवरभ्रमो यत्र। पुनः कीदृशं स्वच्छंदं यथा स्यात्तथा मकरंदवत्सुंदरं पुष्परसवन्मधुरं यथा गलंत्या मंदाकिन्या वियद्गंगया मेदुरं सांद्रं स्निग्धमित्यर्थः। श्रीशब्द उत्कर्षार्थः नागरश्चतुरो नारायणो यत्र सः तथा। शार्दूलविक्रीडितं वृत्तम्॥ ४॥

भा॰टी॰ श्रीमान् जयदेवस्वामीजी कहतेहै, कि पुरन्दरादि देवगणोके मुकुट शोभित शिर कृष्णचंद्रके जिस चरण कमलोंमे विन्यस्त हेतु मुकुटके इन्द्रनीलमणियां भ्रमरके तुल्य शोभायमानहोतेहैं, और जिन चरण कमलोंसें त्रैलोक्यतारिणी मंदाकिनी विगलितहोकर स्निग्ध सीतलसे उन्हे निरन्तर शीतलकरतीहै, मेने अमंगलके विनाश कारण उह्न चरणोंको वन्दना वारंवारकरताहू॥ २॥

इति श्रीकविराजश्रीजयदेवकृतगीतगोविंदे महाकाव्ये श्रीनागरनारायणोनाम सटीकः सप्तमः सर्गः॥ ७॥

अथ अष्टमः सर्गः प्रारभ्यते

अधुना राधा प्रियं प्रातरागतं दृष्ट्वा साभ्यसूयवचनमेवमाह—

श्लोकः॥ अथ कथमपि यामिनीं निनीय स्मरशरजर्जरितापि सा प्रभाते॥ अनुनयवचनं वदंतमग्रे प्रणतमपि प्रियमाहसाभ्यसूयम्॥ १॥

सं॰टी॰ अथेति। अथानंतरं मंगलार्थे वा। कथमपि सकष्टं यामिनीं रात्रिं निनीय नीत्वा स्थिता सा राधा प्रियं कृष्णं साभ्यसूयं सेर्ष्यं यथा स्यात्तथाह उक्तवती। कीदृशी सा स्मरशरैः कामवाणैः जर्जरितापि विद्धापि। कीदृशं प्रियं प्रातः समये अनुनयाय प्रबोधाय वचनं वाक्यं वदंतं। पुनः कीदृशं अग्रे प्रणतमपि नम्रमपि॥ १॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी० परन्तु राधाजीने वह रात्रिको अतिकष्टोंसे व्यतीतकर कामानलके प्रभावसे नितान्त क्षीण देही होगई, और विरह वेदनासे भूमिपर शयन करती भई । प्रभात समयमें कृष्णचंद्र महाराज राधाराणीके कुंजमें उपस्थित होकर बहुत नम्रभावको धारण करके उनके चरणोंमें विविध प्रकारकी विनति करनेलगा, किन्तु कृष्णजोके शरीरमें कामभोगके चिन्ह देखकर श्रीराधाजीने हिंसाके कारण बहुतहि कथन किया ॥ १ ॥

साभ्यसूयवचनमेव गीतेनाह—

अथ सप्तदशप्रबंधो भैरवरागेण यति ताले गीयते

रजनिजनितगुरुजागररागकषायितमलसनिमेषं ॥ वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशं ॥ १ ॥ हरिहरि याहि माधव याहि केशव मा वद कैतववादं ॥ तामनुसर सरसीरुहलोचनया हरति विषादम् ॥ ध्रु० ॥

सं०टी० रजनीति । अस्मिन् खंडिता नाम नायिका वर्ण्यते तल्लक्षणं "उल्लंघ्य समयं यस्याः प्रेयानन्योपभोगवान् । भोगलक्ष्मांकितः प्रातरागच्छेत्सा हि खंडिता । निद्राकषायकलुषीकृतताम्रनेत्रो नारीनखव्रणविशेष विचित्रितांगः।यस्याः कुतोपि गृहमेति पतिः प्रभाते सा खंडितेति कथिता कविभिः पुराणैः" । २ । भैरवरागः । तल्लक्षणं "सरोवरस्थे स्फटिकस्य मंडपे सरोरुहैः शंकरमर्चयंती । तालप्रभेदप्रतिपत्रगीता गौरीतनुर्नारद भैरवीयं" इति । हरिहरिखेदानुकारे अव्ययं । हेकेशव याहि हेमाधव याहि । कोपाधिक्येन द्विरुक्तिः । कैतववादं च कपटवाक्यं मा वद । हे सरसीरुहलोचन कमलनयन तां नायिकां अनुसर गच्छ या तव विषादं हरति दूरीकरोति । कथं विषादवत्त्वमित्याह हे कृष्ण त-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व नयनं नेत्रं स्फुटं व्यक्तं तस्यानुरागमिव वहति धारयति। कीदृशं नयनं रजनिजनितेन रात्रिकृतेन गुरुणातिशयेन जागररागेण जागरोत्पन्नलोहितरागेण कषायितं आरक्तंकृतं। पुनः कीदृशं रात्रिजागरेणालसो मंथरो निमेषः पक्ष्मचलनं यस्य। कीदृशं अनुरागं उदितः कथितः रसस्य अन्यकामिनीविषयशृंगाररसस्याभिनिवेशस्तत्परता येन। मा लक्ष्मीः तस्याः धव। इत्यनेन तत्पतित्वेन चांचल्यं द्योतितं। केशवेत्यनेन क्लेशनाशकत्वेनापि क्लेशशब्दानुवृत्तित्वमनुचितमिति द्योतितम् ॥ १ ॥

भा०टी०राधाराणी कथनकरनेलगी कि हे माधव! रात्रिके जागरणसें तुह्मारे दोनो नयन लोहि रागको धारण कररहे है, और वे नयन आलस्यकेलिये निद्रासे मुदितभी होतेहै. तुह्मारे इस विकारसे तुह्मारी नवीन प्यारीकी और अनुरागके प्रमाण लक्षित होताहै। छी छी बडी लज्जा वार्ता है माधव! मे विनतिकर कहतीहूं तुम छल ना करो; अभि तुम इस स्थानसे चलो, जो कामिनीका प्रेमसरोवरमे मग्नहोकर रात्रिको पवित्र कियाथा; अभी तुम उसके पास जाओ, उससे तुह्मारा विषाद दूर होजावेगा ॥ १ ॥

ननु त्वदन्वेषणार्थं जागरान्मे नेत्रयोर्लौहित्यमलं दुःखशंकयेत्यतआह—

कज्जलमलिनविलोचनचुंबनविरचितनीलिमरूपं ॥
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपं २

सं०टी० कज्जलेति। हे कृष्ण तवारुणं तांबूलरागेण लोहितं दशनवसनमधरः तनोः शरीरस्यानुरूपं सादृशं तनोति विस्तारयति कीदृशं दशनवसनं कज्जलेनांजनेन मलिने श्यामे ये विलोचने नेत्रे तयोश्चुंबनेन विरचितं कृतं नीलिमरूपं श्यामतारूपं यस्य। आरक्ताधरस्य नेत्रचुंबनेन श्यामताप्रतिपादनात् तनोरनुरूपत्वं। अन्यस्यां कामिन्यां कृष्णस्यानुरागः सूचितः ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०श्रीराधाराणी माधवजीके प्रति कथन करनेलगि, कि हे माधव! आज रमणीके कज्जल रंजित नयनोकों चुम्बन करके तुह्मारा अधर मलीन होरहाहै, और तुह्मारे मुखकी शोभा चुम्बनसे नीलमणीके सदृश वरणको धारण कररहीहै; आज तुह्मारे दांत एवं भेष विरूप होरहेहै, और तुह्मारे रूपकी छविमें अनंग शरसदृश नखोंके प्रहारभी प्रतीयमान होते है ॥ २ ॥

किंच—

वपुरनुवहति तव स्मरसंगरखरनखरक्षतरेखं ॥ मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखं ॥ ३ ॥

सं०टी०वपुरिति । हे कृष्ण तव वपुः शरीरं रतिजयलेखं सुरतविजयप्रशस्तिलेखनपत्रं अनुवहति अनुकरोति । कीदृशं वपुः स्मरसंगरे कामयुद्धे खराणां तीक्ष्णानां नखानां क्षतान्येव रेखा यत्र। कस्या इव मरकतशकले नीलमणिखंडे कलिताया निर्मितायाः कलधौतलिपेः सुवर्णविरचिताक्षरस्य विन्यासस्येव । वपुषो नीलत्वान्नखक्षतस्फुटकत्वान्मरकतखंडार्पितसुवर्णाक्षरसाम्यम् ॥ ३ ॥

भा०टी०श्रीराधाजी कथन करतीहै, कि हे माधव ! तुह्मारे सुंदर श्याम शरीरमें जो नखोकी रेख सोभायमान ताको देख रहेहैं, उनको देखके प्रतीत होताहै, कि मरकत खण्डमें रतिविजयके विवरणहे ममय अक्षरमे लिखाहै॥

ननु मार्गं विस्मृत्य गच्छतो मे वपुषि वने कंटकादिस्पर्शादेवं दृश्यते न तु नखांकमित्यत आह—

चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारं ॥ दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम् ॥ ४ ॥

सं०टी०चरणेति इदं उदारं मनोहरं तव हृदयं मदनद्रुमस्य कामवृक्षस्य हृदयांतर्गतस्य नवकिसलयपरिवारं नूतनपल्लवसमूहं ब-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिर्दर्शयतीव प्रकटयतीव । कीदृशं हृदयं चरणकमलादन्यस्त्रीपाद-पद्मात् गलता स्रवता अलक्तकेन सिक्तं उक्षितं किसलयपदेनैव नू-तनत्वविधानात्पुनर्नवपदं अद्यतनत्वसूचनार्थं। रूपकालंकारश्चात्र ४

भा०टी०हेमाधव! वह रमणीकी चरणोंके विगलित अलक्त रंगसे तुह्मारा व-क्षःस्थल रंजित होकर नवीनशाखायुक्त मदन वृक्षके सदृश शोभायमान होरहाहै

दशनपदं भवदधरगतं मम जनयति चेतसि खे-दं ॥ कथयति कथमधुनापि मया सह तव व-पुरेतदभेदम् ॥ ५ ॥

सं०टी०दशनेति । भवदधरगतं तवाधरोष्ठे वर्तमानं दशनपदं अन्यकामिनीदंतक्षतं मम चेतसि खेदं संतापं जनयति करोतीत्य-र्थः। एतादृशं नवपदं तव वपुरधुनापीदानीमपि मया सह अभेदं क-थं कथयतीत्यर्थः । न विद्यते भेदो यस्य पूर्वं मया सह तव वपुषो भेदो नास्तीति स्थितं । इदानीं तु तद्विपरीतमिति मया सह एवेति विभावनालंकारश्चात्र ॥ ५ ॥

श्रीराधाराणीहै श्रीमाधवजीके प्रतिकहतीहै, कि हे माधव! आज तुह्मा-रे अधरमें दन्तोंके चिन्ह देखकर मेरामन दुःसह खेदको प्राप्त होताहै । हायरे हाय! मेंने क्यों एतत्समय पर्य्यंत तुमको मुझपर लिप्तबोलके जानतीहै५

ननु तवोपायनार्थं कमलत्रोटनं कृतवति मयि पद्मकोशादापत-ता भृंगेण ममाधरो दष्टो ननु दंतक्षतमित्यत आह—

बहिरिव मलिनतरं तव कृष्ण मनोपि भविष्यति नूनं ॥ कथमथ वंचयसे जनमनुगतमसमशर-ज्वरदूनम् ॥ ६ ॥

सं०टी०बहिरिवेति । नूनमेवेति वितर्के हे कृष्ण तव चित्तमपि बहिरिव मलिनतरं श्यामं भविष्यतीति नूनं तर्कयामि । ननु मालि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्यं त्वया कथंज्ञातमित्यत आह अथान्यथा त्वं असमशरः कामस्त-स्य ज्वरेण पीडया दूनमुपतप्तं अनुगतं त्वामनुसृतं मल्लक्षणं जनं कथं वंचयसे प्रतारयसि । अतः कृष्णत्वं कौटिल्यमेव । नूनमिति शब्दो-पादानादुत्प्रेक्षालंकारः ॥ ६ ॥

भा०टी०श्रीराधाजी कहती है कि हे माधव! जैसे तुह्मारे संगविकार को प्राप्तहोरहाहै तैसेहि तुह्मारा मन विकारयुक्त होरहाहै; और इसलिये तुम तुह्मारे आश्रित और मदनसें पीडित वह किंकरीको प्रतारण करतेहै ॥६॥

भ्रमति भवानबलाकवलाय वनेषु किमत्र वि-चित्रं ॥ प्रथयति पूतनिकैव वधूवधनिर्दयबल-चरित्रम् ॥ ७ ॥

सं०टी०भ्रमतीति । अबलाकवलाय स्त्रीणां ग्रसनार्थं भवान् व-नेषु अरण्येषु भ्रमति । अत्र स्त्रीपापे किं विचित्रं न किमपीत्यर्थः। यतः पूतनिकैव राक्षस्येव वधूवधे स्त्रीवधार्थं निर्दयं दयारहितं त-व बालचरित्रं बालचेष्टितं प्रथयति ख्यापयति । यद्वा हे वधूवधनिर्दय शिशुना त्वया या राक्षसी हता तस्मिंस्त्वयि यूनि संप्रति कोमलांगी-नामस्माकं मारणे किं चित्रमिति भावः ॥ ७ ॥

भा०टी०श्रीराधाजी कहतिहै कि हे माधव, तुम अरण्यमें केवल नारी योंके वध करणेके हेतु भ्रमण करतेहै, और यह कर्म साधनमें तुम बडे प ण्डितहै, क्योंकि तुम अपने बालकसमयमे पूतनानाम राक्षसीको विनाश करके अपने चरितको अच्छितऱ्हासे प्रकट कियाहै ॥ ७ ॥

श्रीजयदेवभणितरतिवंचितखंडितयुवतिविला-पं ॥ शृणुत सुधामधुरं विबुधा विबुधालयतोपि दुरापं ॥ ८ ॥ इतिश्रीगीतगोविंदे सप्तदशःप्रबंधः १७

सं०टी०श्रीजयदेवेति। हे विबुधाः पंडिताः श्रीयुतजयदेवेन भणि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त उक्तश्चासौ रतिवंचितखंडितयुवतिविलापस्तं शृणुत आकर्णयत। कीदृशं विलापं सुधातोपि मधुरं मनोहरं। तत्र हेतुमाह विबुधालयतो स्वर्गादपि दुरापं दुर्लभं। तदुक्तं " तव कथामृत " मिति श्रीभागवते। ८॥

भा०टी० हेसकलगुणनिधान पण्डितगण, तुम कृष्णप्रेमभक्त श्रीकवि जयदेव स्वामीके रचित यह रतिरसवंचित राधाराणीकी परिवेदन कविवरणोंको श्रवण करो। ये वृत्तान्त अमृत रससे भी श्रेष्ठहैं, औ- स्वर्ग धामसेभि अतिपवित्रहैं॥ ८॥

श्लोकः।तवेदं पश्यंत्याः प्रसरदनुरागंबहिरिव प्रियापादालक्तच्छुरितमरुणद्योति हृदयम्॥ममाद्य प्रख्यातप्रणयभरभंगेन कितव त्वदालोकः शोकादपि किमपि लज्जां जनयति॥ १॥

सं०टी०तवेदमिति। हे कितव वंचक त्वदालोकस्तव दर्शनं प्रख्यातस्य लोकप्रसिद्धस्य प्रणयभरस्य प्रेमातिशयस्य भंगेन नाशेन यः शोकस्तस्मादपि मम अद्य किं अनिर्वचनीयां लज्जां जनयति। कीदृश्या मम तवेदं हृदयं पश्यंत्याः। कीदृशं हृदयं प्रियायाः पादालक्तकेन चरणसंबंधियावकेन छुरितं व्याप्तं अतएव अरुणा रक्ता छाया दीप्तिर्यस्य तादृशं। अरुणद्योतीतिपाठे अरुणः संध्यारागस्तद्वद्द्योतितुं शीलमस्येति तादृशं हृदयं समीक्ष्य कृते बहिः प्रसरदनुरागमिव बाह्यप्रसरन् अनुरागो यस्य रागो हि अरुणो वर्ण्यते॥ १॥

श्रीराधाजी पुनरवार कथन करनेलगी कि हे माधव, आज तुह्मारी मूर्त्तिको देखकर मेरे हृदय में बहुत दिन के प्रेमभंग भय उपस्थित हुवा है। और उसी कारण लज्जा और दुःख ने मेरे को आश्रय कियाहै क्यों की तुह्मारे हृदय तुह्मारे नवीन प्रेमिका का चरण गलित अलक्तकर रसे रंजित हुवाहै॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं सर्गांते कविर्भक्तानाशिषयति—

श्लोकः। प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं राधायाश्चकितं विलोक्य हसति स्वैरं सखीमंडले ॥ व्रीडाचंचलमंचलं नयनयोराधाय राधानने स्वादुस्मेरमुखोयमस्तु जगदानंदाय नंदात्मजः॥२॥

सं०टी०प्रातरिति । नन्दात्मजोयं कृष्णः जगदानन्दायास्तु लोकसुखार्थं भवतु । कीदृशः व्रीडया चंचलं लज्जया चलायमानं नयनयोर्नेत्रयोरंचलं कटाक्षं राधानने राधामुखे आधाय अर्पयित्वा स्मेरमीषद्धास्ययुक्तं मुखं यस्य सः। स्मेरमुखकारणमाह कस्मिन् सति प्रातः उषसि अच्युतं कृष्णं नीलं निचोलं वस्त्रं यस्य श्यामवस्त्रधरं विलोक्य दृष्ट्वा अनु च राधाया उरः वक्षःस्थलं संवीतपीतांशुकं परिधानीकृतपीतांबरं चकितं सविस्मयं यथा स्यात्तथा विलोक्य सखीसमूहे स्वैरं शनैर्हसति सति वस्त्रपरिवर्त्तनमालोक्य जहास इत्यर्थः। विलक्ष इति विस्मयान्वितः विषयी इति भावप्रसिद्धः शब्दः । शार्दूलविक्रीडितं वृत्तम् ॥ २ ॥

भा०टी०किसी दिन प्रभात समयमे सर्व सखियां श्रीराधाराणीके अंगमें लालजी महाराजके पीत वस्त्रको और कृष्ण चंद्रजीके अंगमें राधाके नील वस्त्रको देखके बहुत तरहसे परिहास करतीथीं, इसलीये राधारमण किंचित लाज्जित होकर श्रीराधाजीका मुखरूपी कमलपर दृष्टिपात कियाथा यह लीला व्रजराज कुमारकी सर्व जगतको मङ्गल करे ॥ २ ॥

इति श्रीकविराजश्रीजयदेवकृते गीतगोविंदे महाकाव्ये खंडितावर्णने विलक्षणलक्ष्मीपति र्नामाऽष्टमः सर्गः ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथनवमः सर्गः प्रारभ्यते

प्रणयकोपात् हरिमधिक्षिप्येदानीं कृतपश्चात्तापां सखी आह—

गीतिः॥ अथ तां मन्मथखिन्नां रतिरसभिन्नां विषादसंपन्नां॥ अनुचिंतितहरिचरितां कलहां-तरितामुवाच रहः सखी ॥ १ ॥

सं०टी०अथेति । अथानंतरं मंगलार्थं वा । सखी तां राधां उवा-चोक्तवती । कीदृशीं तां मन्मथेन कामेन खिन्नां दीनां । पुनःकीदृ-शीं रतिरसेन भिन्नां रहितां अतएव विषादेन दुःखेन संपन्नां युक्तां अत एवानु वारंवारं चिंतितं हरेश्चरितं पुराविलासो यया तां कल-हेन प्रीतिकलहेनांतरितां व्यवहितां । अत्र कलहांतरिता नायिका वर्ण्यते तल्लक्षणं भरतेनोक्तं " प्राणेश्वरं प्रणयकोपभरेण लभ्यं तं चाटुकारमचिरादवधार्य पश्चात् । संतप्यते मदनवह्निशिखासहस्रैर्वा ष्पाकुलानुकलहांतरितेति सा स्यात् " इति । १ ॥

भा०टी०श्रीराधाजीनेअभिमान करा और माधवजीको सन्मान नहि किया । फलतः राधाजी रति रस सम्भोग करने विफल होकर माधवजी को कठोर व्यवहार की चिन्ता करतीथी, उसी समयमें सखी आकर उ-न्हेंकथनकरनेलगी ॥ १ ॥

अथ अष्टादशप्रबंधो गुर्जरीरागेण यतिताले गीयते

हरिरभिसरति वहति मधुपवने॥ किमपरमधि-कसुखं सखिभवने ॥ माधवे मा कुरु मानिनि मानमये ॥ ध्रु० ॥

सं०टी०हरिरिति । गुर्जरीरागः यतितालस्तु । अये हे मानिनि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिमानवति राधे माधवे कृष्णे मानं अभिमानं मा कुरु माकार्षीरिति । प्रार्थनायां लोट् । यतः मधुपवने वसंतवायौ वहति सति हरिः अभिसरति स्वयमेव त्वदीयां संकेतभूमिमागच्छतीति । हे सखि राधे भवनेपि गृहेपि अपरं अधिकसुखं अतिशयसुखं किं अपितु न किंचिदस्ति नायकस्य स्वयमागमनात् कोपो न युक्तइत्यर्थः॥१॥

भा०टी०सखी श्रीराधाराणी सें कथन करने लगि, की हे प्यारी ! श्रीमाधवजी तुह्मारे आशा के पूरण करने के कारण इस स्थानमें आये है, देखो अभीसे सीतल सुंदर पवन वहती है, एवं आज भवन आनन्द से भराहै। हेमानिनी मानवाली! श्रीमाधवजीके और अभिमान ना करना चाहिये॥१॥

अपि च–

तालफलादपि गुरुमतिसरसं ॥
किं विफलीकुरुषे कुचकलशं॥ २ ॥

सं०टी०तालेति । हे राधे तालफलादपि काठिन्येन स्थौल्येन वर्तुलत्वेन च गुरुं अधिकं कुचकलशं स्तनघटं किं किमर्थं विफलीकुरुषे कृष्णहस्तव्यापारपरिशीलनाभावाद्वैफल्यमिति भावः । कीदृशं अतिसरसं अतिशयरसयुक्तं तस्मिन् दृष्टे यूनां रसाविर्भावाद्धृदयाल्हादकरमिति यावत् ॥ २ ॥

भा०टी०सखी श्रीराधाराणी जीसें कथन करतीहै; कि हेप्यारीजी! तुह्मारे दोनो पयोधर तालफलसें भी रसाल एवंस्थूलहैं, इस कारण उनको विफल करनानहि चाहिये ॥ २ ॥

ननु यदा हरिरागतस्तदा त्वया न कथितमित्यत आह—

कति न कथितमिदमनुपदमचिरं॥
मा परिहर हरिमतिशयरुचिरं॥३॥

सं०टी०कतीति । हे राधे इदं अनुपदं स्थाने अचिरं सांप्रतं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कति कतिवारान्मया न कथितं किंतु बहु कथितमेव। किं तदित्यत आह त्वं अतिशयरुचिरं अतिकमनीयं हरिं कृष्णं मा परिहर मावज्ञासीरिति मा त्यज ॥ ३ ॥

भा०टी० सखी श्रीराधाराणींसे कथनकरने लगी, कि हे प्यारी ! प्यारे माधव तुझे कुच्छकहनेके पहिले तुम उनकी और अप्रसन्नहो; और उन्हे त्याग नाकर ॥ ३ ॥

एवं सुमुखीं प्रत्याह—

किमिति विषीदसि रोदिषि विकला ॥
विहसति युवतिसभा तव सकला ॥ ४ ॥

सं०टी०किमितीति। विकलाअसावधानेंद्रिया किमिति कस्मात् विषीदसि दुःखिता भवसि रोदिषि च क्रंदसि मदुक्तनिराकरणात् इदानीं विषादो रोदनं च व्यर्थमिति सकला संपूर्णा युवतिसभा तरुणीसमाजः भवत्या विहसति उपहासं करोति। तवेति ‘ कर्मण्यपीति केचित् ’ इति षष्ठी ॥ ४ ॥

भा०टी० सखि श्रीराधाराणींसे कथनकरतीभई, की हेप्यारी! तुम दुःखित होके क्यों रोदनकरतीहै! तुह्मारे एतादृश व्यवस्थाको देखनेसें सर्वकामिनीयां उपहासकरेंगियां ॥ ४ ॥

तर्हि किं करोमीत्यत आह—

मृदुनलिनीदलशीतलशयने ॥
हरिमवलोकय सफलय नयने ॥ ५ ॥

सं०टी०मृदुनलिनीदलेन कोमलपत्रेण शीतले कृते शयने शय्यायां स्थितं हरिं कृष्णमवलोकय पश्य दर्शनान्नयने नेत्रे सफलय सफले कुरु ॥ ५ ॥

भा०टी० सखि श्रीराधाजीसे कथन करनेलगि, की हेप्यारी! वह सु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्दर कमलपत्रकी शय्यामें श्रीमाधवजीका शयन करवायकर अपने दो-नो नेत्रों को तृप्तिसे परिपूर्णकरो ॥ ५ ॥

विचारयंतीं प्रत्याह—

जनयसि मनसि किमिति गुरुखेदं ॥
शृणुमम वचनमनीहितभेदम् ॥ ६॥

सं०टी०हे राधे त्वं मनसि गुरुखेदं महद्दुःखं किमिति जनयसि उ-त्पादयसि तस्मान्मम वचनं वाक्यं शृणु आकर्णय। कीदृशं वचनं अनीहितः अनाकांक्षितो भेदो विरहो येन। भवत्या हितमेव वचनं वदामीत्यर्थः। अतएव शृणु ॥ ६ ॥

भा०टी० सखि श्रीराधाजीसे कथन करतीभई, की हे प्यारी! किस-लिये अपने मनमें तुम इतना खेद करतीहो? में तुह्मारी मंगलकरने कि चिं-ताकरतीहूं; तुम मेरेवचन को श्रवण करो ॥ ६ ॥

कीदृशं वचनमित्यत आह—

हरिरुपयातु वदतु बहुमधुरं ॥
किमितिकरोषि हृदयमतिविधुरं ॥ ७॥

सं०टी०हरिरिति। कृष्णः उपयातु त्वदंतिकं आगच्छतु। बहुम-धुरं तवानुनयवचनं वदतु। त्वं हृदयं मनः अतिविधुरं अतिविह्वलं किमिति करोषि। न किंचित्प्रयोजनमित्यर्थः ॥ ७ ॥

भा०टी० सखि श्रीराधाजीसे कहतीभई; की हेप्यारीजी तुम माधवके पास जायकर नम्रवचन से उनको प्रसन्नकरो, तुम अपने मनको किस का-रण दुःखदेतीहो ॥ ७ ॥

श्रीजयदेवभणितमतिललितं ॥ सुखयतु रसिक-जनं हरिचरितं ॥ ८ ॥ इति श्रीगीतगोविंदे अ-ष्टादशः प्रबंधः ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०श्रीजयदेवेति श्रीजयदेवभणितं उक्तं हरिचरितं कर्तृरसिकजनं कृष्णे भाविकं जनं सुखयतु सुखिनं करोतु। कीदृशं अतिललितं अतिसुंदरं श्राव्यमित्यर्थः।सुविनीतमिति पाठे कीदृशं जनं सुविनीतंअतिविनययुक्तम् ॥ ८॥

भा०टी० श्रीमान जयदेवस्वामी विरचित वहि हरिचरित सकलभक्तलोगों को प्रसन्नकरे ॥ ८ ॥

इदानीं प्रणतमपि प्रियमतिरोषात् त्यजंतीं राधां निंदंती सखी प्राह—

स्निग्धे यत्परुषासि यत्प्रणमतिस्तब्धासि यद्रा
गिणि द्वेषस्थासि यदुन्मखे विमुखतां यातासि
तस्मिन् प्रिये॥ तद्युक्तं विपरीतकारिणि तव श्री
खंडचर्चाविषं शीतांशुस्तपनो हिमं हुतवहः
क्रीडामुदो यातनाः॥ १ ॥

सं०टी०स्निग्धइति। हे विपरीतकारिणि विपर्ययविधायिनि राधे त्वं स्निग्धे मधुरवादिनि तस्मिन् प्रिये कृष्णे यत्परुषासि निष्ठुरभाषिणि असि वर्तसे। किं च तस्मिन्प्रिये प्रणमति सति विनययुक्ते सति यत्स्तब्धासि स्थाणुवत् स्थितासि यत् रागिणि सानुरागे प्रिये द्वेषस्थासि असंतुष्टासि यत् उन्मुखे संमुखे तस्मिन् प्रिये विमुखतां परावृत्ततां यातासि। तस्मात् श्रीखण्डचर्चा चंदनकथापि तव विषमिव शीतांशुश्चंद्रस्तपनः सूर्य इव हिमं तुषारः हुतवहःअग्निरिव क्रीडामुदः क्रीडासंतोषाःयातना वेदनास्तद्युक्तमेव योग्यमेव तव मदीयवचनविपरीतकारित्वात् ॥ विरोधालंकारः।शार्दूलविक्रीडितंवृत्तं ॥ १ ॥

भा०टी०सखी पुनरपि श्रीराधाराणी जी से कहैतीभई की हेप्यारीजी! जबकृष्णजी तुम्हे प्राप्तहोनेसे प्रसन्नताको प्राप्तहोतेहैं, तब तुम उसे क्यों क-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ठोरमनकरतेहो! जब कृष्णजी तुम्हारे चरण पर निपतित होतेहै, तब तुम उनसे क्यों प्रत्युत्तर नही करतेहो! कृष्णजी तुमको प्यारकरतेहैं, किं तु तुम-उनके और अप्रसन्न होजातीहै! इच्छा आचार अच्छा नहि होताहै; तुम चंदनके विष और चन्द्रिका को रौद्रके तुल्य विचार करतीहै! और तुमहिम अग्निके समान और क्रीडा रूपी आनन्दको पीडाकेस्वरूप ज्ञानकरतीहै ॥ १॥

इदानीं कविर्भक्तानाशिषयति

अंतर्मोहनमौलिघूर्णनवलन्मंदारविस्रंसनस्त
ब्धाकर्षणदृष्टिहर्षणमहामंत्रः कुरंगीदृशां ॥ दृ
प्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां भ्रंशः
कंसारिपोर्व्यपोहयतु वोऽश्रेयांसि वंशीरवः ॥ २ ॥

सं०टी०अंतरिति। कंसरिपोः कृष्णस्य वंशीरवो वेणुनादो वः युष्माकं भक्तानां अश्रेयांसि अशुभानि व्यपोहयतु खण्डयतु। कीदृशो वंशीरवः कुरंगीदृशां हरिणीनयनानां अंतर्मोहनं मनोमोहः मौलिघूर्णनं साधुसाध्विति शिरःकंपनं वलन्मंदारविस्रंसनं गुंफितपारिजातपुष्पाधःपतनं सात्विकभावात् स्तब्धाकर्षणं स्तब्धस्य अनिच्छोराकर्षणं दृष्टिहर्षणं नेत्रोत्साहः एतेषु सर्वेषु महामंत्रः।वंशीरवाकर्षे सर्वा नायिकाः कामभावापन्ना भविष्यंतीति भावः। पुनः कीदृशः दर्पवद्भिर्दानवैर्दैत्यैर्दूयमानानां दिविषदां देवतानां दुर्वारा अनिवार्या दुःखापदः दुःखसदनीभूता विपत्तयस्तासांभ्रंशःनाशकः।वंशीरवं श्रुत्वा दुःखिता अपि देवाः मुदमुद्वहंतीत्यर्थः।मुग्धो मूढःअलसः२

भा०टी०श्रीमान् जयदेव स्वामी कहते है कि कंस-विनाशक केशव जी के मुरली के शब्द तुम लोगों की आपत्ति का नाश करे मंगल को उत्पन्न कर-रहे है वह मुरली की ध्वनी मृगनयनी कामनीयों को और भक्त लोगों के-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चित्तमें प्रसन्नता के उत्पादन करने के कारण महामंत्र स्वरूप है, और वह ही मुरली ध्वनी असुरों को मरदन कर देव गणोके दुःख को नाश करतीहै ॥ २ ॥

इति श्रीकविराजश्रीजयदेवकृते गीतगो-
विंदे महाकाव्ये मुग्धमुकुंदवदनो नाम
सटीको नवमः सर्गः ॥ ९ ॥

अथ दशमः सर्गः प्रारभ्यते

इदानीं सोत्कंठः कृष्णो राधां दृष्ट्वा अनुनयन्नाह—

अत्रांतरे मसृणरोषवशामसीमनिःश्वासनिःस
हमुखीं सुमुखीमुपेत्य ॥ सव्रीडमीक्षितसखीवद
नां दिनांते सानंदगद्गदपदं हरिरित्युवाच ॥ १ ॥

सं.टी. अत्रेतिअत्रांतरे अस्मिन्नवसरे हरिः दिनांते संध्यासमये तां सुमुखीं राधां उपेत्य समीपमागत्य सानंदानि अतएव गद्गदानि कंठादल्पं निर्गच्छंति पदानि यस्यां क्रियायां तद्यथा भवति तथा वक्ष्यमाणं उवाच ॥ कीदृशीं राधां मसृणस्य कर्कशस्य क्रोधस्य वशां आधीनां ॥ पुनः किंभूतां असीमस्य महतो निःश्वासस्य निः सहं सोढुं असमर्थं मुखं यस्याः सा तां कोपवदनामित्यर्थः। पुन किंभूतां सव्रीडं सलज्जं ईक्षितं दृष्टं सख्याः वदनं मुखं यया सा तां पश्य कृष्णचेष्टितमित्यर्थः

भा०टी० अतःपर सन्ध्याके समय श्रीराधाराणीजीका क्रोध किंचित् शांतहुआ, किंतु मन वेदनाके लिये उनको मुखपंकज मलिन होरहीथी उसी समय राधाजीका निकढ आपौछा राधाजी लज्जितहोकर हरिजी अपनी सखीके और कटाक्षपात किया तब श्रीहरिजी श्रीराधाराणीको देखकर बहुत आनंद होकर गद्गद वाणीसें कहतेभये ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उक्तमर्थं गीतेनाह—

अथ एकोनविंशः प्रबंधो देशवराडीरागेण अष्टतालीताले गीयते

वदसि यदि किंचिदपि दंतरुचिकौमुदी हरति दरतिमिरमतिघोरं ॥ स्फुरदधरसीधवे तव वदनचंद्रमा रोचयति लोचनचकोरं ॥ १ ॥ प्रिये चारुशीले प्रिये चारुशीले ॥ मुंच मयि मानमनिदानं ॥ सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानम् ॥ ध्रु० ॥

सं०टी०वदसीति॥गीतस्यास्य देशवराडीरागः अष्टतालीतालः॥ रागलक्षणं "आरब्धगमनमुद्रानिद्राघूर्णायमाननयनाढ्या ॥ सुखशायिनि निजदयिते देशवराडी भवेद्गौरि" इति ॥ लघुद्रुतौ लघुश्चेत्यष्टताली प्रकीर्तिता इति ॥ गीतार्थस्तु ॥ हे चारुशीले मनोहरवृत्ते प्रिये राधे त्वं मयि अनिदानं अकारणं मानं मुंच त्यज। किमिति मानत्यागस्तत्राह मदनानलः कामाग्निर्मम मानसं दहति अतः कारणात्सपदि तत्क्षणमेव मुखकमलमधुपानं मुखमेव पद्मं तत्संबंधि मधुपानं देहि मधुना वन्हिदाहः प्रशाम्यति ॥ ध्रुवपदं ॥ हे राधे त्वं यदि यदा किंचिदपि वदसि तदा तव दंतानां या रुचिर्दीप्तिः सैव कौमुदी चंद्रज्योत्स्ना अतिघोरं अतिशयेन भयंकरं दरः भयं स एव तिमिरमंधकारं हरति नाशयति। अनुच तव वदनं चंद्रमा इव सः स्फुरदधरसीधवे दीप्यमानाधरामृतार्थं तादर्थ्ये चतुर्थी। मम लोचनचकोरं नेत्रपक्षिविशेषं रोचयति रुचिं इच्छां कारयति चकोरः पक्षिविशेषः चंद्रामृतलोलुपो भवत्येव ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी० अबश्री भगवानजी कहतेहैं, कि हे प्यारी ! तुम्हारे कहनेके समय तुम्हारे दन्तो की जोति से मेरे हृदय का अंधकार दूर होताहै; और तुम्हारा मुख चन्द्रमा अमृत पान कराने कारण मेरे नेत्र चकोरोंको प्रलोभित कररहाहै। हे चारुशीला! तुम मेरी ओर कृपाकरके अपने अभिमानको त्याग करो! तुझे देखकर मेरा हृदय कामरूपी अग्निसे दग्धहोताहै। हेप्यारी ! तुम अपने मुख कमल मधुको पान करनेके लियेदो; और इसके पान करने से मेरा हृदय क्लेश दूरहोगा ॥ १ ॥

मृषा रोषं प्रकाशयंतोमाह—

सत्यमेवासि यदि सुदति मयि कोपिनी देहि ख-
रनखरशरघातं ॥ घटय भुजबंधनं जनय रद-
खंडनं येन वा भवति सुखजातम् ॥ २ ॥

सं०टी०सत्यमिति।हे सुदति शोभनदन्ते यदि मयि विषये सत्यमेव कोपिनी क्रोधवती असि तव खरास्तीक्ष्णा ये नखराः नखास्ते एव शरा नाराचास्तैर्घातं प्रहारं देहि। तेनापि चेन्न तुष्यसि तर्हि भुजाभ्यां बंधनं घटय कुरु। रदैः दंतैः खण्डनं घातं जनय विरचय। वा अथ वा येन मुष्ट्यादिना सुखजातं सुखसमूहो भवति तदेव कुरु। प्रभूणां हि सापराधेषु जनेषु ताडनबंधनखंडनादयो दंडाः समुचिताः।

भा०टी० श्रीकृष्णजी पुनरवार कथन करनेलगे, की हेप्यारी ! जो तुम मेरी और एकान्त कोपकरतीहै,तब तुम ऐसा करोकी अपने तीक्ष्ण दृष्टि स्वरूप बाणसे मेरेको प्रहारकरो; और अपने हस्त स्वरूप वेलसें मेरेको बन्धनकरो, और अपने दांतोसे मेरेको दंशनकरो जैसे तु प्रसन्न हो वैसा करो२

ननु याऽतिप्रिया सा दंडं विदधातु किं च मयाऽत आह—

त्वमसि मम भूषणं त्वमसि मम जीवनं
त्वमसि मम भवजलधिरत्नम् ॥ भवतु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवतीह मयि सततमनुरोधिनी तत्र म-
म हृदयमतियत्नम् ॥ ३ ॥

सं॰टी॰त्वमसीति । हेराधे त्वं मम जीवनं प्राणोसि त्वां विना स्थातुमशक्यत्वात् त्वं मम भूषणं अलंकारोसि त्वं मम भवजलधौ संसारसागरे रत्नमसि । "जातौजातौ यदुत्कृष्टं तद्रत्नमभिधीयते" इति स्त्रीरत्नमुक्तं । इह एतादृशे मयि भवती सततं निरंतरं अनुरोधिनी अनुकूला भवतु तवानुकूल्ये मम हृदयं मनः अतियत्नं अतिशययत्नयुक्तं भवति तवानुकूल्यार्थं अतिशयं यत्नं करोतीत्यर्थः ॥ ३ ॥

भा॰टी॰ श्रीराधारार्णीसें कृष्णजी कहतेहै, कि हे प्यारी ! तुम मेरा भूषण स्वरूपहै; तुममेरा प्राणरूप है; और तुमही मेरा भवरत्नाकरस्य रत्नस्वरूप है; तुम मेरी ओर कृपादृष्टिकरो ! मेरे प्राण तुम्हारे हेतु बहुप्रकार आसक्तहोते है, और तुम्हारा प्रेम प्राप्त होनेके लिये निरन्तर चिंतायुक्त होरहे है ॥ ३ ॥

नीलनलिनाभमपि तन्वि तव लोचनं धारयति
कोकनदरूपम् ॥ कुसुमशरबाणभावेन यदि रं-
जयसि कृष्णमिदमेतदनुरूपम् ॥४॥

सं॰टी॰नीलेति । हेतन्वि कृशांगि नीलननिलस्य नीलोत्पलस्येवाभा कांतिर्यस्य तत्तव लोचनं कोकनदरूपं रक्तोत्पलसरूपतां धारयति धत्ते रोषारुणत्वात् । यदि इदं चक्षुः कृष्णं श्यामं कुसुमशरः कामस्तस्य बाणाः पुष्पाणि तेभ्यो भाव उत्पत्तिर्यस्य मधुनस्तेन रंजयसि रक्तं करोषि तदा एतद्रक्तं रूपं अनुरूपं योग्यं भवति।यदि मधुपानं करोषि तदा नेत्रस्य रक्तत्वमुचितं न रोषादिति भावः ४

भा.टी.श्रीकृष्णचन्द्रजी राधारार्णीसे कहते भये, कि हे उत्तमांगी! तुह्मारा दोनो नेत्र नीलपद्मके तुल्यहै, किन्तु अभि रक्त कामके स्वरूप होरहेहै तुम मेरे को कामरूपी बाणसे उसी प्रकार रक्तवर्ण करके अपनी सामर्थ को प्रकाश करो४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंचित्प्रसन्नां वीक्ष्याह—

स्फुरतु कुचकुंभयोरुपरि मणिमंजरी रंजयतु तव हृदयदेशं ॥ रसतु रशनापि तव घनजघन-मंडले घोषयतु मन्मथनिदेशम् ॥५॥

स्फुरत्विति। हे राधे मणिमंजरी हारलता तव कुचकुंभयोः कुचकलशयोरुपरि स्फुरतु शोभतां। सा रत्नलता तव हृदयदेशं वक्षःप्रदेशं रंजयतु स्वरश्मिभिः शोभयतु तव घनजघनमण्डले निबिडकटिपुरोभागदेशे रशनापि कांच्यपि रसतु शब्दं करोतु सा कांची मन्मथनिदेशं कामाज्ञां घोषयतु शब्दायतां। वचनचातुर्येण स्फुरतु मणिमंजरी रसतु रसनापि इत्यादिना विपरीतरतं याचते ॥ ५ ॥

भा०टी०श्रीकृष्णजी कहतेहै, की हेप्यारीजी तुम्हारा कण्ठ देशके मणीमयहार स्तनोके ऊपर चंचल होके तुह्मारे हृदयको शोभायमानकरे; और तुह्मारे कटितटस्थ तडागीने तुम्हारे जघन देशमें ध्वनित होकर अनंगदेवको निदेशका प्रकार करे ॥ ५ ॥

स्थलकमलगंजनं मम हृदयरंजनं जनितरति-रंगपरभागम्॥ भण मसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकसुरागम् ॥ ६ ॥

सं०टी०हे मसृणवाणि स्निग्धवचने भणाऽऽज्ञापय अहं तव चरणद्वयं सरसः सांद्रः सह रसेन शृंगारेण वर्तते इति वा सरसं यथा स्यादेवं लसत् शोभमानः अलक्तकरागो यावकरागो यत्र एतादृशं करवाणि कुर्यां। प्रार्थनायां लोट्। कथंभूतं चरणद्वयं स्थलकमलस्य गंजनं तिरस्कारकं सदृशमित्यर्थः। पुनः कीदृशं मम हृदयरंजनं अनुरागकारकं। पुनः कीदृशं जनित उत्पादितो रतिरंगे सुरतकौशले संभोगरागस्य वापरभगः परस्परशोभा येन।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मयालक्तकेन चेदिदं रज्यते तदेवमपि क्रौंचबंधादौ मम हृदये लग्ने लग्नां मत्परां शोभां परस्परं दास्यतीतिभावः ॥ ६ ॥

भा०टी०श्रीकृष्णजी कहतेहै, की हेप्यारी! तुम्हारी आज्ञासे में तुम्हारे अलक्तकराग रंजित दोनो चरणो के रंगसे मेरे हृदयको भूषित करने चाहतेहै, और मुझे इसीतह्रासे भूषित हृदय स्थल कमलको पराजय करेंगे ॥६॥

स्मरगरलखंडनं मम शिरसि मंडनं देहिपदपल्लवमुदारं ॥ ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपहितविकारम् ॥ ७ ॥

सं०टी०स्मरेति। त्वं उदारं मनोहरं पदपल्लवं मम शिरसि मंडनं अलंकारमिव देहि अर्पय। कीदृशं पदपल्लवं स्मरगरलस्य कामविषस्य खण्डनं नाशकं कामपीडानिवर्तकमित्यर्थः। मयि दारुणः क्रूरकर्मा मदनकदनानलः कामपरितापवह्निः ज्वलति दीप्यते। पदपल्लवं कर्तृ तदुपहितविकारं मदनकृतोपतापं हरतु। शिरःपीडानिवर्त्तनेन शरीरपीडानिवृतिरिति शिरसि दानं अथवा पल्लवाच्छादितशिरसः सूर्यतापो न भवतीति ॥ ७ ॥

भा०टी०कृष्णजी कहतेहै, कि हे प्यारी! मेरे मस्तक पर तुमाराचरण कमलको स्थापनकरो, इससें कामबाणनिःसृत विष नाशहोवेगा; और इसीसे मेरा शिर मुकुट शोभित होवेगा। हेप्यारी जी! मेरा शरीर प्रचण्ड सूर्य्यके तेज समान कामरूपी अग्निसें दग्धहोकर अभीभि बहुत विकारको प्राप्त होरहाहै ॥ ७ ॥

इति चटुलचाटुपटुचारु मुरवैरिणो राधिकामधि वचनजातं ॥ जयति जयदेवकविभारतीभूषितं मानिनीजनजनितशातम् ॥ ८ ॥ इति श्रीगीतगोविंदे एकोनविंशतितमः प्रबंधः ॥ १९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०इतीति।इत्यमुना प्रकारेण मुरवैरिणः कृष्णस्य राधिकां अधि अनुराधिकां लक्षीकृत्य प्रोक्तं वचनजातं वाक्यसमूहो जयति उत्कर्षेण वर्द्धते। कीदृशं चटुलं चाटुप्रीतियुक्तं पटुचतुरं चारु सुकुमारं। पुनः कीदृशं जयदेवकवेः भारत्या वाण्या भूषितं मानिनीजनस्य जनितं शातं सुखं येन तत्तादृशं जयति। 'पद्मावतीरमणजयदेवकविभारतीभणितमतिशात'मिति पाठांतरे पद्मावती जयदेवस्य पत्नी तस्या रमणो वल्लभो यो जयदेवस्तेन भारतीसंज्ञया कवित्वं वर्णितं।पुनः कीदृशं अतिशातं अतिशयितसुखं यस्मात्तादृशमिति व्याख्यानं मंदं तथा सति पौनरुक्त्यापत्तेः प्रथमपाठस्तु समीचीन एव ८

भा०टी०श्रीमाधवजीने ऐसे प्रकारसे तृप्तिजनक मधुर वचनोंसे श्रीराधाराणीके अभिमानको दूरकिया; और ऐसे सब सुन्दर वचनों को पद्मावती रमण श्रीमान जयदेवस्वामी भक्तजनोंके पढनेके लिये वर्णन करताहै८

इदानीमात्मानं निरपराधं ज्ञापयन् संभोयार्थं प्रोत्साहयन्नाह--

परिहर कृतातंके शंकां त्वया सततं घनस्तनजघनया क्रांते स्वांते परानवकाशिनि॥ विशति वितनोरन्यो धन्यो न कोपि ममांतरं स्तनभरपरीरंभारंभे विधेहि विधेयताम्॥ १॥

सं०टी०परिहरेति। हे कृतातंके विहितकोपे राधे त्वं शंकां त्यज त्वया क्रांते व्याप्ते सति वितनोः कामादन्यो धन्यः जनः कोपि ममांतरं अभ्यंतरं न विशति न प्रविशति। कीदृश्या त्वया घने कठिने स्तनजघने यस्याः तया। कीदृशे स्वांते अतएव परानवकाशिनि अन्यस्यावकाशशून्ये। हे प्रणयिनि यतो ममांतरं काम एव विशति अतस्तनभरपरीरंभारंभे स्तनातिशयालिंगनोद्योगे विधीयतां कर्तव्यतां विधेहि कुरु मामालिंगेत्याशयः॥ १॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी०श्रीकृष्णजी कहतेहै, कि हे मेरी प्यारी! में और किसी रमणी पर आसक्त हुआ हूं इस कारणसे तुम्हारे मनमें जो भय हुवाहै, उसभयको दूरकरो। में तुम्हारे उत्तुंग स्तन और उन्नत जघनोंमें एकान्त अनुरक्तहूं, इसलिये में और कामिनीयों को ध्यानमें नहि लाताहूं। हेप्यारी! मेरे अंतर में केवल शरीरहीन कामदेव प्रवेश करने शक्ताहै, किंतु और कोय शक्ता नै; इस हेतु काम भोगमें प्रवेश होनेको तुम्हारा जैसा मानसहै वैसाहि करो ॥ १ ॥

यद्येवं न प्रत्येषि तदा मय्यपराधानुकूलं दंडमाचरेत्याह–

मुग्धे विधेहि मयि निर्दयदंतदंशं दोर्वल्लिबंध-
निबिडस्तनपीडनानि ॥ चंडि त्वमेव मुदमंच-
य पंचबाणचंडालकांडदलनादसवः प्रयांति ॥२॥

सं०टी०मुग्धेति। हे मुग्धे मूढे सुंदरि वा मयि निर्दयदंतदंशं दयारहितदंतक्षतं विधेहि कुरु ॥ किंच दोर्वल्लिबंधो भुजलताबंधस्तेन निबिडं दृढं यथा स्यात्तथा स्तनाभ्यां पीडनानि विधेहि ॥ हे चंडि कोपनशीले त्वमेव मम मुदं प्रीतिं अंचय जनय ॥ नत्वन्यस्यां ममानुराग इत्यर्थः ॥ उद्वहेति पाठे कुरु ॥ नोचेत् पंचबाणः कामः स एव चंडालस्तस्य कांडदलनाद्बाणक्षतात् असवः मम प्राणाः प्रयांति गच्छंति ॥ अतो मयि प्रसीदेत्यर्थः ॥ २ ॥

भा०टी०श्रीकृष्णजी कहते हैं, अय मूढा तुम अपने उग्र दंतो से मेरे को दंशनकरो; तुम अपने हस्त स्वरूप वेलसे मेरेको बन्धन करो; और तुम अपने उन्नत स्तनोंसे मेरेको प्रहार करो; हेचण्डी मेरे और तुम संतुष्ट हो एवं अनंगरंगसे चाण्डाल स्वरूपी प्रखर पंच बाणों से मेरे प्राण को नष्ट करो ॥२॥

ननु कोपो नास्त्येवेत्यत आह

शशिमुखि तव भाति भंगुरभ्रूर्युवजनमोहकरा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लकालसर्पी ॥ तदुदितभयभंजनाय यूनां त्व-
दधरसीधुसुधैव सिद्धमंत्रः ॥ ३ ॥

सं॰टी॰शशीति ॥ हे शशिमुखि चंद्रवदने तव भंगुरभ्रूः कुटिलाभ्रुकुटिर्भाति शोभते ॥ कीदृशी युवजनानां तरुणजनानां मोहाय कराला भीषणा कालसर्पी कृष्णाहिवधूः तस्याः भ्रुवः सकाशादुदितं उत्पन्नं यद्भयं तस्य भंजनाय नाशाय यूनां तरुणानां तवाधरसीधु मद्यं तदेव सुधापानसाम्यान्माधुर्याच्च सैव सिद्धमंत्रः साधितमंत्रः ॥ विषापहरणार्थं अधरपानंदत्वा तव कोपसर्पदष्टस्य मम जीवनं संपायदयेतिभावः ॥ ३ ॥

भा॰टी॰श्रीकृष्णजी कथन करते है, कि चन्द्रमुखी, तेरा युवजन मोहन अपांग दर्शन मुझे कृष्ण सर्प स्वरूप प्रतीत होरहा है; और इसी संकटसे प्राणों की रक्षा के लिये तेरा अधरामृत पानही महामंत्र है ॥ ३ ॥

व्यथयति वृथा मौनं तन्वि प्रपंचय पंचमं तरु-
णि मधुरालापैस्तापं विनोदय दृष्टिभिः ॥ सुमु-
खि विमुखीभावं तावद्विमुंच न वंचय स्वयम-
तिशयस्निग्धो मुग्धे प्रियोहमुपस्थितः॥४॥

सं॰टी॰व्यथयतीति॥ हेतन्वि सुंदरि तव वृथा मौनं मां व्यथयति तस्मात् ॥ तरुणि मधुरालापैः कोमलवचनैः पंचमरागं प्रपंचय उद्गिर ॥ दृष्टिभिः अवलोकनैस्तापं मानसं तापं विनोदय अपसारय ॥ हे सुमुखि सुवदने विमुखीभावं दुष्टदृष्टित्वं विमुंच त्यज॥ हेमुग्धे ज्ञानशून्ये अहं प्रियः स्वयं आकरणं विनैव उपस्थितः आगतः अतएव मे वचनं न वंचय नोल्लंघस्व ॥ कीदृशः प्रियः अतिशयस्निग्धः महावत्सलः स्वयमागतः हातुं नोचित इति भावः ॥ ४ ॥

भा.टी.कृष्णजी कथन करते है, कि हे कृशांगी तुम क्यों इसी तरह भाषणसे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitlzagtion by eGangotri

मेरे प्राणों को दुःखित करती है, तुम पंचम तालमें मेरे साथ मेल करो, और मेरे प्रति कृपादृष्टि करो, जिससे मेरे दुःखका नाश होवे हेसुमुखी ! मेरी और अप्रसन्न नरहो येमूढ तुमरे प्रेमरससे में शीतल हुवाहै अभि में तुमारे पास आयाहु तुम मुझे त्याग ना करो ॥ ४ ॥

अधुना मानापनोदनाय तदंगस्तुतिं करोति

बंधूकद्युतिबांधवोयमधरः स्निग्धो मधूकच्छवि
गंडश्चंडि चकास्ति नीलनलिनश्रीमोचनं लोच
नं ॥ नासाभ्येति तिलप्रसूनपदवीं कुंदाभदंति
प्रिये प्रायस्त्वन्मुखसेवया विजयते विश्वं स
पुष्पायुधः ॥ ५ ॥

सं०टी०बंधूकेति ॥ हेचंडि कोपनशीले तवायमधरः बंधूकपुष्पस्य द्युतिःकांतिस्तस्या बांधवो मित्रसदृशश्चकास्ति शोभते तथा स्निग्धश्चिक्कणः गंडःकपोलश्चकास्ति ॥ कीदृशः मधूकपुष्पवच्छविर्दीप्तिर्यस्य सः तथा ॥ तव लोचनं नेत्रं नीलनलिनश्रियं नीलोत्पलस्य कांतिं मोचयति । तव नासा नासिका तिलप्रसूनस्य तिलपुष्पस्य पदवीं मार्गसादृश्यमित्यर्थः अभ्येति प्राप्नोति ॥ हे कुंदाभदंति कुंदपुष्पस्येवाभा येषां तादृशा दंता यस्यास्तादृशि हेप्रिये वल्लभे प्राय इति तर्कयति प्रसिद्धः पुष्पायुधः पुष्पमेवायुधं शस्त्रं यस्य सः कामस्त्वन्मुखसेवया विश्वं जगद्विजयते वशीकरोतीत्यर्थः ॥ यानि कामस्य पुष्पायुधानि तानि बन्धूकमधूकनीलोत्पलतिलकुंदपुष्पादीनि त्वन्मुखे वर्तंत इति ॥ सेवाकारः बंधूक इति दुपहरिया मधुक इति महुआं इति कान्यकुब्जभाषायां ॥ ५ ॥

भा०टी०श्रीकृष्णजी कहते है कि, हे कोपवती तुम्हारा अधर बन्धूक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुष्प के तुल्य शोभाय मान होरहा है; तुमारा कपोल स्थल अशोक पुष्प के सदृश सुंदरता को धारण कर रहेहै तुमारे नेत्र नीलकमलके तुल्य शोभायमानहै; तुमारी नासिका तिलोंके पुष्पके समान है; और तुमारे दांत कुंदपुष्पके समान शोभायमानहै हे प्यारी पुष्परूपी काम देव केवल तुमारे सुंदर मुखकी सेवासे विश्व संसारको पराजित करताहै ॥ ५ ॥

दृशौ तव मदालसे वदनमिंदुमत्यान्वितं गतिर्जनमनोरमा विधुतरंभमूरुद्वयं ॥ रतिस्तवकलावतीरुचिरचित्रलेखे भ्रुवावहो विबुधयौवतं वहसि तन्वि पृथ्वीगता ॥६॥

सं॰टी॰दृशाविति ॥ अहो इत्याश्चर्ये हे तन्वि सुंदरि त्वं पृथ्वीगता भूम्यां स्थितापि विबुधयौवतं देवयुवतीनां समूहं वहसि ॥ केन प्रकारेणेत्यत आह तव दृशौ नयने मदेनालसे मंथरे अवलोकनाय मंदायतः ॥ तव वदनं मुखं इंदुमत्या चंद्रबुद्ध्या अन्वितं युक्तं त्वन्मुखदर्शनेन सादृश्याचंद्रबुद्धिर्भवतीत्यर्थः ॥ तव गतिर्गमनं जनमनोरमा ॥ तवोरुद्वयं जंघायुग्मं विधुता स्वशोभया तिरस्कृता रंभा कदली येन ॥ तव रतिः सुरतक्रीडा कलावती कामकलाकौशलयुक्ता ॥ तव भ्रुवौ रुचिरा चित्राणां लेखाययोस्ते यथा चित्रे श्यामालेखाविलिख्यते तथेति ॥ तदनया पदयोजनया मदालसा इंदुमतीमनोरमारंभाकलवतीचित्रलेखासंज्ञका अप्सरसः प्रतिपादिताः पृथ्वीगतेत्यपि च एकस्यामपि त्वयि सर्वासामप्सरसां गुणा वर्तंत इत्याश्चर्यं ॥ प्रेयोनामालंकारः पृथ्वीनामकं चेदं छंदः ॥ ६ ॥

भा॰टी॰श्रीकृष्णजी कहते है, कि हेप्यारी तुम्हारा अनंग रंग चन्द्रानन, राम कदली तुल्य विशालजघन, कलावती की अंगचंचलता एवं चित्र-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लेखाका भू तुमने प्राप्त होकर अवनीमें स्थिति करके स्वर्गविलासिनी देवनारीके तुल्य सौंदर्यवती होती है ॥ ६ ॥

कविःसर्गांते आशिषं प्रयुंक्ते

प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्धंरणे
राधापीनपयोधरस्मरणकृत् कुंभेन संभेदवान्॥
पत्रेबिभ्यति मीलति क्षणमपि क्षिप्रं तदालोक-
नाद्व्यामोहेन जितं जितं जितमभूद्व्यालोलको
लाहलः ॥ ७ ॥

सं०टी०प्रीतिमिति ॥ हरिः कृष्णो वः युष्माकं गायतां शृण्वतां प्रीतिमानंदं तनुतां विस्तारयतु॥कीदृशः रणेसंग्रामे कुवलयापीडेन कंसहस्तिना सार्द्धं सह कुंभस्थले . हस्तेन संभेदवान् संबद्धः अतस्तत्र कुम्भे राधापीनपयोधरस्मरणकृत् राधिकायां मांसलस्तनस्मृतियुक्तः ॥ हस्तिदर्शनेन पीनकुचस्मरणं युज्यत एव॥ तदुक्तं "सदृशा दृष्टिचित्ताद्याः स्मृतिजीवस्य बोधकाः ॥" पत्रे वाहने बिभ्यति भयंगते सति अथ च मीलति मृते सति जितंजितंजितमिति कंससंबंधी व्यालोलश्चंचलः कोलाहलः अभूत् जातः॥ कंसो बालेन जित इति सर्वैर्जनैः कलकलशब्दः कृत इत्यर्थः॥ वचन कौशलेन मानिनीमानदानात् चतुरः चतुर्भुजः कृष्णो यत्र॥७॥

भा०टी०श्रीमान् जयदेवस्वामीजी कहतेहै, की कृष्णचन्द्रजी कुवलयापीड हस्तीके साथ संग्राम में निविष्ट होकर जब स्तन स्वरूप उसका कुंभ पर हस्त प्रदान कराथा, तब श्रीकृष्णजीने राधाजीका उन्नत स्तनस्पर्श सुखको अनुभव करके मोहमें मग्न होगएहै। और वहि मोहन दर्शन करके कंसराज और उसके सर्व अनुचर भ्रमसे बहुत प्रकार आनन्द किय-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

था । वही भगवान् तुमलोंगो को सर्व विघ्नादिक नाशकरके तुम भक्त लोंगो को आनंदमें रखे ॥ ७ ॥

इति श्रीकविराजश्रीजयदेवकृते गीतगोविंदे महाकाव्ये मानिनीवर्णने चतुरचतुर्भुजोनाम सटीको दशमः सर्गः ॥ १० ॥

अथ एकादशः सर्गः प्रारभ्यते ॥

अधुना राधां प्रति तत्सखी ब्रूते—

रुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवति कृतवेषे केशवे कुंजशय्यां ॥ रचितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां कापि राधां जगाद ॥ १ ॥

सं॰टी॰ रुचिरमिति ॥ कापि सखी प्रदोषे रजनीमुखे स्फुरति दीप्यमाने सति प्राप्ते इत्यर्थः ॥ राधां जगाद वक्ष्यमाणमितिशेषः ॥ कस्मिन् सति केशवे कृष्णे अनुनयेन प्रीतिवचनेन सुचिरं बहुकालं मृगाक्षीं राधां प्रीणयित्वा संतोषयित्वा कुंजशय्यां लतागृहशयनं गतवति सति ॥ कीदृशे केशवे कृतवेषे कृतशृंगारालंकारे राधाया इति ॥ कीदृशीं राधां रचिता कृता रुचिरा मनोहरा भूषालंकारो यया कृष्णस्येति ॥ अन्योन्यालंकारकरणेनान्योन्यरागः सूचितः ॥ कीदृशे प्रदोषे अंधकाराधिक्येन दृष्टिं मुष्णातीति दर्शनचोरके ॥ पुनः कीदृशीं राधां निरवसादां निर्गतः मानसभंगरूपोऽवसादः उपतापो यस्यास्तां ॥ १ ॥

भा॰टी॰ वनमाली मनोहर विनीत वचनो से मृगनयनी श्रीराधाराणीके

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चित्तको प्रसन्न करके सुंदर भेषमे शोभायमान होकर कुंज शय्यापर आसीनहोगयाहै; इससें हास्य मुखी सुवेसी श्रीराधाराणीको कोइक उनकी सहचरी कथन करने लगी ॥ १ ॥

उक्तार्थं गीतेनाह--

अथ विंशः प्रबंधो वसंतरागेण रूपकताले गीयते

विरचितचाटुवचनरचनं चरणरचितप्रणिपातं॥ संप्रति मंजुलवंजुलसीमनि केलिशयनमनुयातम् ॥ १ ॥ मुग्धे मधुमथनमनुगतमनुसर राधिके ॥ ध्रु० ॥

सं०टी०विरचितेति॥वसंतरागः॥हे राधिके मुग्धे मूढे अनुगतं अनुकूलं मधुमथनं कृष्णं अनुसर अनुगच्छ॥ विरचिता उक्ता चाटुः प्रिया वचनरचनापरंपरायेन तं ॥ पुनः कीदृशं चरणे पादे रचितः कृतः प्रणिपातः प्रणामो येन तं तन्मानभंगाय॥ पुनः कीदृशं संप्रति इदानीं मंजुलो मनोहरोऽशोको वेतसो वा तस्य सीमनि पर्यंते तटे केलिशयनं सुरतार्थंशय्यां अनुयातं प्राप्तमित्यर्थः ॥ अतस्त्वयाशीघ्रं गंतव्यमिति ॥ १ ॥

भा०टी० हेश्रीराधा प्यारी ! जो माधवजीने तुमारे मनोवेदनाको दूर करनेके कारण बहुत नम्रवचन कहेहै, और जो माधवजी तुम्हारे चित्त प्रसन्नकरनेंके लिये तुम्हारे चरणमें प्रणामभि कियाहै, वहि माधव तुमारे प्रवेशकर रहे है हे मुग्धा तुम अभी उनके पास जाकर अपने हृदय को आनंद रूपी तृप्ति से पूर्ण करो ॥ १ ॥

तां प्रोत्साहयंती त्वरयति—

घनजघनस्तनभारभरे दरमंथरचरणविहारं ॥ मुख

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रितमणिमंजीरमुपैहि विधेहिमरालविकारम्॥ २ ॥

सं०टी०घनेति ॥ घनयोर्मांसलयोर्जघनस्तनयोर्भारस्य भरो भाराधिक्यं यस्यास्तत्संबोधनं दरमंथर ईषन्मंदश्चरणविहारः पादक्रमो यस्यां क्रियायां मुखरितः शब्दितः मणिमंजीरो मणिसहितमंजीरो यस्यां क्रियायां तं कृष्णमुपैहि उपगच्छ ॥ अतएव मरालानां राजहंसानां विकारं विलासं विधेहि कुरु॥ २ ॥

भा०टी० हे प्यारीजी तुम अभि अपने गुरु नितंब और कुचोंकी भारभरसें मन्थर गतीकी आश्रय करके कुञ्जपर गमन करो; तुमारे मणिरचित हारके झुनझुन शब्दों से राजहंस माला पराजित होवेंगे ॥ २ ॥

अन्यमप्युद्दीपनविभावं वर्णयति—

शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावं ॥ कुसुमशरासनशासनबंदिनिपिकनिकरे भज भावं ॥ ३ ॥

सं०टी०शृण्विति ॥ त्वं रमणीयतरं अतिमनोहरं श्राव्यं तरुणीजनानां मोहनं मधुरिपोः कृष्णस्य रावं वंशशब्दं ॥ शृण्वाकर्णय ॥ मधुपविरावमिति पाठे भ्रमरशब्दं ॥ किंच पिकनिकरे कोकिलसमूहे कुसुमान्येव शरासनं धनुर्यस्य तादृशः कामस्तदाज्ञा तया बंदिनि स्तावके सति भावं कृष्णेऽनुरागं भज आश्रय ॥ हे मानिन्यः मानं त्यक्त्वा यूयं भजनं कुरुतेति कोकिलाः घोषयंतीत्यर्थः ॥३ ॥

भा०टी०हेफुल्लधनुसेविता वनप्रियोंको सुमिष्टध्वनियोंको और युवती स्त्रीयोंके चित्त प्रसन्न कर वंशी की ध्वनयोंको श्रवण करके तुम अभिसुखीहै ३

अनिलतरलकिसलयनिकरेण करेण लतानिकुरंबं ॥ प्रेरणमिव करभोरु करोति गतिं प्रतिमुंच विलंबम् ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०अनिलेति हे करभोरु करभः कनिष्ठांतो मणिबंधपर्यं-तकरस्यबहिर्भागस्तद्वद्रूयस्यास्तत्संबोधनं गतिं गमनंप्रति विलंबं मुंच शीघ्रं गच्छेति यावत् ॥ यतः लतानिकुरंबं लतासमूहं अनिले-न तरलश्चंचलो यः किसलयनिकरः पल्लवसमूहस्तद्रूपेण करेण हस्ते-न तव प्रेरणमिव ज्ञापनमिव करोति ॥ अचेतना लतापि त्वां प्रे-रयति किं पुनरहम् ॥ ४ ॥

भा०टी० हेस्थूलनितम्बिनी अभी व्रतति एवं नव पल्लव निकर पवन से आन्दोलित होकर तुझे कुञ्जपरजाने को संकेत करतीहै; तुम और का-ल व्याज ना करो ॥ ४ ॥

अपि च––

स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरं-भं ॥ पृच्छ मनोहरहारविमलजलधारममुंकुच कुंभं ॥ ५ ॥

सं०टी०स्फुरितमिति ॥ हेराधे त्वं अमुं कुचकुंभं स्तनद्वयं ॥ पृच्छ सम्यगतिवर्तुलत्वात्काठिन्यवत्वाच्च कुंभसाम्यं ॥ कीदृशं कु-चकुंभं अनंगस्य कामस्य ये तरंगा विकारास्तद्वशादिव स्फुरितं सकंपं अतएव सूचितः हरेः परिरंभः आलिंगनं येन ॥ अन्योपि कलशो नद्यां तरंगैः प्रेर्य्यमाणः सकंपो भवति । इवशब्दोत्रोत्प्रेक्षा-द्योतकः । पुनः कीदृशं मनोहरो यो हारः सएव विमला निर्मला ज-लधारा यत्र ॥ ५ ॥

भा०टी०हे प्यारी यदि मेरी वार्ता पर तुझे प्रतीति नहि होतिहै, तव तुम देखो अभि तुमारे पयो धर युगल अनंगशरसे कंपित होतेहै; और वह पयोधर युगल नारायण सहित क्रीडाकरणे लिये अभी निर्मल निराधार सदृश हार सें शोभायमान हुये है ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधिगतमखिलसखीभिरिदं तव वपुरपि रति रणसज्जं ॥ चंडिरसितरशनारव डिंडिममभिस र सरसमलज्जम् ॥ ६ ॥

सं०टी०अधिगतमिति। हे चंडि अत्यंतकोपने इत्याक्षेपे संबोधनं। अखिलसखीभिरपि तवेदं वपुः शरीरं रतिरणे सुरतसंग्रामे सज्जं सन्नद्धं अधिगतं ज्ञातं। तव मनसि अभिमानो नास्तीत्यर्थः। एवं सति रसिता शब्दिता रशना क्षुद्रघंटिका सैव आरवडिंडिमो वाद्यविशेषो यस्यां क्रियायां सरसं सोत्कठं यथा स्यात्तथा अलज्जं लज्जारहितं यथा स्यात्तथाऽभिसर कृष्णमित्यध्याहारः ॥ ६ ॥

भा०टी०हे प्यारीजी। तुमारे सब शरीरने अभि रतिसंग्राम करनेके लिये शोभायमान हुवाहै, और तुमारे नितंब देशमें जो मेखला विराजमानहै उसे डिण्डिम तुल्य शब्द से नितंब देशरतिक्रीडा संग्राम के कारण उन्मादको प्राप्तहुवाहै। उसकारण हे चन्डि! तुम लज्जा त्याग करके निकुंज वनमें प्रवेश करो ॥ ६ ॥

स्मरशरसुभगनखेन सखीमवलंब्य करेण सलीलं॥ चल वलयक्कणितैरवबोधय हरिमपि निजगतिशीलं ॥ ७ ॥

सं०टी०स्मरेति। हेराधे त्वं करेण हस्तेन सखीं अवलंब्य सलीलं सविलासं यथा स्यात्तथा चल गच्छ। कीदृशेन करेण स्मरशरवत्कामबाणवत्सुभगानि सुंदराणि नखानि यस्मिन् रणे शस्त्राणि भवंतिरतिरणे तु त्वन्नखान्येव स्मरस्य शस्त्राणीति भावः।गत्वा च वलयक्कणितैः कंकणशब्दैः हरिं कृष्णं अव बोधय अहमागतेति ज्ञापयेत्यर्थः। अपिः क्रियासमुच्चये। कथंभूतं हरिं निजे आत्मनि गतिर्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यस निजगतिः कामस्तस्मिन् शीलं समाधिश्चित्तैकाग्र्यं यस्य कामपरवशमित्यर्थः ॥ ७ ॥

भा०टी०हे प्यारीजी ! तुम अभि कंदर्प-बाण सदृश नखर शोभित सुन्दर हस्तोंसे अपने सखी प्यारेके आश्रय करके क्रीडाके लिये कंकणके शब्द करो, जिस से तुम्हारी कुंजमें प्रवेश प्रकट होवेगा ॥ ७ ॥

श्रीजयदेवभणितमधरीकृतहारमुदासितवामं॥
हरिविनिहितमनसामधितिष्ठतु कंठतटीमविरा
मम्॥८॥ इति श्रीगीतगो०विंशतितमः प्रबंधः॥

श्रीजयदेवेति । श्रीजयदेवेन भणितं गीतं हरौ कृष्णे विनिहितमारोपितं मनश्चित्तं यैस्तेषां भक्तानां कंठतटीं अविरामं सर्वदा अधितिष्ठतु कंठदेशे वसत्वित्यर्थः। अधिशीङ्स्थासां कर्म । कीदृशं भणितं अधरीकृतः स्वगुणैर्हीनः कृतः मुक्ताहारो येन। पुनः कीदृशं उदासिता स्वगुणैस्तिरस्कृता वामा सुंदरी येन। यद्यपि हारस्य रमणं च कंठदेशस्थितस्य या शोभा तत्प्रदत्वं संभवति तथापि तयो रागिणामेव शोभाप्रदत्वं नतु मुमुक्षूणां तत्रापि तारुण्य एव नतु सर्वदा। जयदेवभणितं तु कृष्णकथात्वेन हारापेक्षया चाधिकमित्यर्थः ॥८॥

भा०टी० श्रीमान जयदेव स्वामी विरचित यहि हरिगुणगायन स्वरूपी हार सकल भक्त लोंगो को कण्ठमें शोभायमान रहै ॥ ८ ॥

इदानीं सखी कृष्णस्य स्नेहातिशयमाह--

सा मांद्रक्ष्यति वक्ष्यति प्रियकथां प्रत्यंगमालिं
गनैः प्रीतिं यास्यति रंस्यते सखि समागम्यति
चिंताकुलः॥स त्वां पश्यति वेपते पुलकयत्यानं
दति स्विद्यति प्रत्युद्गच्छति मूर्च्छति स्थिरतमः
पुंजे निकुंजे प्रियः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०सामामिति। हे राधे स प्रियः कृष्णः स्थिरे निश्चले तमः-पुंजे अंधकारसमूहे अन्यत्र तस्मिन्निकुंजे लतागृहे त्वां पश्यति ध्यानेन दृष्ट्वापि किमियं परुषं मधुरं वदिष्यतीति भयात् वेपते कंपते पुलकयति अंगानीत्यर्थात् ध्यानेनैव तदालिंगनं परिकल्प्य सरोमांचो भवतीत्यर्थः ध्यानेन त्वत्सुरतकेलिं परिकल्प्य स्विद्यति पश्चात्केलिं कृत्वा उत्थाय गंतुं प्रवृत्तायां त्वयि प्रत्युद्गच्छति प्रत्युत्थानं करोति ततः ध्यानविच्छेदे त्वामदृष्ट्वा मूर्च्छति। कीदृशः प्रियः चिंताकुलः चिंतायुक्तः। इतीतिकिं हे सखि सा राधा मां द्रक्ष्यति अनुकूलतया ईक्षते। दृष्ट्वा च प्रियकथां मनोहरां कथां वक्ष्यति वदिष्यति।उक्त्वा प्रत्यंगं प्रत्यवयवं प्रतिआलिंगनैः प्रीतिं संतोषं यास्यति प्राप्स्यति समागम्य मिलित्वा रंस्यते मया सह क्रीडिष्यति इति प्रश्ने। समागम्येति पूर्वार्द्धे सर्वत्र योज्यं। दीपकालंकारः शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

भा०टी०हे प्यारी! तुझे प्यारा अंधकार पूर्ण तमालसे विराजित निकुंजमें केवल तुम्हारे कारण विराजित है और किस समय में तुम्हारे साथ मेलन होगा केवलहि चिंता करते है! हे मेरी प्यारी! माधवके अवस्थाको में क्याकहूं माधवतो कभी शोचते है, कभी आनंद करते है, कभि निरासहोकर वैठते है, कभी एकदोपाओं आकर तुझे देखतेहै, एवं तुमारी अदर्शन हेतु कभी कभी मूर्च्छागतभी होजाते है ॥ १॥

गमनकालयोग्यं अंधकारं वर्णयति—

अक्ष्णोर्निक्षिपदंजनं श्रवणयोस्तापिच्छगुच्छा
वलिं मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिका
पत्रकम् ॥धूर्तानामभिसारसत्वरहृदां विष्वङ्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निकुंजे सखिध्वांतं नीलनिचोलचारुसुदृशां प्रत्यं गमालिंगति ॥ २ ॥

सं०टी० अक्ष्णोरिति । हे सखि राधे ध्वांतं अधकारः सुदृशां नायिकानां प्रत्यंगं प्रत्यवयवं आलिंगति आश्लिष्याति । किं कुर्वत् अक्ष्णोर्नेत्रयोरंजनं कज्जलं निक्षिपत् विन्यस्यत् । श्रवणयोः कर्णयोः तापिच्छगुच्छावलिं तमालपुष्पस्तबककर्णपूरपंक्ति निक्षिपत् । कुचयोस्तनयोःकस्तूरिकापत्रकं मृगमदपत्रावलीं निक्षिपत् । मस्तके श्यामसरोजदाम नीलकमलमालां निक्षिपत् । कीदृशीनां सुदृशां धूर्तानां परिवंचकानां । पुनः कीदृशींनां विष्वक् सर्वत्र निकुंजे लतागृहे अभिसारसत्वरं गमनाय ससाहसं हृत् यासां तास्तासां । कीदृशं ध्वांतं नीलनिचोलवत् श्यामवस्त्रवत् । चारु सदृशमित्यर्थः । नीलवस्त्रस्थाने ध्वांतं जातमित्यर्थः । अतो भूषणादि निर्माणेनापि कालातिक्रमो न युक्त इतिभावः ॥ २ ॥

भा०टी० हे प्यारी ! तुम अभि अपने दोनो नेत्रोको कज्जल से रंजित करो, दोनो कर्णो को तमाल गुच्छसे शोभित करो, मस्तक को नीलाकमलसे भूषित करो और दोनो स्तनो को कस्तूरी के रससे चर्चित करो हे प्यारी निकुंज वनमें क्रीडाके अभिलाषी कामुकजनको नीलरंगके निचोल अर्थात् उत्तरी वस्त्रसे तमिस्र श्रेष्ठहै; और वह कामिनीयोंको सर्व शरीर को अच्छि त्न्हासे आच्छादन करता है ॥ २ ॥

अंधकारमेव वर्णयति—

काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेख-
मभितोमणिमंजरीभिः ॥ एतत्तमालदलनील-
तमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ॥३॥

सं०टी० काश्मीरेति । हे राधे एतत्तमिस्रं अन्धकारः तत्प्रेम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तासामभिसारिकाणां यत्प्रेम प्रीतिस्तदेव हेम सुवर्णं तस्य निकषोपलतां घर्षणपाषाणतां तनोति विस्तारयति। कीदृशं तमिस्रं काश्मीरं कुंकुमं तद्वद्गौरं पीतं वपुर्यासां तासामभिसारिकाणां स्त्रीणां मणिमंजरीभिः मणिकिरणैः अभितः सर्वतः आबद्धा कृतरेखा यस्मिन् तमालदलं नूतनपत्रं तद्वन्नीलतमं अतिश्यामं। "कांतार्थिनी तु या याति संकेतं साभिसारिका" इत्यमरः। इत्यभिसारिकालक्षणं। अभिसारिकाणां प्रेमपरीक्षासमयस्त्वयमेव यदंधतमसि गमनमिति ॥ ३ ॥

भा०टी० श्रीराधाजीके और कृष्णजीके प्रेमकी परिक्षाके निमित्त केशर वर्ण तुल्य गौरांगी सहचरी गण तमाल वृक्षोके वीचमें छिपारहाहै; इससें ऐसाप्रतीतहोताहै आंधार सुवर्ण से रंजित होके कसौटि पत्थर समान रूप धारण कियाहै ॥ ३ ॥

हारावलीतरलकांचनकांचिदामकेयूरकंकण-
मणिद्युतिदीपितस्य ॥ द्वारेनिकुंजनिलयस्य
हरिं निरीक्ष्य व्रीडावतीमथ सखी निजगाद
राधां ॥ ४ ॥

सं०टी०हारावलीति । अथानंतरं सखी राधां निजगाद पुनरपि उवाच। कथंभूतां राधां निकुंजनिलयस्य लतागृहमेव निलयं निभृतगृहं तस्य द्वारे हरिं कृष्णं निरीक्ष्य दृष्ट्वा व्रीडावतीं सलज्जां अस्मिन्मया कति निष्ठुराणि वचांसि उक्तानि संप्रति तत्समक्षं कथं यामीति लज्जां। कीदृशस्य निकुंजनिलयस्य मुक्ताहारमध्यद्युमणेः द्युत्या कांचनकांचिदाम्नः सुवर्णकांचीरशनायाः द्युत्या केयूरस्य बाहुभूषणस्य द्युत्या कंकणयोर्द्युत्या एतेषु खचिता ये मणयस्तेषां द्युत्या च दीपितस्य प्रकाशितस्य एतेन ध्वांतेपि दर्शनयोग्यता उक्ता ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी० रतनरचितहार के एवं पदभूषणों के जडातिसे श्रीराधाजीने अंधेरे निकुंजमें प्रकाशको प्राप्तकरती भई। जबराधाराणी श्रीकृष्णचन्द्रजी को देखके लज्जा वती होतीभई, तव उन्हे उनकी सखी कहती भई ॥ ४ ॥

वराडिरागे तदेव गीतेनाह—

अथ एकविंशतितमः प्रबंधो वराडिरागेण आडवताले गीयते

मंजुतरकुंजतलकेलिसदने ॥ प्रविश राधे माधवसमीपमिह विलस ॥ रतिरभसहसितवदने ॥ १ ॥

सं०टी० मंज्विति हे राधे रतिरभसेन सुरतोत्साहेन हसितं हास्ययुक्तं वदनं मुखं यस्यास्तत्संबोधनं इह अस्मिन् मंजुरतं मनोहरं निकुंजाभ्यंतरदेशस्तदेव केलिसदनं क्रीडागृहं तस्मिन् माधवसमीपं प्रविश गच्छ पश्चाद्विलस क्रीडां कुरु ॥ १ ॥

भा०टी० हे रतिरसलुब्धा! हे सुमधुरहसती! तुम कुञ्ज कुटीरमें शीघ्र यात्राको करो, और श्रीमाधवजीकें पास पहुंचकर आनन्दसे क्रीडारूपी सुख का संभोग करो ॥ १ ॥

आम्नाय-ग्रन्थालय, भरतमिश्र, कबीरचौरा, वाराणसी

अपि च—

नवभवदशोकदलशयनसारे ॥ प्रविश० ॥ कुचकलशतरलहारे ॥ २ ॥

सं०टी० नवेति । कुचकलशयोश्चंचलो मुक्ताहारो यस्यास्तत्संबोधनं हे राधे इह क्रीडागृहे माधवसमीपं प्रविश विलस च । कीदृशे इह नवानि नूतनानि भवंति यानि अशोकस्य दलानि पर्णानि तत्कृता शय्या कृष्णशय्या तदेव सारो महाधनं यस्मिन् ॥ २ ॥

भा०टी० हे राधा! तुम अभि मनोरम हार विराजित स्तनोंकी भोगवा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च्छाके परितृप्त कारण और नवीन अशोक पत्रों से रचित सय्यामें शयन करनेके लिये श्रीमाधवके पास गमन करो ॥ २ ॥

कुसुमचयरचितशुचिवासगेहे ॥
प्र० ॥ कुसुमसुकुमारदेहे ॥ ३ ॥

सं०टी०कुसुमेति । हे कुसुमवत्सुकुमारो देहो यस्यास्तत्संबोधनं । कीदृशे इह कुसुमचयेन पुष्पसमूहेन रचितं कृतं शुचि अनुपहतं नायिकांतरेणानुपभुक्तं यद्वासगृहं तत्र विलस ॥ ३ ॥

भा०टी० हे कुसुमतुल्यसुकुमारदेही तुम पुष्पविरचित विलासकुटीरमें प्रवेश होयके श्रीमाधवके सहित काम भोगमें प्रवृत्त होरहो ॥ ३ ॥

मृदुचलमलयपवनसुरभिशीते ॥
प्र० ॥ रसवलितललितगीते ॥ ४

सं०टी० मृदुचलेति । हे रसेन वलितं कृतं ललितं मनोहरं गीतं यया तत्संबुद्धिः हे राधे इह केलिसदने विलस । कीदृशे इह मृदुश्चलश्चंचलो यो मलयपवनस्तेन संपर्कवशात् सुरभि एवंभूतं सत् शीतलं तस्मिन् ॥ ४ ॥

भा०टी० हे श्रीराधा! अभि पवन मन्द मन्द वहती है, इसकारण तुम शृंगार रस पूर्णगीतोंको गायन करके श्रीमाधवजीके पास जाय कर क्रीडारूपी उत्साह में आशक्त हो ॥ ४ ॥

विततबहुवल्लिनवपल्लवधने ॥ प्र० ॥
चिरमिलितपीनजघने ॥ ५ ॥

सं०टी०वितततेति । हे चिरमिलिते बहुकाले अन्योन्यसंबद्धे पीने मांसले जघने यस्यास्तत्संबुद्धिः हे राधे इह विलस । कीदृशे इह वितता इतस्ततो विशीर्णा बह्वचो वल्लयो वल्लयस्तासां नवपल्लवास्तैर्घने निविडे । शयने इत्यध्याहारः । निबिडशयन इत्यर्थः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी० हेराधा ! हे उन्नतजंघी ! तुम नवीन पत्र एवं रतिकासे विनिर्म्मित केलि भवनमें अभि माधवके निकट गमन करो ॥ ५ ॥

मधुमिलितमधुपकुलकलितरावे ॥

प्र० ॥ मदनरभसरसभावे ॥ ६ ॥

सं०टी०मध्विति । हे मदनरभसः कामरभसः शृंगारस्तस्य भावोऽभिप्रायो यस्यास्तत्संबुद्धिः । कीदृशे इह मधुनि पुष्परसे मिलितानि तत्पानार्थमित्यर्थः यानि मधुपकुलानि भ्रमरसमूहास्तैः कृतः कलितः रावः शब्दो यस्मिन् ॥ ६ ॥

भा०टी०हे रतिरंगविमूढा राधा इस वसंत कालमें मधुपानसे मदमत्त भ्रमरोंने विलास भवनमें कृष्णचंद्रजी कि महिमा सुन्दर रागमें प्रेमके साथ वर्णन करते है, इस लिये तुममाधवके पास शीघ्रतासे गमन करो६

मधुतरलपिकनिकरनिनदमुखरे ॥

प्र० ॥ दशनरुचिरुचिराशिखरे ॥ ७ ॥

सं०टी०मधुतरलेति।हे दशनरुचिरुचिराशिखरे तव दन्तदीप्तिरेव रुचिरं शिखरं माणिक्यविशेषो यस्यास्तत्संबुद्धिः । कीदृशे इह मधुना वसंतेन तरलश्चंचलः पिकनिकरः कोकिलसमूहस्तस्य निनदेन शब्देन मुखरे शब्दायिते " पक्कदाडिमबीजाभं माणिक्यशिखरं विदुः "इति शाश्वतः ॥ ७ ॥

भा०टी०हे राधा दाडिम्ववीज समान दशना! अभि कोयलके मधुरध्वनिसे क्रीडा भवन आनंद पूर्ण है, इस कारण तुम शीघ्र माधवके पास गमन करो ७

विहितपद्मावतीसुखसमाजे ॥कुरु मुरारे मंगलशतानि भणति जयदेवकविराजराजे ॥ ८ ॥

इति श्रीगीतगोविंदे एकविंशतितमः प्रबंधः ॥ २१

विहितेति । हे मुरारे कृष्ण त्वं जयदेवकविराजराजे मंगलशता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नि कुरु। कीदृशे जयदेवकविराजराजे विहितः कृतः पद्मावत्याः स्वस्त्रियाः सुखसमाजः शुभसमूहो यस्मिन्। एतेन स्वनायिकायामेव प्रेमातिशयो दर्शितः नत्वन्यस्यां। पुनः कीदृशे भणति च गुणान्वदति क्वचित्प्रविश राधे माधवसमीपभणितेति पाठः ॥ ८॥

भा०टी०श्रीमान जयदेवस्वामी प्रार्थना करते है, कि हेराधाप्रिय नारायण! आप राधाजीके साथ कृपा करके सर्व जीवों को मंगल करो ॥ ८ ॥

त्वां चित्तेन चिरंवहन्नयमतिश्रांतो भृशं तापितः कंदर्पेण च पातुमिच्छति सुधासंबाधबिंबाधरम्॥ अस्यांकं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीनवक्रीतो दास इवोपसेवितपदांभोजे कुतः संभ्रमः ॥ १ ॥

सं०टी०त्वामिति। हे राधे अयं कृष्णस्तव सुधयाऽमृतेन संबाधं गहनं बिंबाधरं पातुमिच्छति। कीदृशः कृष्णः यतः चित्तेन मनसा त्वां चिरं वहन् अतिश्रांतः। यतः कन्दर्पेण भृशं तापितः अन्योपि भारवाही सूर्यतापितश्च जलानि पातुमिच्छति तद्वदित्यर्थः तत्तस्मादस्य कृष्णस्यांकं क्रोडं क्षणं मुहूर्तमात्रं अलंकुरु भूषय। तत्समीपं गंतुं बिभेमीत्यत आह इह कृष्णे संभ्रमो भयं कुतः। कीदृशे इह दास इव सेवक इव स्थिते पुनः कीदृशे भ्रूक्षेपः भ्रुकुटी क्षेपः स एव लक्ष्मीः संपत् द्रव्यं तेन नवक्रीते। नूतनः क्रीतो दासोऽतिभीतो भवतीतिभावः। अतएव उपसेवितं पदांभोजं चरणकमलं येन ॥ १ ॥

भा०टी०हे राधा! जो माधव तुमारी मूर्ति को निरन्तर अपने मनमें प्राप्त करके बहुत क्लेशितहुवेहै, और जो माधव अभि कामदेव स्वरूप होयके तुमारे अमृत पूर्ण बिंबाधरके मकरन्दको पानके लिये लोभ करते है,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभी तुम शीघ्र वह माधवके समीप में जायकर उनको क्रोडदेशको भूषित करो । हे राधा तुमने अपने तीक्ष्ण नेत्रो को कटाक्षसे उस माधवको अपने दास भावको प्राप्त कर लिया है; अब तुम उनके समीप पर जानेके लिये क्यों सरम करते हो ॥ १ ॥

सा ससाध्वससानंदं गोविंदे लोललोचना ॥ सिंजाना मंजुमंजीरं प्रविवेश निवेशनम् ॥ २ ॥

सं०टी०सेति । सा राधा निवेशनं लतागृहं प्रविवेश सखीवचनात् । कीदृशी राधा ससाध्वसं विदग्धः कृष्णः कथं मया रंजनीय इति सानंदं सहर्षं च इति नैकट्यात् गोविंदे कृष्णे लोले लोचने यस्याः सलज्जत्वात् । पुनः कीदृशी मनोहरशब्दयुक्तं मंजीरं नूपुरं सिंजाना गमनवशात् सशब्दं कुर्वंती क्वचित्ससाध्वससानंदगोविंदे इतिपाठः । तदा ससाध्वसः पूर्वापराधात् सानंदः राधायाः आगमनात् । एवं नागरयोः समागमे रसोत्पत्तिरुक्ता ॥ २ ॥

भा०टी० सखीवचनोंको सुन कर श्रीराधारानी ने आनंद चित्तहो कर अपने अलंकारों को झिन झिन शब्दके सहित गोविंद दर्शनके लिये विलाश भवनमें प्रविष्ट होगई ॥ २ ॥

लीलागृहप्रवेशं निरूप्येदानीं दर्शनमहोत्सवेन रसविक्रियां गीतेनाह—

अथ द्वाविंशतितमः प्रबंधो वराडीरागेण रूपकताले गीयते

राधावदनविलोकनविकसितविविधविकारविभंगं ॥ जलनिधिमिव विधुमंडलदर्शनतरलिततुंगतरंगं ॥ १ ॥ हरिमेकरसं चिरमभिल-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षितविलासं ॥ सा ददर्श गुरुहर्षवशंवदवदनम-
नंगविकाशम् ॥ ध्रु० ॥

सं०टी० वराडीरागः। रूपकतालः। सा राधा एवंभूतं हरिं ददर्श सप्तपद्यां सर्वाणि हरिविशेषणानि। कीदृशं हरिं राधावदनविलोकनेन विकाशितः प्रकाशितो विविधो नानाप्रकारो विकारविभंगः कटाक्षादिरचना येन तं। पुनः कीदृशं जलनिधिं समुद्रमिव स्थितं। कीदृशं जलनिधिं विधुमंडलदर्शनेन चंद्रमंडलालोकेन तरलिताश्चंचलीकृताः तरंगाः कल्लोला यस्य तं। पुनः कीदृशं एकरसं एकस्यां राधायामेव रसः प्रीतिर्यस्य तं। पुनः कीदृशं चिरं बहुकालं अभिलषितः प्रार्थितः विलासः केलिर्येन तं। पुनः कीदृशं गुरुहर्षस्यातिशयस्य हर्षस्य वशंवदं आधीनं वदनं मुखं यस्य सानंदमुखमित्यर्थः। पुनः कीदृशं अनंगस्य कामस्य निवासं स्थानभूतं कंदर्पकोटिलावण्यमित्यर्थः। अत्रागाधशृंगाररसाश्रयत्वेन कृष्णस्य जलनिधिसाम्यं राधामुखस्यान्हादकारित्वादिना चंद्रसाम्यं बोध्यं। उपमालंकारश्च ॥ १ ॥

भा०टी०जैसे विधु मण्डल को देख जलनिधि तरंग युक्त होकर पूर्णानंदको प्राप्तहोकर प्रसन्न होताहै, तैसे हि श्रीकृष्णजी राधारमणीके मुख चन्द्रमाको देखकर अनेक प्रकारकी भावना संपूर्ण; सुख एवं चिर वांछित विलास रूपी तृष्णा की तृप्ति के कारण उनके मुख कमलमें अनंग राग प्रतीयमान हुआहै ॥ १ ॥

हारममलतरतामुरसिदधतं परिलंबितदूरं ॥ स्फुट
तरफेनकदंबकरंबितामिवयमुनाजलपूरम् ॥ २ ॥

सं०टी० हारमिति। पुनः कीदृशं हारं मुक्ताहारं दधतं धारयंतं उरसि हृदये कीदृशं हारं अमलतरतारं अत्यन्तविशुद्धबृहत्तरं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशं स्फुटतरो यः फेनकदम्बस्तेन करंबितं मिश्रितं यमुनाजलपूरमिव श्रीकृष्णस्य श्यामत्वाद्यमुनाप्रवाहसाम्यं हारस्य शुभ्रत्वात् फेनसाम्यं बोध्यम् ॥ २ ॥

भा०टी०श्रीकृष्णजीके कण्ठमें जो मुक्ता लता दोदुल्य मानथी, वह यमुना नदीके जलके फेणरूपी होकर परम शोभा की उत्पन्न की थी॥२॥

श्यामलमृदुलकलेवरमंडनमधिगतगौरदुकूलं॥नीलनलिनमिवपीतपरागपटलभरवलयितमूलम्॥३॥

सं०टी०श्यामलेति । श्यामलं कृष्णं मृदुलं कोमलं कलेवरमंडनं शरीरालंकारो यस्य तं । पुनः कीदृशं अधिगतं परिहितं गौरदुकूलं पीतवस्त्रं येन कमिव नीलोत्पलमिवेत्यर्थः । कीदृशं नीलनलिनं पीतपरागाणां कुंकुमरेणूनां पटलस्य समूहस्य भरः अतिशयस्तेन वलयितं वेष्टितं मूलं यस्य तत्तथा ॥ ३ ॥

भा०टी०श्रीकृष्णजी का सुन्दर श्याम कलेवर पीत वस्त्र से आवृत होयके पीत वर्ण पराग परिवृत नील कमलके तुल्य शोभायमान हुआहै॥३॥

तरलदृगंचलचलनमनोहरवदनजनितरतिरागं॥स्फुटकमलोदरखेलितखंजनयुगमिव शरदितडागं॥४॥

सं०टी०तरलेति । कीदृशं हरिं तरलश्चंचलो यः कटाक्षस्तस्य चलनेन मनोहरं सुंदरं यद्वदनं तेन जनित उत्पादितो रसो रागोऽभिलाषोऽर्थात् नारीणां येन नारीणामपि कामकरमिति भावः । कमिव शरदि शरत्काले तडागमिव । कीदृशं तडागं स्फुटकमलस्य विकासितपद्मस्योदरमध्ये खेलितं क्रीडितं खंजनयोर्युग्मं युगलं यत्र तथा शरत्काले खंजनवर्णनमुचितमेव ॥ ४ ॥

भा०टी० जैसे शरत कालमें सरसीकी गर्भ में स्फुटित कमल कानन पर खंजरीट पक्षी शोभायमान होताहै, तैसेहि श्रीराधाराणीजीके तरल नेत्र युगल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विराजित मुख कमलको दृष्टिकर माधवके काम स्पृहा अतीव प्रदीप्त हुआहै॥ ४

वदन कमलपरिशीलनमीलितमिहिरसमकुंड लशोभं ॥ स्मितरुचिरुचिरसमुल्लसिताधरपल्ल वकृतरतिलोभम् ॥ ५

सं०टी० वदनेति । वदनकमलस्य परिशीलनाय मिलिते मिहिरसमे सूर्यतुल्ये ये कुण्डले ताभ्यां शोभा यस्य तं तथा । पुनः कीदृशं स्मितरुचिरुचिरो हास्यदीप्तिसुभगः समुल्लसितो दीप्यमानो योऽधरपल्लवस्तेन कृतो रतौ लोभो युवतीनां रताभिलाषो येन तं तथा त्वत्पक्षे त्वयि रतिलोभमित्यत्र गमकत्वात्समासः॥ ५ ॥

भा०टी०श्रीकृष्णजीके सूर्य के समान कुण्डल युगलसे उन्होका मुख कमल प्रकाशित होनेसे जो मृदु हांसि की आविरभाव हुआहै, उससे उनका रति लोभ विकाश हुआहै ॥ ५ ॥

शशिकिरणच्छुरितोदरजलधरसुंदरकुसुमसुके शं ॥ तिमिरोदितविधुमंडलनिर्मलमलयजति लकनिवेशम् ॥ ६ ॥

सं०टी०शशिकिरणेति। कीदृशं हरिं। शशिकिरणेन चन्द्रदीप्त्या च्छुरितं मंडितमुदरमभ्यंतरं यस्य जलधरस्य मेघस्य तद्वत्सुंदराः पुष्पसहिताः केशा यस्य तं। अत्र केशानां श्यामतया मेघसाम्यं तत्रस्थकुसुमानां च मेघांतश्चारिचंद्रकिरणसाम्यं बोध्यं। पुनः कीदृशं तिमिरेऽधकारे उत्थितो यो विधुमंडलश्चंद्रबिंबस्तद्वन्निर्मलं मलयजतिलकं चंदनबिंदुस्तस्य निवेशोऽवस्थानं यत्र तं शृंगारिणां नागराणां तिलकं वर्तुलमेवेति तस्य चन्द्रसाम्यं चन्द्रोदये तिमिर स्यासंभवादभूतोपमेयं बोध्या ॥ ६ ॥

भा०टी०श्रीकृष्णजीके कुसुम-शोभित केश समूह शशिकिरणोंसे शो-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भायमान मेघके तुल्य होरहाहै; और जो उनका ललाटस्थ चंदन तिलक है सो तिमिरोदित चन्द्रमाके तुल्य दीप्तिमान हुआहै ॥ ६ ॥

विपुलपुलकभरदंतुरितं रतिकेलिकला भिरधीरं ॥ मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरं ॥ ७ ॥

सं० टी० विपुलेति । कीदृशं हरिं विपुलोधिको यः पुलकभरो रोमांचातिशयस्तेन दंतुरितं निम्नोन्नतं व्याप्तमित्यर्थः ॥ पुनः कीदृशं रतिकेलिकलाभिः सुरतक्रीडाकथाभिरधीरं चंचलं ॥ पुनःकीदृशं मणिगणानां किरणसमूहेन समुज्ज्वलं दीप्यमानं यद्भूषणं तेन सुभगं सुंदरं शरीरं यस्य तं तथा ॥ ७ ॥

भा० टी० अनंग राग समधिक वृद्धि के कारण श्रीकृष्णजीका शरीर आनंद—दीपित एवं पुलकित होरहाहै; उससे उनके सकल अंग मणि मय भूषणों से भूषित बोलके प्रतीत होते है ॥ ७ ॥

एवंभूतस्य कृष्णस्य दर्शनाद्राधायास्तदानीं किंजातमिति कविराह—

श्रीजयदेवभणितविभावद्विगुणीकृतभूषणभारं ॥ प्रणमत हृदि विनिधाय हरिं भवजलसुकृतोदयसारं ॥ ८ ॥

सं० टी० श्रीजयदेवेति ॥ श्रीजयदेवस्य भणितविभावेन भाषितप्रपंचेन द्विगुणीकृतस्यालंकारस्य भारो यस्य तं हरिं हे कृष्णभक्ताः प्रणमत नमस्कुरुत किं कृत्वा सुचिरं चिरकालं हृदि विनिधाय संस्थाप्य कथंभूतं हरिं सुकृतस्य य उदयस्तस्य सारं यद्वा सुकृतोदय एव सारो धनं यस्मात्तं ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भा०टी० श्रीमान् जयदेव स्वामी कहते हैं, कि हे भक्तजनों! पुण्यके कारण में जो नारायण के सर्व भूषणो को द्विगुणित करके वर्णन करताहूं उस नारायणको तुमने अपने हृदयमें स्थापितकर अपना शिर उनके चरण कमलमें पतित करो ॥ ८ ॥

अतिक्रम्यापांगं श्रवणपथपर्यंतगमनप्रयासे-
नेवाक्ष्णोस्तरलतरतारं पतितयोः ॥ इदानीं रा-
धायाः प्रियतमसमालोकसमये पपात स्वे-
दांबुप्रसर इव हर्षाश्रुनिकरः ॥ १ ॥

सं०टी०अतिक्रम्येति ॥ इदानीं प्रियतमसमालोकसमये प्रवाहसदृशः राधायाः हर्षाश्रुनिकरः सात्विकभावेन नेत्रांबुपूरः पपात ॥ तत्रोत्प्रेक्षते अपांगं नेत्रप्रांतं अतिक्रम्योल्लंघ्य श्रवणपथस्य कर्णमार्गस्य पर्यंते गमनं तेन यः प्रयासस्तेनेवाक्ष्णोः स्वेदांबुप्रसरोभूत् ॥ कीदृशयोरक्ष्णोः तरलतरतारं चंचलाक्षकनीनिकं यथा स्यात्तथा-पतितयोः अन्यस्यापि गमनेन श्रमो भवति तेन च पतति तद्वत् ॥ १

भा०टी०प्रिय प्यारे माधवके साथ मिलनेके समयमें श्रीराधाराणीके चंचलनेत्रयुगल उनकी कटाक्षोंके उल्लंघन करके कर्ण मूलपर्यंत आकर उन्हें क्लिष्ट किया करतेहैं; और आनंदसे उन्होंके दोनो नेत्रोंसे अश्रुजलभीवर्षित हुआहै १

भजंत्यास्तल्पांतंकृतकपटकंडूतिपिहितस्मिते
याते गेहाद्बहिरवहितालीपरिजने ॥ प्रियास्यं
पश्यंत्याः स्मरशरवशाकूतसुभगं सलज्जाया
लज्जा व्यगमदिव दूरं मृगदृशः ॥ २ ॥

सं०टी०भजंत्याइति ॥ मृगदृशः मृगाक्ष्या राधायाः लज्जापि दूरं व्यगमदिव गतेव॥ कीदृश्याः राधायाः अवहितः सावधानो य आलीपरिजनः सखीसेवकवर्गस्तस्मिन् गेहाद्बहिर्यांते गते सति तल्पांतं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शय्यापर्यंतं भजंत्याः प्राप्नुवत्याः ॥ कीदृशे परिजने कृता कपटेन कर्णादेः कंडूतिः कंडूयनं तेन पिहितं छादितं हास्यं येन॥पुनः कीदृश्याः प्रियास्यं कृष्णमुखं पश्यंत्याः॥ कीदृशं प्रियास्यं स्मरशरवशं कामबाणाधीनं आकूतं सुरताभिप्रायस्तेन सुभगं मनोहरं कामविकारहावभावादिमनोहरमित्यर्थः । पुनः कीदृश्याः सलज्जायाः लज्जासहितायाः तस्याश्चेष्टां दृष्ट्वा वचनांतरेण अपृष्ट्वा बहिर्गमनात्सखीनां साम्यं सर्वाः सख्यो गता इति ॥ कथमत्र स्थातव्यमिति लज्जापि गतेति भावः ॥ २ ॥

भा०टी०मंदमंदहास्यसें और कपटके चिकुर कंडूयनसे श्रीराधाराणी विलास शय्यामें गमन कररहीथी; तब सकल सखियां कुंज कुटीरके बाहरमें आगई परन्तु श्रीराधाराणी जब अपनी चंचल दृष्टिसे कामलोभित प्यारेके मुखारविन्दको दर्शन करतीथी, तब व्रीडा व्रीडाको प्राप्त होकर तत्क्षणानं अतर्हित हुआ ॥ २ ॥

जयश्रीविन्यस्तैर्महित इव मंदारकुसुमैः स्वयंसिंदूरेण द्विपरणमुदा मुद्रित इव ॥ भुजापीडक्रीडाहतकुवलयापीडकरिणःप्रकीर्णासृग्बिंदुर्जयति भुजदंडो मुरजितः॥ ३॥

सं०टी०जयेति ॥ मुरजितः कृष्णस्य भुजदंडो दंडाकारबाहुर्जयति सर्वोत्कर्षेण वर्तते भक्तानां रक्षणार्थमितिशेषः ॥ दंडशब्देन आजानुबाहुत्वं द्योतितं ॥ कीदृशो भुजदंडः प्रकीर्णाः सर्वत्र लग्ना असृग्बिंदवो रक्तबिंदवो यस्मिन् अत एव कुवलयापीडसंग्रामसंतोषेण स्वयं सिंदूरेण मुद्रित इव चित्रित इव द्विपश्रेोत्सिंदूरेण मुद्रितस्तर्हि मदीयो बाहुरपि सिंदूरमुद्रितो भवतु ॥ पुनः कीदृश इव जयश्रियाजयलक्ष्म्या विन्यस्तैर्विक्षिप्तैर्मंदारकुसुमैः पारिजातपुष्पैर्महित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इव पूजित इव जयिनः शूरस्योपरि पुष्पवृष्टिरुचिता ॥ कीदृशस्य मुरजितः भुजापीडस्य बाहुदंडस्य क्रीडया हतः कुवलयापीडनामा करी हस्ती येन ॥ अनेन सामर्थ्यलक्षणो नायकगुण उक्तः ॥ एवंभूते भुजदंडे गाढालिंगनादिना श्रीराधायाः निःशंकक्रीडनं सूचितमिति भावः ॥ अत्रोत्प्रेक्षालंकारः ॥ सानंदो राधासमागमेन सौंदर्येति क्षेपकः ॥ ३ ॥

भा०टी०जैसे केलिमें आघातित होनेसे हस्ति रुधिरसे रंजित होकर विजय लक्ष्मीके प्रसादसे मन्दारकुसुम शोभित बोलके प्रतीयमान होताहै, तैसेहि श्रीमाधवजीके सर्वशरीरविजयकेहेतु आनंदरूपी सिंदूरसे चर्चितहुएहै श्रीमान जयदेव स्वामी कहतेहैं, कि महानन्दमग्नमाधवजीका भुजद्वय सकल लोगोंको मंगलकरे॥ ३ ॥

इति श्रीकविराजश्रीजयदेवकृते गीतगोविंदे महाकाव्ये अभिसारिका वर्णने सानंद गोविंदोनामसटीक एकादशः सर्गः ॥ ११ ॥

अथ द्वादशः सर्गः प्रारभ्यते

गतवति सखीवृंदे मंदत्रपाभरनिर्भरस्मरशरवशाकूतस्फीतस्मितस्नपिताधरां ॥ सरसमनसं दृष्ट्वाराधां मुहुर्नवपल्लवप्रसवशयने विक्षिप्ताक्षीमुवाच हरिः प्रियाम् ॥ १ ॥

सं०टी०गतवतीति॥ अथ हरिःकृष्णः प्रियां वल्लभां राधां सरसमनसं रसोनुरागस्तत्सहितं मनो यस्यास्तां दृष्ट्वा उवाच वक्ष्यमाणमितिशेषः ॥ कस्मिन् सति सखीवृंदे सखीसमूहे गतवति सति ॥ कीदृशीं राधां मंदोल्पो यस्त्रपाभरो लज्जाभरस्तेन निर्भरोतिशयि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तो यः स्मरशरस्तत्परवशस्तदायत्त आकूतोभिप्रायस्तेन स्फीतं प्रवृद्धं यत् स्मितमीषद्धसितं तेन स्नपितौ व्याप्तावधरौ यस्यास्तां॥ अथ मदकूर इति स्मरविशेषणं ॥ पुनः कीदृशीं मुहुः पुनः पुनः नवपल्लवप्रसवशयने नवपल्लवपुष्पमये शयने विक्षिप्ताक्षीं निहितनयनां शय्यालोकनेन सुरतेच्छा ध्वन्यते ॥ अस्मिन्सर्गे स्वाधीनभर्तृका नायिका वर्ण्यते "यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुंचति ॥ विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृका" ॥ १ ॥

भा०टी०सकल सखियां प्रस्थान करनेसें श्रीराधाराणीजी नवीन पत्रोंकी शय्यापर दृष्टिपात करके लज्जा युक्त होगई । तब उनके हांसिविकसित मुख कमल एवं मदन लिपसाको अनुभव करके उन्हे श्रीकृष्ण चंद्रजी कथनकरनेलगे ॥ १ ॥

अथ त्रयोविंशतितमः प्रबंधो विभास रागेण एकतालीताले गीयते

किसलयशयनतले कुरु कामिनि चरणनलिन विनिवेशं॥ तव पदपल्लववैरिपराभवमिदमनुभव तु सुवेशम् ॥ १ ॥ क्षणमधुना नारायणमनुगतमनुसर भो राधिके ॥ ध्रु० ॥

सं०टी०किसलयेति । विभासरागः । तल्लक्षणं । "स्वच्छन्दसंमानितपुष्पचापः प्रियाधरस्वादसुखातितृप्तः । पर्यंकमध्यास्यकृतोपवेशो भासो विपूर्वः किल हेमगौर" इति । हे राधेअधुना क्षणं अनुगतं अधीनं मां नारायणं अनुसर अनुगच्छ । अनुसरणप्रकारमाह हे कामिनि हे कामुके त्वं किसलयैः रचितस्य शयनस्य शय्यायास्तले उपरिभागे चरणनलिनस्य विनिवेशं पादपद्मसमर्पणं कुरु इदं किसलयशयनं तव पदपल्लवेन वैरि तस्मात्पराभवं तिरस्कारं अनु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भतु प्राप्नोतु तव पदपल्लवस्य कांतिहरणात् शत्रुमस्तके हि चरणो दीयते । कीदृशं इदं सुवेशमपि पत्ररचनादिनालंकृतमपि ॥१॥

भा०टी०हे सुंदरि! अभी तुम नवीन पत्रोंकी शय्यापर अपने चरण कमलोंको स्थापन करो, क्यों कि इससे तुह्मारा विपक्ष नव पत्रगण पराजयको प्राप्त होजायंगे तुम क्षणकालके लिये मेरे प्रति लज्जावती नरहो, और मुझे अधम कामुक अनुमानकरके मुझमें कृपाको विस्तीर्ण करो ॥ १ ॥

करकमलेन करोमि चरणमहमागमितासि वि
दूरं ॥ क्षणमुपकुरु शयनोपरि मामिव नूपुरमनु
गतिशूरं ॥२॥

सं०टी०हे राधे अहं करकमलेन ते चरणं करोमि संवाहयामि। धातूनामनेकार्थत्वात् । यतस्त्वं विदूरं आगमितासि मयाआनीतासि । दूरागतस्य चरणसंवाहनमुचितं त्वं शयनोपरि क्षणं नूपुरं उपकुरु कमिव अनुगतिशूरं तवानुसरणे शूरं मामिव यथा आलिंगनादिना मामुपकरोषि तथा नूपुरमपि शय्यातलमलंकुरु इति भावः ॥२॥

भा०टी०हे सुंदरी ! वहुत प्रकारकी विनंतिसे मैंने तुझे बुलायाहै, इस कारण मैं किंचितकालके लिये तुमारे चरणोंकी सेवा करूंगा । तुम मेरे समान किंकरके प्रति कृपादृष्टिको करो, और नूपुरके तुल्यकरके मुझे शय्यापर ग्रहण करो; क्योकि मैं नूपरके समान होकर तुमारे पश्चात गमन करताहूं ॥२॥

वदनसुधानिधिगलितममृतमिव रचय वचनम
नुकूलम् ॥ विरहमिवापनयामि पयोधररोधक
मुरसि दुकूलम् ॥ ३

सं०टी०वदनेति । त्वं अनुकूलं वचनं वाक्यं अमृतमिव रचय वद। कीदृशं वदनमेव सुधानिधिश्चन्द्रस्तस्माद्गलितमुत्पन्नं अनंतरं उरसि वक्षसि वर्तमानं दुकूलं पट्टवस्त्रं विरहमिव अपनयामि स्फोटयामीत्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

र्थः ।कीदृशं पयोधररोधकं स्तनाच्छादकं विरहपक्षे स्तनाश्लेषप्रातिबन्धकम् ॥ ३ ॥

भा०टी०हे सुंदरि! तुम अपने मुखचंद्रविनिर्गत अमृतके तुल्य वचनों से मेरे कानोंकी तृप्ति करो; और मे तुमारे स्तनाच्छादक वस्तुको दूर करे तुमारे विरहकोभी दूर करूंगा ॥ ३ ॥

कुटिलमवलोकयंतीमतिविह्वलः सन्नाह—

प्रियपरिरंभणरभसवलितमिव पुलकितमन्यदुरापं ॥ मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापम् ॥ ४ ॥

सं०टी०प्रियेति ॥ हे राधे त्वं मदुरसि मम वक्षसि कुचकलशं विनिवेशय स्थापय स्तनकलशार्पणेन मनसिजतापं कामपीडां शोषय खण्डय ॥ कीदृशं प्रियपरिरंभणाय ममालिंगनाय रभसेनोत्साहेन वलितमिव संमुखमिव ॥ पुनः कीदृशं पुलकितं संजातरोमांचं ॥ पुनः कीदृशं अन्येनातिदुःखेन प्राप्यते इति अन्यदुरापं सजलकुंभक्षेपेण तापशांतिर्युज्यत एव ॥ ४ ॥

भा०टी०हे सुंदरि! तुम मेरे साथ कामभोगमें आसक्त होकर अपने स्तनयुगलको मेरे उरुपटपर संस्थापित करके मेरेको पंचशर ज्वालाको निश्चयसे निवारण करो ॥ ४ ॥

त्वदेकजीवनं मां त्वमेव जीवयेत्याह—

अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासं ॥ त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम् ॥ ५ ॥

सं०टी०अधरेति॥हे भामिनि कामकुशले त्वं अधरसुधारसं ओष्ठामृतरसं उपनय देहि अनेन दासं सेवकं मां मृतमिवजीवय ॥ की-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृशं त्वयि विनिहितमनसं दत्तमानसं ॥ पुनः कीदृशं विरहानलेन वियोगाग्निना दग्धं वपुः शरीरं यस्य अतएवाविलासं निश्चलं मृतस्तु निश्चलो भवति ॥ ५ ॥

भा०टी०हे सुंदरि! जिसका मन तुझमें एकान्त आसक्त हुवाहै. और जिसका शरीर विरहस्वरूपी अग्निसे अत्यन्त दग्ध हुवाहै, तुम अपने अधरामृतको दानकर वह दासको जीवित करो ॥ ५ ॥

चाटुकेन प्रसन्नां प्रत्याह—

शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठ
निनादं ॥ मम श्रुतियुगले पिकरवविकले शमय
चिरादवसादं ॥ ६ ॥

सं०टी०शशीति ॥ हे शशिमुखि चंद्रवदने त्वं मणिरसनागुणं मणियुक्तं कांचीदाम मुखरय शब्दितं कारय ॥ कीदृशं अनुगुणः सदृशः कंठनिनादो यस्य कंठगीतनादसदृशमित्यर्थः। तेन शब्देन त्वं मम श्रुतियुगले कर्णयुग्मे चिरात्तव विरहेण योवसादः खेदस्तं शमय नाशय । खेदकारणमाह कीदृशे श्रुतियुगले पिकरुतैः कोकिलशब्दैर्विकले दुःखिते। विरहिणोहि पिकरुतं दुःसहं भवति॥६॥

भा०टी०हे चंद्रमुखि! तुम अपने मणिविनिर्मित कांचीके शब्दोंसे और अपने मधुर वाणीसें मेरे करणोंको तृप्त करो, क्योंकि कोयलके कुहुरको सुनकर मेरे करण अतिशयसे दुःखको प्राप्त हुये है ॥ ६ ॥

किंचिदवलोकयंतीमाह—

मामतिविफलरुषा विकलीकृतमवलोकितुमधु
नेदं ॥ मीलति लज्जितमिव नयनं तव विरम वि
सृज रतिखेदं ॥ ७॥

सं०टी०हे राधे तवेदं नयनं नेत्रं अधुना मामवलोकितुं द्रष्टुं ल-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ञ्जितमिव मीलति मीलनं धत्ते । कीदृशं मां अतिविफलरुषा अतिविफलकोपेन विकलीकृतं कर्णांतरं प्रापितं अत एव रोषाद्विरम विरक्ता भव । रतिखेदं क्रीडादैन्यं विसृज त्यज । कोपं त्यक्त्वा मया सह रमणं कुर्वित्यर्थः ॥ ७॥

भा०टी०हे चन्द्रमुखि! तुम अभि मेरे प्रति वृथाही कोप कररहिहै, क्योंकि इस प्रमाण तुमारे नेत्रोंसे प्रतीत होताहै; किन्तु तुमने लज्जाके लीये अपने नेत्रोंको किंचित उन्मीलन कराहै । हे प्यारी अभितुम मिथ्या अभिमानको त्याग करो, और धीर्य्यको प्राप्त होकर अपने विरहको दूर करो७

श्रीजयदेवकवेरिदमनुपदनिगदितमधुरिपुमोदम् ॥ जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम् ॥ ८ ॥ इति श्रीगीतगोविंदे त्रयोविंशातितमः प्रबंधः॥ २३ ॥

सं०टी०श्रीति श्रीजयदेवेन भणितमिदं गीतं रसिकजनेषु शृंगाररसिकलोकेषु मनोरमं मनःप्रीतिकरं रतिः संभोगः रसः शृंगाररसः भावाः संचारिणसात्त्विकादयो ये तेषां विनोदं कौतुकं जनयतु उत्पादयतु । कीदृशमिदं अनुपदं पदेपदे निगदितो उक्तो मधुरिपोः कृष्णस्य मोदो हर्षो यत्र गीते ॥ ८

भा०टी०श्रीमान् जयदेव स्वामी विरचित यह नारायण को कामभोग वाञ्छा सकल भक्तजनों को आनंद मे प्राप्त करे ॥८॥

इदानीं सुरतारंभं निरूपयाति—

प्रत्यूहः पुलकांकुरेण निबिडाश्लेषे निमेषेण च क्रीडाकूतविलोकितेऽधरसुधापाने कथाकेलिभिः॥ आनंदाधिगमेन मन्मथकलायुद्धेपि यस्मिन्नभूदुद्भूतः स तयोर्बभूव सुरतारंभः प्रियंभावुकः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०प्रत्यूह इति। तयोः राधाकृष्णयोः सुरतारंभः प्रियंभावुकः प्रियं भवितुं शीलं यस्य सः उद्भूतः प्रकटो बभूव। स कः यस्मिन्सुरतारंभे निबिडाश्लेषे गाढालिंगने कर्तव्ये पुलकांकुरेण रोमोद्गमेन प्रत्यूहः विघ्नोऽभूत् ॥ व्यवधानकर्तृत्वाद्रोमोद्गमस्य यस्मिन्सुरतारंभे क्रीडाकूतविलोकिते क्रीडासु अभिप्रायपूर्वकं यद्विलोकितं तस्मिन् कर्तव्ये निमेषेण पक्ष्मचलनेन प्रत्यूहोऽभूत्।यस्मिन्नधरसुधापाने ओष्ठामृतपाने कर्तव्ये कथाकेलिभिः प्रत्यूहोऽभूत्। अपिःसमुच्चये। यस्मिन्मन्मथकलायुद्धे कामकलान्वितसुरतसंग्रामे कर्तव्ये आनंदाधिगमेन आनंदप्राप्त्या प्रत्यूहोऽभूत् प्रीत्या आनंदप्राप्तिः ॥ १

भा०टी० अनंतर भगवानजी निबिड आलिंगनसे प्रियतमा राधा के विरह वाणों को उन्मूलन करने लगे किंतु पुलकांकुर अर्थात् रोमाञ्च उस अलिंगनमें व्याघातको उत्पन्न करताथा! नयन पलक पतन उन्हे प्रिया के मुखकमल दर्शनमें वाञ्छित करताथा, और प्रिया को उपहास उन्हे प्रिया के अधरामृत पानमें निरास करताथा' वस्तुतस्तु इस प्रकारसे रति संग्राम एकान्त प्रबलहो कर जब समाप्तिको प्राप्त होने लगा,तब अनिर्वचनीय आनंदभी उत्पन्नहोने लगा, ॥१ ॥

तदेव विपरीताख्यं डक्तिवैचित्र्येण कथयति—

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः॥ हस्तेनानमितः कचे धरमधुस्यंदेन संमोहितः कांतःकामपि तृप्तिमाप तदहो कामस्य वामागतिः ॥ २॥

सं०टी०दोर्भ्यामिति॥ कांतः कृष्णः कामपि अनिर्वचनीयां तृ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

र्तिं संतोषमाप प्रापत् ॥ कीदृशः कृष्णः दोर्भ्यां हस्ताभ्यां संयमितः बद्धः अर्थान्नायिकायाः ॥ पुनः कीदृशः पयोधरभरेण स्तनभरेण पीडितः पाणिजैर्नखैराविद्धः खंडितः दशनैर्दंतैः क्षतमधरपुटं यस्य सः ॥ पुनः कीदृशः श्रोणीतटेन कटिप्रदेशेनाहतस्ताडितः कचे केशवंधे हस्तेन आनमितःनम्री कृतः ॥ पुनः कीदृशः अधरमधुस्यंदेन अधरामृतरसेन संमोहितः ॥ यत्क्रोधजनकं तदेवातिसंतोषकारकमत एव कामस्य मदनस्य वामा विपरीतैव गतिरित्यर्थः २

भा०टी० भगवानजी राधाके हस्तद्वयसे आवद्ध होकर, उन्हके स्तनोंके भारको वहन करके क्रांतहोकर; उन्हके नख और दशनोसे आघातित होकर एवं उन्हके जघनताडन से ताडित होकर किंचित कालके निमित्त कातर नहिहुआ! हाय रे हाय! मदनराग क्याविचित्रहै! राधाराणी भगवान् के केशकलापों को दोनों हस्तोंसें आकर्षण कीथि और उनके अधरसुधापानसे भगवानको मोह भी होगया था तथापि भगवान अति शयसे प्रसन्न होगये थे. ॥ २ ॥

तदेव पुनः कथयति—

मारांके रतिकेलिसंकुलरणारंभे तया साहसप्रा
यं कांतजयाय किंचिदुपरिप्रारंभि यत्संभ्रमा
त्॥निष्पंदा जघनस्थली शिथिलिता दोर्वल्लिरुत्कं
पितं वक्षो मीलितमक्षि पौरुषरसः स्त्रीणांकुतः
सिद्ध्यति॥ ३॥

सं०टी०मारांके इति ॥ मारांके मारांकसंज्ञके रतिकेलिसंकुलरणारंभे सुरतक्रीडातुमुलयुद्धारंभे तया राधया यत्संभ्रमात् क्रांतजयाय कृष्णजयार्थं साहसप्रायं किंचिदुपरि विपरीतरतं प्रारंभि आरब्धं तदैव जघनस्थली निष्पंदा तदा स्तब्धा जाता दोर्वल्लिर्भु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जलता शिथिला जाता वक्षस्थलमपि कंपयुक्तमभूत् ॥ तथा अक्षि नेत्रयुग्मं मीलितमभूत् ॥ अतएवस्त्रोभिरतिसाहसात्प्रारब्धमपिपौरुषंकुतः सिद्ध्येन्नैव सिद्ध्यतीत्यर्थः ॥ ३ ॥

भा॰टी॰ सुरत युद्ध में प्यारे कृष्ण के जीतने के कारण श्रीराधाराणीजी का सुरत जंघादेशमें कांपित हुआ! उनके हस्त शिथिल और नेत्र निमिलीत हुये हैं! परंतु स्त्रीयो की क्या शक्तहै जो पुरुष केसमान पौरुष को धारणकरें॥ ३

तस्याः पाटलपाणिजांकितमुरो निद्राकषाये दृशौ निर्धूताधरशोणिमा विलुलितस्रस्तस्रजो मूर्धजाः ॥कांचीदाम दरश्लथांचलमिति प्रातर्निखातैर्दृशो रेभिः कामशरैस्तदद्भुतमहो पत्युर्मनः कीलितं ॥ ४ ॥

सं॰टी॰तस्याइति ॥ एभिः पूर्वोक्तैः कामशरैर्यत्पत्युः स्वामिनो मनः कीलितं विद्धं इति एतदद्भुतमाश्चर्यमभूत् ॥ कथंभूतैः कामशरैः प्रातः काले दृशोर्नेत्रयोर्निखातैरारोपितैः ॥ इतीतिकिं तस्या राधायाः उरः पाटलपाणिजैः श्वेतरक्तनखैश्चिह्नितं ॥ तस्या निद्राकषाये निद्रालोहिते दृशौ नेत्रे ॥ तस्या निर्धूतः क्षालितः अधरशोणिमा अधरलौहित्यं ॥ तस्या विलुताः स्रस्ताः शिथिलिताः स्रजो माला येभ्यस्ते मूर्द्धजाः केशाः दरं ईषत् श्लथं शिथिलं अंचलं वस्त्रं यस्य तादृशं कांची दाम मेखलागुणः कामशरैः नखक्षतजागरचुंबनकेशाकर्षणनीवीमोचनानि पंचशराः निरूपिताः ॥ अन्यत्र निखातैर्बाणैरन्यत्कीलितमित्याश्चर्यमित्यर्थः ॥ ४ ॥

भा॰टी॰कृष्णजीने अपने हस्तों से श्रीराधाराणीजीका वक्षस्थल पाटल (गोलाब) पुष्पके तुल्य रंजित कियाहै, और निद्रासे राधाराणिके दोनो नेत्र लोहित वर्ण के होरहे है; एवं उनका अधर राग लुप्त होगया है इसी समय में

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीराधाजीके ऐसे सुंदर रूपको देखकर श्रीकृष्णजी के हृदय में कामभोगकी वांच्छा प्रकट होजाति भई ॥ ४ ॥

त्वामप्राप्य मयि स्वयंवरपरा क्षीरोदतीरोदरे
शंके सुंदरि कालकूटमपिबन्मूढो मृडानीपतिः॥
इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्य वामांचलं
राधायाः स्तनकोरकोपरिलसन्नेत्रो हरिः पातु वः

सं०टी०त्वामप्राप्येति ॥ हरिः कृष्णः वः युष्मान् पातु ॥ कीदृशो हरिः राधायाः स्तनौ कोमलत्वापतितत्वादिना गुणेन कोरकाविव तयोरुपरि लसती संबद्धे नेत्रे यस्य ॥ किं कृत्वा वामांचलं हृदयवामदेशलग्नांचलं विक्षिप्य दूरीकृत्य ॥ कीदृश्या राधायाः इत्थं इति पूर्वकथाभिः अन्यमनसः कथादत्तचित्ताया इत्यर्थः कथामेवाह हेसुंदरि क्षीरोदतीरोदरे क्षीरसमुद्रतीरमध्ये मृडानीपतिर्महादेवस्त्वामप्राप्य कालकूटविषमपिबदित्यहं शंके तर्कयामि ॥ यतः मूढः ज्ञानरहितः ॥ कीदृशीं त्वां मयि मन्निमित्तं ॥ निमित्ते सप्तमी ॥ स्वयंवरपरां मदेकपतिकामामित्यर्थः ॥ इत्थं पूर्वकथा ॥ अनेन गौरीपतित्वेपि तवालाभाद्विषमपिबत् इति गौर्या अपि अधिकगुणेतिभावः ॥५॥

भा०टी० श्री कृष्णजी राधाजीको सम्बोधनकर कथन करते लगे, कि हे कमलिनी ? जब तुम समुद्रसे उत्थित होकर मेरेसहित स्वयंवरको प्राप्त हुई है, तव तेरे नहि मिलनेके क्रोधसे शंकर मूढने हलाहल को पानकराथा एतादृश कृष्णजीके वचनको श्रवणकर राधाराणी उसी समयमें किञ्चित अन्य मना हो गई; तव कृष्णजीने राधाके वक्षस्थलाच्छादित वस्तुके अपसारित करके उन्हे कुच युगलोंपरदृष्टिपात किया । वह हरि सकल जीवोंको मंगलके दायक होवे ॥ ५ ॥

१५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtioh by eGangotri

व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ स्पष्टा दष्टाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः॥कांची कांचिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यंती चात्मरूपं तदपि विलुलितं स्रग्धरेयं धिनोति ॥ ६ ॥

सं०टी०व्यालोल इति ॥ इयं राधा तदपि तथापि धिनोति प्रीणयति अर्थात्कृष्णं॥ कीदृशी राधा पाणिना हस्तेन जघनयोः पदं आभोगं सद्यः आच्छाद्य आत्मरूपं पश्यंती विलुलितां म्लानां स्रजं धारयतीति ॥ आत्मरूपमेवाह ॥ केशपाशो व्यालोलः इतस्ततो विक्षिप्तोऽभूत् ॥ अलकैश्चूर्णकुंतलैस्तरलितं स्थानाच्चलितं ॥ कपोलौ स्वेदेन घर्मजलेन लोलौ व्याप्तौ॥दष्टाधरश्रीः खंडिताधरलक्ष्मीः स्पष्टा व्यक्ता॥ कुचकलशरुचा स्तनघटदीप्त्या हारयष्टिः मुक्ताकलापः हारिता दूरीकृता ॥ कांची रशना कांचिदाशां दिशं गता चलिता ॥ यद्यपीति सर्वत्र योजनीयं ॥ स्रग्धरानामकं छंदश्चेदम् ॥ ६ ॥

भा०टी० श्रीराधाराणीजीके केशपाशके शिथिल होनेके कारण उनके ललाटका तिलकभि लुप्त होगया है उनके कपोलसें श्रमवारि अनवरत निकलता है और दंतघातसे उनका अधरराग क्षीणताको प्राप्त होगया है स्तनोंके उपर जो हार शोभायमान था वह और नितंबभागमें जो मेखला दोदुल्यमानथी वहभी शिथिल होगई और कुसुमाभरणभी विदलित हो गया श्रीराधाजीने लज्जित होकर अपने दोनोहि स्तनोको एवं जघनोको हस्तोसें आच्छादन कर लिया, एतादृश राधाकी व्यवस्थाको देखकर कृष्णजी अपने मनमें कथन करने लगे कि राधाराणी मुझे कामभोगमें आकर्षण कर रही है ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ईषन्मीलितदृष्टि मुग्धहसितं सीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौताधरम्॥ श्वासोत्कंपिपयोधरोपरि परिष्वंगात्कुरंगीदृशो हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननम्॥७॥

सं॰टी॰ईषदिति॥ कुरंगीदृशो हरिणनयनायाः आननं मुखं धन्यो भाग्यवान् जनो धयति पिबति॥ कीदृश्याः कुरंगीदृशः श्वासेन कामजनितेन खरपवनेन उत्कंपितौ किंचिच्चलितौपयोधरौ स्तनौ तयोरुपरि परिष्वंगादालिंगनात् यः हर्षोत्कर्षः हर्षाधिक्यं तेन विमुक्ता त्यक्ता सालसा अतएव निःसहा कार्याक्षमा तनुः शरीरं यस्याः परिष्वंगं कृत्वा धन्यो धयति पिबतीति भावः॥ कीदृशमाननं ईषन्मीलितदृष्टि मुकुलितनयनं मुग्धं सुंदरं हसितं हास्यं यस्मिन्॥ पुनः कीदृशं सीत्कारधारावशात् कामविकारपरंपरावशात् अव्यक्ता आकुला या केलिस्तस्यां यः काकुः शोकभीत्यादिभिः ध्वनिविशेषस्तेन विकसंतः प्रकटीभवंतो ये दंता दशनास्तेषामंशुभिः किरणैर्धौतः क्षालितः अधरो यस्मिन्॥७॥

भा॰टी॰राधाजीके दोनो पयोधर जब निबीड निश्वाससें उन्नत होतेथे तब कृष्णचंद्र वे स्तनोको आलिंगन कियाथा। एवं राधाजीका अंग जब सुखप्रवाहसे एकांत अवश होनेलगा तब कृष्णचंद्र उनके मुखको वारंवार चुंबन करने लगे। उसीसमयमें राधाजीकी मुखके श्री अति सुंदर शोभासे पूर्णित हो रहीथी क्योंकि, उनके दोनो नेत्र उन्मीलित हुएथे. उनके कपोल आनंदसे पूर्ण हुए थ कामक्रीडाके कारण बहुतश्रांतिसे उनका दंत प्रकाशित हाकरे अधरको शोभायमान किया था, और राधाराणी चंचलनेत्रोंसे वारंवार दर्श-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न कररहिथी कृष्णजी अभि श्रीराधाराणीका ऐसा आनंदपूर्ण मुखचंद्रमाको अमृतपान कर उन्मत्तताको प्राप्त होगया है ॥ ७ ॥

अथ सा निर्गताबाधा राधा स्वाधीनभर्तृका ॥
निजगाद रतिक्लांतं कांतं मंडनवांछया ॥ ८ ॥ इ
ति च सहसाप्रीतं सुरतांते मानितातिखिन्नांगी ॥
राधा जगाद सादरमिदमानंदेन गोविंदं ॥ ९ ॥

सं०टी०अथेति । अथानंतरं राधा सुरतांते आनंदेन गोविंदं कृष्णमिदं वक्ष्यमाणं सादरं निजगाद । कीदृशी सहसा ईषद्धास्ययुक्ता निर्गता आसमंताद्भावेन बाधा कामपीडा यस्याः सा सुखेनाधीनः भर्ता प्रियो यस्याः सा। किमर्थं निजाशादेत्यत आह मण्डनवांछया प्रियकर्तृकालंकरणवांछयेत्यर्थः । तस्याः स्वाधीनभर्तृकायाः लक्षणं भरतशास्त्रे उक्तं "क्षणं कराहतेनैव क्षणं चरणपातिते । कन्दुकेनेव कांतेन क्रीडेत्स्वाधीनभर्तृका„ कथंभूतं कृष्ण कांतं प्रियं कमनीयं सुन्दरं । पुनः कादृशं रतौ सुरते क्लांत परिश्रांतं ॥ ८ ॥ ९ ॥

भा०टी० इस्से पाछे भोगके अंतमे कछु ऽ हास्यसे युक्त कामकी पीडासे रहित हुई सुखसे जिसके स्वाधीन भर्त्ता होरहा मानीहुई ऐसी श्री राधाराणी प्रिय कारक आभूषणोंकी वांछा करक आनंदसे श्रीकृष्णके प्रति आदरसे ॥ काम भोमके अंतमें अति दानतासे शिथिल अंग ऐसी श्रीराधाराणी जी नितांत क्लान्त भये हुए श्रीकृष्णचद्रजा के प्रति आनंद से कथन करने लगि ॥ ७ ॥

यद्राधा निजगाद तदेव गीतेनाह—

अथ चतुर्विंशतितमः प्रबंधो रामकरीरागेण यतितालेगीयते

कुरु यदुनंदन चंदनशिशिरतरेण करेणपयोध

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रे ॥ मृगमदपत्रकमत्र मनोभवमंगलकलशसहो
दरे ॥ १ ॥ निजगाद सा यदुनंदन क्रीडति हृद
यानंदने ॥ ध्रु० ॥

सं०टी०कुर्विति । रामकरीरागः। हृदयानन्दने चित्तहर्षके यदुनन्दने कृष्णे क्रीडति सति सा राधा निजगाद उक्तवती । किंनिजगादेत्यत आह हे यदुनन्दन कृष्ण त्व मम अत्रास्मिन्पयोधरे करेण स्वहस्तेन मृगमदपत्रकं कस्तूरिकापत्रावलींकुरु। कीदृशेन करेण चन्दनवच्छिशिरेण अतिशीतलेन । कीदृशे पयोधरे मनोभवस्य कामस्य मंगलाय कलशः पूर्णकुम्भस्तस्य सहोदरे तुल्ये मंगलं हिरण्यमिति वा ॥ १ ॥

भा०टी०श्रीराधाराणीजी कथन करने लगी, कि हे यदुनंदन यदि पुनर्वार तुम कामदेवकी प्रीतिका विधान करनेकी इच्छा करते हो, तव कामदेवका मङ्गल कलशरूपी कुचोंको चंदन से लिप्त करके उनका कस्तूरीसे चर्चित करो॥ १

अलिकुलगंजनसंजनकं रतिनायकसायकमो
चने ॥ त्वदधरचुंबनलंबितकज्जलमुज्ज्वलय प्रि
यलोचने ॥ २ ॥

सं०टी०अलीति । हे प्रिय कृष्ण त्वं लोचने मदीये नेत्रे त्वदधराभ्यां चुम्बनेन लम्बितं गलितं कज्जलं उज्ज्वलय पुनरुद्दीपय। कीदृशं कज्जलं अलिकुलस्य भ्रमरसंघस्य गंजनमभिभवं संजनयतीति संजनकं विधायकं। कीदृशे लोचने रतिनायकस्य कामस्य सायकान् मोचयाति तस्मिन्। नयनकटाक्षप्रत्यंचिकमासाद्य कामो वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

णान् मोचयतीति भावः । एतत्प्रेरणाय कामबाणं मुंचतीत्यर्थः ॥२॥

भा०टी० हे यदु नंदन! मेरे कन्दर्प शर विक्षेपकारी नयनों को भ्रमर निन्दित कज्जल को समुज्वालित करो क्यों कि मेरे अधरके चुंबनसे वह कज्जल गलित हुआ है ॥ २ ॥

नयनकुरंगतरंगविलासनिरोधकरे श्रुतिमंडले॥
मनसिजपाशविलासधरे शुभवेष निवेशय कुंडले ॥ ३ ॥

सं०टी०नयनोत ॥ हे शुभवेष रुचिरालंकार कृष्ण त्वं मम श्रुतिमण्डले कर्णप्रदेश कुण्डले निवेशय कुण्डलयुग्मं स्थापय ॥ कीदृशे श्रुतिमण्डले नयने एव कुरंगो मृगस्तस्य तरंगविलासस्य उत्फालगमनस्य निरोधं निषेधं करोतीति तथा ॥ पुनः कीदृशे मनसिजस्य कामस्य यः पाशस्तस्य विलासं सादृश्यं लीलां धारयतीति । पाशः पशुगमननिरोधको भवतीति ॥ ३ ॥

भा०टी० हे मनोहर वेषधारी तुमारे कुरंग सदृश चपल नेत्रोंकी चापल्यावनाशक मेरे जो श्रुतियुगल है, और जो श्रुति युगल मन्मथ की पाशके सदृश है, उसमें कुण्डल द्वय सन्निवेशित करो ॥ ३ ॥

भ्रमरचयं रचयंतमुपरि रुचिरं सुचिरं मम सन्मुखे॥ जितकमले विमल परिकर्मय नर्मजनकमलक मुख॥ ४॥

स०टी०भ्रमरात ॥ हे कृष्ण मम सन्मुखे सुन्दरमुखे अलकं केशपाशं परिकर्मय प्रसाधय मण्डयेत्यर्थः ॥ कीदृशमलकं उपरि मुखेपरि सुचिरं बहुकालं व्याप्य रुचिरं भ्रमरसमूहं रचयंतं कारयंतं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वजातीयबुद्ध्या भ्रमरस्तत्र पततीति भावः यद्वा मुखं कमलस्थानीयं कमले भ्रमरास्तिष्ठंति तद्वत् ॥ कीदृशे मुखे जितं कमलं येन तादृशे विमले निर्मले॥कीदृशमलकं नर्म्मजनकं क्रीडाकारकं ॥४॥

भा०टी० हे यदुनंदन आप मेरे कमल विजित आननमें क्रीडा शील भ्रमर के तुल्य अलकावलियों को चित्र करो ॥ ४ ॥

मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे ॥ विहितकलंककलं कमलानन विश्रमितश्रमसाकर ॥ ५ ॥

सं०टी०मृगमदेति ॥ हे कमलनयन कृष्ण त्वं अलिकरजनीकरे ललाटचन्द्रे तिलकं कुरु ॥ कीदृशं मृगमदरसेन वलितं निर्मितं अतएव ललितं मनोहरं ॥ पुनः कीदृशं विहिता कृता कलंकस्यांकस्य कला षोडशभागो यत्र ॥ अथवा कला शोभा यत्र ॥ द्वितीयाचन्द्रप्रायं तिलकं कुर्वित्यर्थः ॥ कथंभूतेऽलिकरजनीकरे विश्रमिताः श्रमसीकराः उपशांताः प्रयासजलकणा यत्र ॥ एतेन चंद्रोपि प्रकटलांछनछविर्दृश्यत इति ॥ ५ ॥

भा०टी०हे राजीववदन मेरे अर्द्धचन्द्रसमान ललाट से जोपर स्वेद निकलताहै, उनको दूर करके ललाटपर कस्तूरीके तिलकको रचना करो ॥५

मम रुचिरे चिकुरे कुरु मानद मनसिज ध्वजचामरे ॥ रतिगलिते ललिते कुसुमानि शिखंडिशिखंडकडामरे ॥ ६ ॥

सं०टी०ममेति ॥ हे मानद मानखण्डन मानदायक वा मम रुचिरे सुन्दरे चिकुरे ॥ जात्येकवचनं ॥ कुसुमानि पुष्पाणि कुरु रचये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्यर्थः ॥ कीदृशे चिकुरे मनसिजस्य कामस्य ध्वजचामरतुल्ये ॥ पुनः कीदृशे रतिगलिते सुरतसमये मुक्तबंधने॥ पुनः कीदृशे ललिते शृंगारचेष्टया युक्ते ॥ पुनः कीदृशे शिखंडिनो मयूरस्यशिखण्डकस्येव पिच्छस्येव डामरे आटोपे आडंबरमित्यर्थः यस्य ॥ ६ ॥

भा०टी०हे यदुनंदन कामदेवके रथस्थ पताका संयुक्त चामरके सदृश मेरा केशकलाप अनंगसमरमें शिथिल होगया है; वे केशकलाप मयूर पिच्छ के तुल्य है; आप उनमे कुसुमों को विन्यास करो ॥ ६ ॥

सरसघने जघने मम शंबरदारणवारणकंदरे॥
मणिरशनावसनाभरणानि शुभाशय वासय सुंदरे ॥७॥

सं०टी०सरसेति॥ हे शुभाशय महोदारचित्त त्वं मम सुंदरे जघने मणिरशना मणियुक्तघंटिकावसनानि वस्त्राणि आभरणानि अलंकरणानि वासय परिधानं कारय ॥ कीदृशे जघने सरसः कामजनकः घनो निबिडश्च पश्चात्कर्मधारयः॥ पुनः कीदृशे शंबरदारणः कामः स एव वारणः कुंजरस्तस्य कंदरे वासस्थाने॥७॥

भा०टी०हे शुभाकांक्षी मेरे दोनो जघन अतीव निबिड एवं रसाल है, और वे जघन कामरूपी दन्तिके गुफाके सदृश है, आप उन्हे मणिमय तडागीसे और वसनोंसे भूषित करो ॥ ७ ॥

श्रीजयदेववचसिशुभदे हृदयं सदयं कुरुमंडने॥ हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखंडने॥ ८॥

इति श्री गीतगोविंदे चतुर्विंशतितमः प्रबंधः॥२४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी० श्रीजयदेवेति। हे भक्तजन त्वं मण्डने अलंकारभूते शुभदे कल्याणप्रदे श्रीजयदेववचसि गीतरूपे हृदयं मनः सदयं दयायुक्तं तत्परं कुर्वित्यर्थः। कीदृशे वचसि हरिचरणस्मरणामृतेन निर्मितं कृतं कलिकलुषज्वरस्य कलिकृतपापरूपज्वरस्य खण्डनं नाशो येन॥ ८॥

भा०टी० श्रीमान् जयदेवस्वामी जी कहते है, कि मेरा हृदय निरन्तर हरिके चरणामृत से सिंचित होकर और कलियुगके पापरूपी ज्वरों से निर्मुक्त होयके नित्यही शोभायमान रहै॥ ८॥

रचय कुचयोःपत्रं चित्रं कुरुष्व कपोलयोर्घटय
जघने कांचीमंच स्रजा कबरीभरं॥ कलय वल
यश्रेणीं पाणौ पदे कुरु नूपुराविति निगदितः प्री
तः पीतांबरोपि तथाकरोत्॥ १॥

सं०टी०रचयेति। इति राधया निगदितः उक्तः प्रीतः संतुष्टः पीतांबरोपि तथाऽकरोत्। इति किं हे कृष्ण ममकुचयोः स्तनयोश्चित्रं चित्रविशेषं रचय। कपोलयोः पत्रं पत्रावलीं करेण रचय कुरुष्व। जघने कांचीं क्षुद्रघंटिकां घटय अर्पय। स्रजा पुष्पमालया कबरीभारं केशपाशं अंच पूजय बन्धनं कुर्वित्यर्थः हस्ते वलयश्रेणीं कंकणपंक्तिं स्थापय॥ पदे चरणयोःनूपुरौ कुरु स्थापय॥ गीतोक्तस्य संक्षेपार्थकथने न दोष उक्तः॥ १॥

भा०टी० राधाराणिने कहा, कि हे यदुनन्दन! तुम मेरे दोनों स्तनों को कस्तूरी के लेपन सें विचित्रकरो; मेरे कपोल स्थान को तिलकसें और जघनोको तडागी सें शोभायमान करो; और मेरे शिर को भूषित करणें के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लिये पुष्पों के हारो की रचना करो। मेरे हस्तों के कंकणों से एवं पाओंके नूपरों सें शोभित करों। श्रीराधा प्यारी के यह वचन को श्रवण करके श्रीमाधवजीने अपने हृदयमें आनंदित हो कर उसके नियोगोंको संपादन किया ॥ १ ॥

पर्यंकीकृतनागनायकफणाश्रेणीमणीनां गणे
संक्रांतप्रतिबिंबसंकलनया बिभ्रद्वपुर्विक्रियाम् ॥
पादांभोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः श
तैःकायव्यूहमिवाचरन्नपचिताकूतो हरिःपातुवः२॥

सं॰टी॰ पर्यंकीकृतेति॥ उपचितं समृद्धं आकूतं कामभावो यस्य स हरिः कृष्णः वः युष्मान् पातु ॥ कीदृशो हरिः वपुर्विक्रियां देहविक्रियां शरीरपरामित्यर्थः बिभ्रद्धारयन्॥किं कुर्वन् पर्यंकीकृतः शय्यास्थाने कृतो नागनायकः शेषस्तस्य फणाश्रेणी फणासमूहस्तस्य मणयस्तेषां गणे समूहे संक्रांतं संबद्धं तत्प्रतिकृतिस्तस्य संकलनया अन्वयेनास्थित इत्यर्थः कायव्यूहमिव बहुशरीरतामिवाचरन् कुर्वन् ॥ किमिति कायव्यूह इत्यत आह ॥ पुनः कीदृशः पादांभोरुहं श्रीकृष्णचरणकमलं धारयतीति धारिणी या वारिधिसुता लक्ष्मीस्तां अक्ष्णां शतैर्नेत्रसहस्रैर्दिदृक्षुः द्रष्टुमिच्छुः लक्ष्मीदर्शनं नेत्रद्वयेन तथा न संभवतीति कायव्यूहेन नेत्रबाहुल्यात् ॥ २ ॥

भा॰टी॰ श्रीमान् जयदेव स्वामी जी कहते है कि जो नारायणजी के चरण कमलों को शेषनागजी अपने माणि दीप्त फणों में शोभायमान करते है, और जो नारायणजी समुद्र-कन्या लक्ष्मी की दर्शन के लिये एकान्त चित्त है वह नारायणजी सकलजीवों की रक्षा को करें ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यद्गांधर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं यच्छृंगारविवेकतत्त्वरचना काव्येषु लीलायितम् ॥ तत्सर्वं जयदेवपंडितकवेः कृष्णैकतानात्मनः सानंदा परिशोधयंतु सुधियः श्रीगीतगोविंदतः ॥ ३ ॥

सं०टी०यद्गांधर्वेति ॥ यत् जयदेवकवेः गांधर्वकलासु गानविद्यासु कौशलं पटुत्वं प्रावीण्यमित्यर्थः ॥ अस्तीत्यध्याहारः ॥ यद्वैष्णवं विष्णोरनुध्यानमस्ति तथा शृंगाररसस्य यो विवेकः संभोगविप्रलंभादिरूपेण यद्विवेचनं तस्य तत्त्वं अर्थज्ञानं तत्तद्युक्तेषु काव्येषु रचनाया लीलायितं क्रीडाविलाससर्वस्वं। यद्वा लीलायितं शृंगारादिरसविभावनमस्ति तत्सर्वं जयदेवपंडितकवेः श्रीगीतगोविंदतः गीतगोविंदग्रंथात् सुधियः परिशोधयंतु विवेकिनः विचारयंतु सर्वतो भावेन शुद्धं कुर्वंत्वित्यर्थः। कीदृशस्य जयदेवपंडितकवेः कृष्णैकतानात्मतः कृष्णपरायणस्येत्यर्थः । जयदेवः पंडितः शास्त्राध्यापकः कविः काव्य कर्त्ताचेति जयदेवपंडितकवेः । श्रीशब्दस्तु ग्रथांतेमंगलार्थः ॥ ३ ॥

भा०टी० श्रीमान् जयदेव स्वामीजी कथन करते है, कि हे पण्डितगण नृत्यगीतादि गन्धर्व विद्याओंको और वैष्णव लोगोंको शृंगार विवेक तत्वको अनुध्यान करने के लिये यहि गीतगोविंद महाकाव्यको निरन्तर पाठ एवं चिंतन करो; क्यों कि रसमें ये समतत्व अच्छि तऱ्हासे वर्तितहै ॥ ३ ॥

श्रीभोजदेवप्रभवस्य राधादेवीसुतश्रीजयदेवकस्य ॥ पराशरादिप्रियवर्गकंठे श्रीगीतगोविंदकवित्वमस्तु ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं०टी०श्रीभोजदेवेति। पराशरादयः कविश्रेष्ठास्तेषां प्रियो वर्गो गोष्ठी तस्य कंठे गलदेशे अस्तु। तस्य श्रीगीतगोविंदकवित्वं भोजदेवप्रभवस्य भोजदेवोत्पन्नस्य तथा राधादेव्याः सुतस्येत्यनेन स्वपितृप्रतिपादनेन मंगलमाचरितं। निजग्रंथे आशीरपि दत्तेति राधास्मरणात् आनंदयुक्तता द्योतिता ॥ ४ ॥

भा०टी० श्री भोज देवसे राधादेविके उदरमें जो जयदेव स्वामी जी आविर्भूत हुआ है, वहि जयदेवस्वामीविरचित गीतगोविंद काव्य उन्हका प्रिय बन्धु पराशरादि महात्माजनो के कण्ठ देशमे निरन्तर स्थितिको करे ॥ ४ ॥

साध्वी माध्वीक चिंता न भवति भवतः शर्करे
कर्कशासि द्राक्षे द्रक्ष्यंति के त्वाममृत मृतमसि
क्षीर नीरं रसस्ते ॥ माकंद क्रंद कांताधर धरणि
तलं गच्छ यच्छंति भावं यावच्छृंगारसारस्वत
मिह जयदेवस्य विष्वग्वचांसि ॥ ५ ॥

सं०टी०साध्वीति। विष्वक् सर्वतः यावच्छृंगारसारस्वतं भावं जयदेवस्य वचांसि यच्छंति तावत् हे माध्वीक मधो भवतस्तव मधुरमहमिति चिंता साध्वी न भवति। हे द्राक्षे त्वां के द्रक्ष्यंत्यास्वादयंति। अमृत मृतमसि। हे क्षीर नीरं रसस्ते। हे माकंद क्रंद आक्रोशं कुरु। किंच हे कांताधर त्वं पातालं गच्छ। श्रीजयदेवकाव्यमधुराख्यभगवद्रसास्वादनिर्वृताजनास्तदेकनिष्ठाः संतः एतेषां तिरस्कारं करिष्यंतीति भावः ॥ ५ ॥

भा०टी०श्री महाकवि जयदेव स्वामी का यह हरिगुण गायन यावत् जगत में रहेगा, तावत् मधु अमधुर शक्कर कंकर, अंगूर रसहीन, अमृत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृतप्राय, और क्षीर स्वाद विहीन होवेंगे। हे आम्र तुम रोदन करो ! हे कामिनीयोंको अधर ! तुम पृथ्वीके अभ्यन्तरमें गमनं करो ॥ ५ ॥

लक्ष्मीदासतनूजेन भीषदासेन धीमता ॥ कारिता गीतगोविंदटीकेयं सुखदास्तु वः ॥ १ ॥ भीषदासनियुक्तेन कृष्णपत्यात्मसेविना। नारायणेन सुकृतं गीतगोविंदटिप्पणम् ॥ २ ॥ टीप्पणें चेन्मदीये वै स्खलितं स्यात्प्रमादतः ॥ न कर्तव्यो ममाक्षेपो गंतुर्हि स्खलितं भवेत् ॥ ३ ॥

इति श्रीकविराजश्रीजयदेवपंडितकृतौ गीतगोविंदे महाकाव्ये प्रीतपीतांबरो नाम सटीको द्वादशः सर्गः १२

इति गीतगोविंदं काव्यं सटीकं भाषाटीकासहितम्

समाप्तम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीः ।

राधाविनोदकाव्यम्

सटीकम्

—०:।:०—

श्रीगणेशाय नमः ॥ श्रीराधाकृष्णाभ्यां नमः ॥ पितृवचनमव इयमेव पाल्यं जगति जनानिति शासितुं वनांतं । गतमतिकरुणारसार्द्रचित्तं रघुपतिमेवसुपास्महे सदारं ॥ १ ॥

राधाविनोदाख्यं काव्यं चिकीर्षुर्निर्विघ्नप्रारिप्सितसमाप्तिकामो रामचंद्रकविः परमेश्वरप्रार्थनारूपं मंगलमाचरति ॥

मालीनो घनमालीमालीनो वनमाली ॥ मा-
लीनो बलमाली मालीनोऽवतु माली ॥ १ ॥

सं॰टी॰ वनमाली वनमाला आपादलंबिनी माला तद्वान्विष्णुः। 'आपादलंबिनीं मालां वनमालां विदुर्बुधा' इत्यभिधानात्॥ नोस्मान् ग्रंथकर्तॄन् श्रोतॄन्वा अवतु रक्षतु। कीदृशः मालीनः मा लक्ष्मीः। 'मातु लक्ष्म्यां च मायायां चे' त्येकाक्षरः। लीना दर्पणइव हृदि लग्ना यस्य सः। यद्वा मायां लीनो लोकपरंपरया कामाद्युत्पादनेन तदासक्त इत्यर्थः एतादृशः। पुनः कीदृशः मालीनः। मायां मायायां अलीनः निरंजननिराकारत्वात्तस्यामसक्तः।पुनः की॰मायां लक्ष्म्यां अलीनः सा तु लीना स तु नोसक्त इत्यर्थः। एकोद,सीनत्वात्। पुनः किंभूतः मां शोभां अलंति व्रजंति ते मालयो यदुगोपादयस्तेषां इनः स्वामी'इनः सूर्ये प्रभौ राज्ञि मृगांके क्षत्रिये नृप' इति विश्वः। यद्वा मालंते शोभंते ते मालिनः इंद्रादयस्तेषां इनः स्वामी ईश्वरेश्वर इत्यर्थः। मालीनः माला पुष्पस्रक् सा यस्य अस्तीति माली सुदामा तस्य इनः स्वामी दारिद्र्यभंजनत्वात्। य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वा मे शिवे आलीनः तदभिन्नत्वात्। यद्वामः वेधाः स एव अलिःक-मलानुषंगित्वात् भृंगौपम्यं तस्यइनः'मः शिवश्चंद्रमा वेधा' इत्येकाक्षरः। पुनः कीदृशः घनमाली घनवत् श्याम इत्यर्थः। पुनः कीदृशः बलमाली बलभद्रेण मालतेसौ बलमाली परसामर्थ्यवान्। पुनः कीदृशः माली माला पुष्पस्रक् सा यस्यास्तीति माली पुष्पस्रग्वानित्यर्थः। यद्वा मा अलीति पदच्छेदः कर्तव्यः। कीदृशः अली अलति सर्वं व्याप्नोतीति अली परमात्मरूपेण सर्वांतर्यामी विश्वव्यापीत्यर्थः। अथवा दशावतारवर्णनमारभते "वनजौ वनजौ खर्वस्त्रिरामी सकृपोकृपः। अवतारा दशैवैते कृष्णस्तु भगवान् स्वयं"। वनमाली वने जले मालते शोभत इति वनमाली 'वने सलिलकानने' इत्यमरः। मत्स्यरूपी विष्णुः नोऽवतु। कीदृशः बलमाली बलेन शंखासुरोन्मूलनकरणेन बलेन मालतेऽसौ। पुनः वनमाली कूर्मरूपी विष्णुः नोऽस्मानवतु। कीदृशः बलमाली सकलभूभारेण निष्पंदफणामंडलानंतोद्वहनकरणेन बलेन मालतेऽसौ। पु० ब० वनेऽरण्ये मालतेऽसौ वराहरूपी विष्णुः नोऽवतु। की० ब० सागरनिमग्नमहीमंडलोद्धरणकरणेन मालते। पुनःवनमाली नृसिंहरूपी विष्णुः नोऽवतु। की० ब० हिरण्यकशिपुसमुच्छेदकरणेन बलेन मालतेऽसौ। पुनःअघनमाली अइव रुद्र इव घनं यथा तथा मालत इति अघनमाली यद्वा अघनं ह्रस्वं माली वामनरूपी विष्णुः नोऽवतु। की० ब० बलेन बलिच्छलनकरणेन मालतेऽसौ। पुनःवनमाली रुद्धस्वर्यानत्वात्तीर्थार्थं वने परिभ्रमन् जामदग्न्यरूपी विष्णुःनोऽवतु। की० ब० सकलक्षत्रियोत्पाटनकरणेन बलेन मालतेऽसौ। पुनःवनमाली दंडकारण्यदेशे रामरूपी विष्णुःनोऽवतु। की० घनमालीघनवत् श्यामः। पुनःकी० ब० पौलस्त्याद्युच्छेदकरणेन बलेन मालतेऽसौ। की० ब० बलरामेतिसराअपदेनमालतेऽसौ बलभद्ररूपो विष्णुः नोऽवतु। कीदृशः बलमाली

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कालिंदीकर्षणेन बलेन मालतेसौ । पु०की० घनमाली शरदंबुदगौरः । पुनःअवनमाली अवनेन रक्षणेन मालतेसौ बुद्धरूपी विष्णुःनोवतु । की०ब० प्राण्यहिंसादिकरणेन बलेन मालतेसौ । पुनः की० बलेन म्लेच्छोच्छेदनकरणेन मालतेसौ कल्किरूपी विष्णुः नोवतु। अथ संमोहनकाममंत्रोद्धारणपक्षमाह । संमोहनकाममंत्रमयरूपो हरिः नोवतु । मंत्रमयत्वं विशिनष्टि मालीनःमा शक्तिः सामान्यस्वरास्तेषु आलीनः ककारः तद्गतत्वेनैवोच्चार्यमाणत्वात् । प्रथमत्यागे कारणाभावादितिन्यायेन ककारो ग्राह्यः। तथा च ककारात्मक इत्यर्थः। घनमाली घनेन मा यस्य सः घनमः इंद्रःतस्य इदं बीजंघनमं तल्लातीति घनमाली तथा च लकारात्मक इत्यर्थः । मालीनः मायाः इदं तस्मिन् ईकारे आलीनः ।पुनः मालीनः मश्चंद्रःआलीनोऽस्मिन् असौ । तदुक्तं शारदातिलके 'ब्रह्मा भूम्यां समासीनः शांतिबिंदुविभूषितः। बीजं मनोभुवः प्रोक्तं जगत्रितयमोहनं ॥ १ ॥

विधूसुहृद्विरहानलपीडिता विधुसुहृत्तरलानिल
पीडिता ॥ विधुसुहृद्दनाऽलिमपीडिता विधुसु
हृत्सुगिराऽकिरदीडिताः ॥ २ ॥

सं०टी०विधुसुहृदिति ॥ विधुसुहृत् विधुः विष्णुः सुहृत् प्रियो यस्याः सा राधिका ॥ " विधुश्चंद्रमसि विष्णौ विधुः कर्पूरकामयोरिति विश्वः ॥ अलिं सखीं प्रति ईडिता स्तुत्याः सुगिरः अकिरत् उवाचेत्यर्थः ॥ कीदृशी विधुसुहृद्विरहानलपीडिता विधुः विष्णुः स एव सुहृत्प्रियस्तस्य विरहो वियोगः स एव अनलः वह्निस्तेन पीडिता ॥ पुनः कीदृशी विधुसुहृत्तरला विधुश्चंद्रस्तस्य सुहृन्मन्मथस्तेन तरला चंचला ॥ चंचलं तरलं चैव पारिप्लवपरिप्लव, इत्यमरः ॥ यद्वा विधुः कर्पूरः तस्य सुहृत् समस्तरलो हारमध्यमणिर्यस्याः सा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तरलः स्यान्मध्यगो मणि' रिति शाश्वतः। कामज्वरान्निस्तेजस्क-मुक्ताइत्यर्थः। पुनः कीदृशी अनिलपीडिता अनिलो मलयानिलः तेन पीडिता। पुनः कीदृशी विधुसुहृद्वदना विधोश्चंद्रस्य सुहृत्समं तुल्यं वदनं यस्याः सा विरहसमयत्वात् चंद्रसाम्यं स्फुटमेव। यद्वा कर्पूरपांडुरवदना। पुनः कीदृशी ईडिता स्तुत्या अपि ईडिता इति पदच्छेदः कर्तव्यः। यद्वा अपीडिता एन कृष्णेन पीडिता अपीडिता कृष्णविरहपीडितेत्यर्थः॥ २॥

उदयते दयते दयते शशी सखिकरैरकरैस्तिमि
राकरैः॥ दिशमिमां चरमां च रमारमं कमल
कोमललोललोचनं॥ ३॥

सं॰टी॰उदयतइति। हे सखि शशी चंद्रः उदयते च परं करैः इमां हस्ते वर्तमानां दिशं दयते प्राप्नोति कृपयतीत्यर्थः।कृपयितृत्वे हेतुमाह कीदृशैः करैः तिमिराकरैः तिमिरस्य अकरैः अकर्तृकैः।यद्वा तिमिरं आसमंतात्किरंति हिंसंतीति तिमिराकरैः तद्गतध्वांतनाशकैरित्यर्थः। चपरं करैः मां दयते पीडयतीत्यर्थः। दयदानगतिहिंसादर्शनेषु भौवादिकः।पीडनत्वमाह कीदृशैः करैः अकरैः अकं दुःखं रांति ददतीति दुःखदैरित्यर्थः। यद्वा कं जलं रांति स्वीकुर्वंतीति कराः न भवंतीति अकरास्तैरुष्णैरित्यर्थः अतस्त्वं रमारमं लक्ष्मीकांतं प्रति चर गच्छ सः रमासक्तोस्ति अतः स नागमिष्यति। कीदृशं रमारमं कमलकोमललोललोचनं लुल्यते तल्लोलं लोलं लोलत्वं लातः ते लोलले कमलं सरोजमिव शृंगीवास इव कोमले मनोहरे लोलले चंचले लोचने यस्य तं। यद्वा कीदृशःशशी अंकमलकः अंकः कलंकःस एव मलो यस्मिन् तदंकमलं कं मूर्धा यस्य सः। एतत्पक्षे कीदृशं रमारमं लक्ष्म्या क्रीडंतं यद्वा चरमां दिशं अंत्यामवस्थां दयते प्राः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पयति। पुनः कीदृशं रमारमं लक्ष्मीरमं यद्वा शशी कमलः के सुखे कमलकः दुःखद इत्यर्थः ॥ ३ ॥

कुमुदबंधुरबंधुरबंधुरः सतनुतेतनुतेतनुतेततः ॥
हिमकरोऽहिमतां हि मतांमतां किमनु मां
सदृशं सदृशं विधोः ॥ ४ ॥

सं०टी०कुमुदबंधुरिति। हेसखि हिमकरः चंद्रः मां अनूद्दिश्य-अहिमतां उष्णतांनुते विस्तारयति हि यत् तत् विधोः सदृशं कुलपरंपरागतं विरहिणीपीडनं उचितं किं। कीदृशं मां मतां मान्यां। पुनः कीदृशीं मां सदृशं सज्ञानां।'दृक्ज्ञाने ज्ञातरि त्रिष्वि' त्यमरः। कीदृशः हिमकरः अबंधुरः अपां अंधुः कूपः तं राति प्राप्नोतीत्यबंधुरःशीतलः'पुंस्येवांधुः प्रहिः कूप' इत्यमरः।पुनः कीदृशःकुमुदबंधुरबंधुः कुमुदानां बंधुरः प्रियो बंधुरित्यर्थः। पुनः कीदृशः अतनुते तनुते ततः अतनुता महत्त्वं तदितः प्राप्तः अतएव नुतां स्तोतृत्वं इतः स एव इति ततः यद्वा अ इति पदच्छेदः हिमकरः शीतहस्तः अः विष्णुः मां अनूद्दिश्य विधोः चंद्रमसः सदृशं समानां अहिमतां उष्णतां परितापं तनोति। की० अः कौ पृथ्व्यां मुत् हर्षो येषां ते कुमुदां जलानां अबंधवः राक्षसादयः तान् राति गृण्हाति इतिकुमुदबंधुरः दुष्टहंता सचासौ बंधुरबंधुः शिष्टसुत्हृदित्यर्थः ॥ ४ ॥

पुनः प्रकारांतरेण चंद्रं निंदति—

कमलिनीमलिनामलिनाऽ लिनाविचलता चल
तासु लताशुभाम् ॥ विधुतभां विधुतां विधुभानु
भिर्नयनयोरनयोर्नयसीनयोः ॥ ५ ॥

सं०टी० कमलिनीति। हे अलि त्वं इमां कमलिनीं ईनयोर्दीर्घयोः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनयोः नयनयोः नानयसि नापास्यसि । कीदृशीं मलिनालताासु विचलतालिना विधुतां त्यक्तां । पुनः की० लताशुभांलताश्रेष्ठां । पु० चंद्ररश्मिभिर्विधुतभां त्यक्तकांतिं यथा केनचित्पुंसा करस्पृष्टां कांचित्प्रोषितभर्तृकां त्यजति ॥ यद्वा मली कृष्णः गोपीविहारत्वा-दित्यर्थः ॥ मलिना कृष्णेन विधुतां त्यक्तां लताशुभां गोपीश्रेष्ठां तनुत्वाल्लतासाम्यं विधुभानुभिः विधुतभां दुःखीकृतां मां पश्यसि अतः कृष्णानयनाय गच्छेत्यर्थः ॥ ५ ॥

पुनः भंग्यंतरेणं चंद्रं निंदति—

सखि विभाति विभाऽतिविभाऽविभा न सरसी
सरसारससारसैः ॥ अलिकुलैर्विधुना विधुता धु
ता विनमदब्जमुखी विमुखी स्थिता ॥ ३ ॥

सं०टी०सखीति ॥ हेसखि विधुनेंदुना विधुता मुकुलितपंकेरुहा कृता अतएव अलिकुलैः शिलीमुखवृंदैः सरसारससारसैः सरसं सविलासमारसंति शब्दं कुर्वंति ते सरसारसाः सारसाः तैश्चतैश्च धुता त्यक्ता अत एव अतिविभा विभिः पक्षिभिः यत्कांतिः तस्या अतिक्रांता अत एव विभा गतकांतिः अविभा कृष्णकांतसदृशी विनमदब्जमुखी विनमंति अब्जमुखानि यस्याः सा अत एव विमुखी पराङ्मुखी स्थिता सरसी न विभाति ॥ एतादृशीं दृष्ट्वा दुःखातिशयं प्राप्नोति अतः कृष्णमानयेत्यर्थः ॥ ६ ॥

पुनः भंग्यंतरेण चंद्रं निंदति—

कुमुदिनीदयितो दयितोनतां निजकरैरकरैर्दह
ति स्फुटं ॥ यदयमेकपदेविपदे ऽभवद्विकचपु
ष्करिणीहरिणीदृशः ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं॰टी॰कुमुदिनीति॥ हे सखि कुमुदिनीदयितः चंद्रः अकरैःअकं दुःखं राति ददतिते अकारास्तैर्दुःखदैरित्यर्थः॥ निजकरैः स्वकिरणैः दयितोनतां दयितेन भर्त्रा ऊनतां स्वामिशून्यां विरहिणीमित्यर्थः॥ स्फुटं अत्यर्थं यथा तथा दहति तापयति पीडयतीत्यर्थः॥ अथ दृष्टांतमाह कुतः यतो यतः कारणात् अयं चंद्रः विकचपुष्करिणी प्रफुल्लपद्मिनी सैव हरणीदृक् कांता तस्याः विपदे विपत्तये एकपदे तत्क्षणे क्षणमात्रं अभवज्जातः॥ ७॥

विधुरिता धुरिता धुरिता दहन् विधुरयं जनितो
जनितोऽकभृत् ॥ इह तदाक्षिगतेऽक्षिगतेऽब्जि
नी रविमतिर्विमतिर्निमिमील सा ॥ ८ ॥

सं॰टी॰विधुरिति॥धुरि प्रथमतः विधुरिताःविरहिण्यःताःप्रसिद्धाः वनिताः दहन् तापयन् अयं विधुः विध्यति विरहिणमिति विधुः चन्द्रः जनितः जन्मतः अंकभृत् जनितः जातः संभूतः न हन्याद्द्विपदं प्राप्तं कातरं वा प्रतिक्षतमिति भावः॥ कीदृशाः धुरिताः धुरं मुख्यत्वं इताःप्राप्ताः॥ अतः दृष्टांतमाह कुतः यतः हेतोः क्षिगते क्षि क्षीण त्वं गतः क्षिगतः तस्मिन्॥ नामैकदेशग्रहणे नामग्रहणमिति न्यायात् क्षीणत्वं गत इत्यर्थः इह चन्द्रमसि अक्षिगते सति दृक्प्राप्ते सति रविमतिः सूर्यसक्ता विमतिः विवृद्धबुद्धिः चन्द्रमसीति भावः॥ अब्जिनी पद्मिनोनि मिमील मुकुलिता बभूव॥ सकलंकिनि दृष्टे सति नेत्रोन्मीलने रविदर्शनं कुर्यादिति भावः॥ ८॥

मलयपन्नगपन्नगमंडलीकवलितोवलितो नु व
नानिलः॥ अदयमंगमदंग मदंगकं दहति यद्
भ्रमयन् भ्रमयन्नयम् ॥ ९ ॥

सं॰टी॰मलयपन्नगेति। हे आलि वलितः आगतः वनानिलः व

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नवायुः मलयस्य पदः प्रांतपर्वताः 'पादाः प्रत्यंतपर्वता' इत्यमरः॥ तेषु नगाः वृक्षाः तेषु पन्नगाः सर्पाः तेषां मंडली आलिः तया कवलितः पीतः नु वितर्के 'नुपृच्छायां वितर्के चे' त्यमरः॥कुतः अंग अलि हे आलि'अथ संबोधनार्थकाः'॥ 'स्युः प्याट् पाडंग हे है भो' रित्यमरः ॥ यत् यतः कारणात् भ्रमयन् भ्रांतिं कारयन् अंगमत् अंगानि मथ्नातीति अंगमदंगमथकः अयं वायुः भ्रमयत् भ्रमं प्राप्तं मदंगकं ह्स्वशरीरं सयौवनमित्यर्थः । अदयं दयारहितं यथा तथा दहति तापयति। अन्यथा कथं पीडयतीत्यर्थः॥ ९ ॥

अयि रसालवनी नवनीरनीरनवनी नवनी पव
नीवती ॥ अलिकुलालिकुलाऽलिकुलाकुला प्र
तिहिमामहिमामहिमाहिमा ॥ १० ॥

सं॰टी॰अयीति । नवनी नवीनत्वं प्राप्ता। नवा नूतना ये नीपाः कदंबास्तेषां वनी वनं तद्वती सकिसलयकदंबयुक्ता इत्यर्थः । अत एवानवनी अरक्षका मत्पीडनतत्परा इत्यर्थः। अलिकुलालिकुला अलीनां कुः स्थानं अभ्रमित्यर्थः तं लांति स्वीकुर्वंति ते कोकिलास्तेषां आलिस्तस्याः कुलं गृहं यस्यां कोकिलासक्तेत्यर्थः । 'कुलं कुले गणे गेहे देहे जनपदेपिचे' त्यभिधानम् । अलिकुलाकुला अलिवृन्दासक्ता अत एवाहिमा अहेः सर्पस्य मा इव मा यस्याः सर्पवत् भयानका व्यथका चेत्यर्थः। हिमा शीतला रसालवनी सहकारवनं स्वार्थे ङीप्। अहिमां उष्णा तद्विरहवतीं मां प्रति रनीः रः अग्निः तन्नयति सा अस्ति हि अनलतापजननीत्यर्थः॥ १० ॥

बकुलमाकुलमालि परागितं मधुपरागपरागप
रालिभिः॥ विशदशारदशारदशारदं शशकलं
ककलं ककलंकितम्॥ ११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सं॰टी बकुलमिति। हे आलि तद्बकुलं बकुलपुष्पं दृश्यते। की॰ परागितं संजातकिंजल्कं। पुनः कीदृशं मधुपरागान् पिबंति ते मधुपरागपा अत एव रागपराः स्नेहगायनपरास्ते च ते अलयश्च तैराकुलं व्याप्तं। पुनः कीदृशं विगतं शं सुखं यस्याः सा विशा अ सुखा सा दशा येषां ते विशदशा विरहिणीजनास्तान् आरदति पीडयति तत्तच्च शं अराति स शारा दशावस्था येषां ते ह्ययासुखं भुंजानास्तेषां अ आत्यंतं रं अनलं तापं द्यति खण्डयति एवंविधं वियोगिनामसुखदं सुखप्राप्तानां तापखण्डनमित्यर्थः। पुनः कीदृशं शशकलंककलं शशकलंकश्चन्द्रः तस्य कलाकांतिरिव कांतिर्यस्य तच्चंद्रसदृक्षं व्यापकमिति भावः। पुनः कीदृशं ककलंकितं केनवायुना कलंकितं कंपितम् ॥ ११ ॥

नवमशोकमशोकमशोकदे सुरभितारभितालि
रतारतम् ॥ सखि समाश्रयमाश्रयमाश्रयःकम
लिनीमलिनीप इवाऽऽगतः ॥ १२ ॥

सं॰टी॰ नवमशोकमिति।हे अशोकदे शोकं द्यति साशोकदा न शोकदा अशोकदा तस्याः संबोधने हे अशोकदे हे अदुःखदे त्वं नवं अशोकं अशोकनामानं वृक्षं आश्रय। की॰ अशोकं शोकरहितं पु॰ की॰ सुरभितारभितालिरतारतं सुरभितया सुगंधितया रभिता अनन्यशोभाः संजाताः पुष्परागरंजिता इत्यर्थः। ते च ते अलयश्च तेषां रतं रतिसुखं तस्मिन्नारतं आश्रितं भ्रमराणां सुखमस्ति अतस्ते दुःखं हरिष्यंतीत्यर्थः। पु॰की॰ माश्रयं मायाः शोभायाः आश्रयं स्थानं अतो हे सखि सः माश्रयः लक्ष्मीपतिः आगत एवेति अवेहि। क इव यथा अलिनीपः भ्रमरिणीपतिः कमलिनीं प्रति आगच्छाति तथा हरिर्लक्ष्मीं भुक्त्वा त्वां प्रत्यागत एवेतिजानीहीत्यर्थः ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सखि हिताऽसिमताऽसि मतात्थमां नवमशोक
मशोकमशोकदाम् ॥ तदिहमामवमामव माम
मां व्रज हरिं नवनीरद नीरदम् ॥ १३ ॥

सं॰टी॰ सखीति । हे सखि त्वं हिता पूर्वं प्रिया अधुना त्वं असि मता असेरिव मतं अभिप्रायो यस्याः असिवत्पीडाकर्त्रीत्यर्थः । मताऽसि मान्यासि । कुतः यतः त्वं मां नवं अशोकं आत्थ ब्रूषे । की॰ अशोकं अस्य विष्णोः शोको यस्मादसौ तं तद्दर्शनादधिकदुःखदमित्यर्थः । की॰ मां अशोकदां अस्य विष्णोः शोकं दुःखं ददातीत्यात्मना अशोकदा तां तत्तस्मात्त्वं हरिं व्रज गच्छ मां अव दुःखतः रक्ष। की॰ मां अमां अशोभां विष्णुविरहेण कर्शितां। की॰ इह इं कामं जिहीते प्राप्नोति इह सकामुकमित्यर्थः । यमकत्वादनुस्वारच्युतालंकारः । पु॰ की॰ मामवं मा लक्ष्मीर्मो ब्रह्मा तौ वाति गच्छति इति मामवं लक्ष्मीब्रह्माभ्यामपि सेवितमित्यर्थः । पुनः कीदृशं नवनीरदनीरदं नवो नूतनो यो नीरदः मेघः तस्य नीः नितरां ईः या शोभा तां रदति प्राप्नोति नवांबुदश्याममित्यर्थः ॥ १३ ॥

इति सखी गदिताऽगदिताऽदितानवनराय वराय
वराय वा ॥ इति गिरं कलया कलया कला पटु
गिरा मृदुताऽमृदुताद्रुता ॥ १४ ॥

सं॰टी॰ इतीति । कलानाम्नी सखी कलया गंभीरया गिरा अनवनराय नवो नरः नवनरः न नवनरः अनवनरः तस्मै पुराणपुरुषाय इति वक्ष्यमाणां गिरं यत्पटु यथा तथा अदित ददाति स्म। की॰ गिरा कं सुखं लाति ददाति सा कला तया प्रियोपेतत्वे सुखकारिण्येत्यर्थः। पुनः की॰ मृदुता मार्दवं अमृदुता कठोरत्वं ताभ्यां दुनोतीति द्रुत् तया । की॰ कला तया इति गदिता उक्ता। पु॰ की॰ अगदि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ता वा शब्द इवार्थे स्वचातुर्यादनुक्तेव कीदृशाय वराय वराय वरः अ-यो यस्य वरायःस चासौ वरश्च शुभावहविधिमतें श्रेष्ठाय च॥ १४ ॥

मलयजं तनुतेऽतनु ते तनौ सहचरीनलिनी नलिनीदलम्॥ सुनयनाऽनलदं नलदं च सा तदपि सीदति सीदतिबंधुता॥ १५॥

सं॰टी॰मलयजमिति। हेकृष्ण ते सहचरी सखी तनौ अतनु भूरि मलयजं मलयाचलसंबंधि चंदनं तनुते विस्तारयति लेपनं करोतीत्यर्थः। पुनः ते नलिनी कमलिनी ते प्रिया तनुत्वात् पद्मिनीसाम्यं तनौ अतनु बहुलं नलिनीदलं तनुते। पुनः ते सुनयना दीर्घलोचना अनलदं तापनाशकं नलदं उशीरं तनौ तनुते तदपि सा सीदति दुःखं प्राप्नोति। अपरं बंधुता अस्मदादिसखिता सीदति परितापयति नश्यति वेत्यर्थः ॥ १५ ॥

समुदितेमुदितेमुदितेक्षणे हिमकरेमकरेनकरे श्रुती॥ पिकरवेऽवरवेवरवे तिसाहरिणलांछनलांछनलांछना ॥ १६ ॥

सं॰टी॰समुदिते इति। ईश्वर लक्ष्मीपते अमुदिता मुद्रहिता साते प्रिया ईक्षणे अमुदिते मुद्रहिते मुकुलिते करोति संकोचयतीत्यर्थः। कस्मिन्सति हिमकरे चंद्रे समुदिते सति उदयति सति।की॰ मकरेनकरे मकराणां मत्स्यानां इनः प्रभुः समुद्रस्तस्यकं रातीति करः सुखदः तस्मिन् सर्वस्यापि सुखकरे तस्यास्तु दुःखद इत्यर्थः। च पुनः श्रुती कर्णौ अमुदिते करोति आच्छादयतीत्यर्थः। कस्मिन् सति पिकरवे कोकिलाकूजिते समुदिते सति। कीदृशी अवरवा अवेति शब्दं कुर्वाणा। पुनः कीदृशी वेत्यद्धाक्षरैणायि इति उक्त्वा हरिणलांछनश्चंद्रः स एव लांछनं चिन्हं यस्यसः शिवः सलांछनं चिन्हं यस्याः सा शिवशिवेति जपतीत्यर्थः ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न सहतेसहते सह ते सखी तव वियोग वियोग मयोगहृत्॥ सपदि तां तरुणीं सरणिं मणिं किरतु नाम नवं नवनीविजम्॥ १७॥

सं०टी०नसहत इति। हे अयोगहृत् अयः लोहत्वं गच्छति तत्हृत् हृदयं यस्य हे कठिणहृदय हे वियोग गरुडारूढ हे सह हे शांत ते सखी प्रिया तव वियोगं न सहते सहते इति दुःखित्वाद्वीप्सार्थत्वं।अतः सपदि तामधुना मनसि वर्तमानां तरुणीं किरतु त्यजतु सरणिं किरतु सरणिं प्रियाकुंजमार्गं राधावनमार्गं किरतु गच्छतु सरणिःपद्धतिः पद्ये' त्यमरः। चपरं नवं नूतनं नवनीविजं वसनग्रंथिस्थं मणिं किरतु क्षिपतु नाम निश्चयेन॥ १७॥

अयतया कलयाकलयाशुभां वनजदामजदामजदीप्तिमान्॥हरिरगात्त मगात्तमगाच्च सा मुदमतीवमतीवदृशोःस्थितं॥१८॥

सं०टी०अयतयेति। हरिः तया कलया सह शुभां राधिकां अगात्। कीदृश्या कलया कं सुखं लाति प्राप्नोतीति हृष्टचित्तया।कीदृशो हरिः वनजानि कमलानि तेषां दाम समूहः तस्माज्जातं दाम माला तस्यां जाता या कांतिः सा विद्यते यस्य तथोक्तः सा प्रियात वीक्ष्य अतीव मुदं अगात् प्राप।आगतं विष्णुं आलोक्य हृष्टाभूदित्यर्थः। कीदृशं अगात्तं अगः गोवर्धनः अत्तो येन तम्।पुनः कीदृशं अतीवंअनुद्धतः पुनः कीदृशं दृशोः स्थितं॥ १८॥

रामचंद्रकाविना कविनाऽदः पूरुषोत्तमसुतेनसुतेन॥ राधिकाहृदयशोकदमासीद्राधिकाहृदयशोकदमासीत्॥ १९॥

सं०टी०रामचंद्रेति।अदः राधिकात्हृयशोकदं राधिकायाः हृद-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यं तस्य शोकः तं द्यति खंडयति तत् काव्यं रामचंद्रकविना कृत्वा आसीत् रामचंद्रेण कृतमभूदित्यर्थः। कीदृशेन कविना कः ब्रह्मा उः शिवः अःविष्णुः अः वायुः अः अग्निः अः सूर्यः तेविद्यंते आ राधनीयत्वेन यस्य तेन। पुनःकीदृशेन पूरुषोत्तमः द्विजः तस्य सुतः जनार्दनः तस्य इनेन ज्येष्ठेन सुतेन राधिका च हृदयशोकदा राधिकात्हृदयशोकदुःखनाशिकाकला मश्चंद्रश्च अः विष्णुः अः वायुश्च अस्याति विरहिणमिति असः मधुश्चंद्रः कामश्च तेषां इत् प्रापकं वर्णनीयत्वेन तत् राधिकाहृदयशोकदमासीत् ॥१९॥

इति श्रीपुरुषोत्तमात्मजजनार्दननंदनरामचंद्र कविकृतं राधाविनोदाख्यंकाव्यं सटीकं समाप्तं ॥ शुभंभवतु ॥

श्रीगणेशाय नमः ॥ अथषट्पदीस्तोत्रप्रारंभः ॥ अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् ॥ भूतदयां विस्तारय तारय संसारसागरतः ॥ १ ॥ दिव्यधुनीमकरंदे परिमलपरिभोगसच्चिदानंदे ॥ श्रीपतिपदारविंदे भवभयखेदच्छिदेवंदे ॥ २ ॥ सत्यपि भेदापगमे नाथ तवाहं नमामकीनस्त्वं ॥ सामुद्रो हि तरंगः क्वच न समुद्रो न तारंगः ॥ ३ ॥ उद्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे ॥ दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः ॥ ४ ॥ मत्स्यादिभिरवतारैरवता रवताऽवता वसुधाम् ॥ परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥ ५ ॥ दामोदर गुणमंदिर सुंदरवदनारविंद गोविंद ॥ भवजलधिमथनमंदर परमं दरमपनय त्वंमे ॥ ६ ॥ नारायण करुणामय शरणं करवाणि तावकौ चरणौ ॥ इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥ ७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्य विरचितं श्रीविष्णोः षट्पदीस्तोत्रं संपूर्णम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निम्नलिखित पुस्तक नवीन छपकर विक्रयार्थं प्रस्तुत हैं ॥

सर्व साधारण प्रियपाठकोंपर विदित हो कि हमारे यंत्रालयमें हिन्दीभाषा व संस्कृत व संस्कृतटीकाकी अनेकानेक पुस्तकें, सर्वप्रकारकी अत्यंत शुद्धता पूर्वक उत्तम विलायती कागजपर छपकर विक्रयार्थ तैय्यार हैं जैसे वैदिकग्रंथाः, वेदान्तग्रंथाः, पुराणग्रंथाः, धर्म्मशास्त्रग्रंथाः, कर्मकाण्डग्रंथाः, व्याकरणग्रंथाः न्यायग्रंथाः, ज्योतिषग्रंथाः, काव्यग्रंथाः, अलंकारग्रंथाः, नाटकग्रंथाः, चंपुग्रंथाः, कोशग्रंथाः, वैद्यकग्रंथाः, प्रकीर्णग्रंथाः, छंदोग्रंथादि-

श्रीमद्भागवत भाषाटीका ॥

इसका टीका ऐसा परमोत्तम सरल ब्रजभाषामें किया गयाहै कि सर्व पाठक गणोंको तो उपयोगही है परंतु कथा बाचनेवाले विद्वद्वृंदोंको अत्यंत लाभकारी है कथा संबंधित कथासे अधिक उत्तमोत्तम भक्ति ज्ञानमार्गी१००दृष्टांतभी जहां तहां दिये गये है कीमत आगल १९ रु० थी अबी १३ रु० करदीनी है.

१ रामायणमोटा—सहित श्लोकार्थ, छन्दार्थ, स्तुत्यर्थ, गूढार्थ, माहात्म्य, बरवारामायण, तुलसीदासजीका जीवनचरित्र तथा रामवनवास तिथिपत्रके जिसमें ३८०० टिप्पणीहैं कीमत ९ रु०

२ तथा मझोला—ऊपरके सब अलंकारोंसे विभूषित और लवकुश काण्डसहित कीमत २ रु० चिकनाकागज २॥ रु०

३ तथा बारीक गुटका—ऊपरके अनुसार यह पूर्वोक्त सर्व गुण सम्पन्न साधु संत गृहस्थ किन्तु देशाटनियोंको अत्यंत उपयोगी है कीमत १रु०

नवरत्न रासविलास—श्रीकृष्णचन्द्र राधिकाके अनेक कौतूहल वर्णनहैं जो रासकरनेवालोंको अत्यन्त उपयोगीहै कीमत १२ आ०

भजनामृत—इसमें जप आरती ध्वनि कलेवा गौरीं होरीं हिंडोला भजन नित्य कीर्तन आदिहैं जो सर्व प्राणिमात्रके रखने योग्यहै कीमत १ रु०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूचना.

श्रीयुत गोस्वामि तुलसीदासकृत इसी अक्षरका रामायण रेशमी उंचा

कपडेका जिल्द रु० ६

कपडेके पुठेका रु० ५

शुकसागर—द्वितीयाऽवृत्ति भाषा श्रीमद्भागवतका अक्षरार्थ भाषाऽनुवाद और कथासे अधिक उत्तमोत्तम पावन मन भावन सुख उपजावन ९०० दृष्टांत दिये गये हैं इसवार अक्षर मोटा सपुष्टकागज सुंदर संचा और विलायती जिल्दबांधी गई है कीमत ७ रु० चिकनाकागज कीमत ८ रु०

मनुस्मृति—सान्वय कुल्लूकभट्टटीकाका अनुकूल भाषाटीका बनाई है कीं० ३रु०

शार्ङ्गधर—भाषाटीका सहित कीमत ३ रु०

रागरत्नाकर—भक्तचिंतामणि और रागमालासहित कीमत २ रु०

वाग्भट्ट अष्टांगहृदय—भाषाटीकासहित कीमत १० रु०

गीता चिद्घनानंद स्वामीकी—भाषाटीकासहित कीमत ८ रु

विशेष पुस्तकका नाम और भाव तपास करना होय तो आध आनेका टिकट भेजनेसे सूचीपत्र भेजदिया जायगा.

पुस्तक मिलनेका ठिकाना.

श्रीकृष्णदासात्मज—
गंगाविष्णु—खेमराज
श्रीवेंकटेश्वर छापाखाना बंबई.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ભા
ગ
વ
ત.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

Dr. Urmila Sharma Collection, Varanasi